॥ श्रीमद्दिग्विजयरामो विजयते ॥

श्रीमट्टीकाकृत्पादाचार्य(जयतीर्थयति)विरचिता

श्रीमन्न्यायसुधा

मनाभिः

१) श्रीमद्विद्याधीशतीर्थयतिकृता — — वाक्यार्थचन्द्रिका
२) श्रीमत्सत्यनाथतीर्थयतिकृता — — सुधाविवृतिः
३) श्रीमद्राघवेन्द्रयतिकृतः — — परिमळः
४) श्रीमद्यदुपत्याचार्यकृता — — सुधाटिप्पणी
५) श्रीमच्छ्रीनिवासतीर्थकृतम् — टीकाऽधृतसुधावाक्यार्थविवरणम्
६) श्रीमन्मन्नारी कृष्णाचार्यकृतः — — जपकः

टिप्पणीषट्केन समलङ्कृता ।

तस्याश्चायम्

तृतीयो भागः

श्रीमन्मध्वाचार्यमूलमहासंस्थानश्रीमदुत्तरादिमठाधीशैः

श्री १००८ श्रीमत्सत्यप्रमोदतीर्थश्रीमच्चरणैः

नैकविद्वद्भिः संशोध्य

श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणीसभातः

प्रकाशितः ।

शा.श. १९०४ ई.स. १९८२

शा.श. १९०४

१००० प्रतयः

मुद्रकः
धरखेडकरोपाह्वबाळाचार्यतनूजो धनञ्जयः
सुधामुद्रणमन्दिरम्
उत्तरादिमठीयावारः, बसवनगुडी,
बेङ्गळूर ५६०००४

This book is published
with the financial assistance of
Tirumala Tirupati Devasthanams
under their scheme
"Aid to publish religious books"

एकैकस्यापूर्वनिष्पादकत्वे यागान्तरवैयर्थ्यापत्त्या मिलितानां च हेतुत्वोपगतेः क्षणिकत्वान्मेलनस्यैवायोगेन अयुक्तत्वादिति भावः ॥ द्वितीयं प्रत्याख्याति ॥ **क्रमभावीति** ॥ देवतोद्देश्यकद्रव्यत्यागरूपयागानां युगपदनुष्ठानासम्भवादिति भावः ॥ **मध्यवर्तीनीति** ॥ यागोत्तरं प्रधानापूर्वपर्यन्तं स्थायीनीत्यर्थः । प्राभाकरानुमतसप्तापूर्वीकल्पं प्रदर्श्य दर्शापूर्वत्रयेण किञ्चिदपूर्वमवान्तरं जायते पूर्णमासापूर्वत्रिकेणाप्येकं ताभ्यां च प्रधानापूर्वमिति भट्टदिशा नवापूर्वीमतमभिप्रेत्याह ॥ **यथा वेति** ॥ क्रियारूपयागस्यापूर्वमन्तरेण कालान्तरभाविस्वर्गसाधनत्वासम्भवादिति भावः ॥ तृतीयं प्रतिविधत्ते ॥ **तथेति** ॥ **वक्ष्याम इति** ॥ 'सहदर्शनमात्रेण न व्याप्तिरवसीयत' इत्यादावित्युपस्कर्तव्यम् । कार्याव्यवहितपूर्वक्षणावच्छेदेनावर्तमानस्यापि कारणतास्त्विति शङ्कामपाकुरुते ॥ **नियतेति** ॥ सत्यस्यापि ज्ञानेन निवृत्त्युपगमे सत्यत्वानिवृत्त्योरापाद्यकापादयोरात्मनि व्याप्त्यवधारणेनाज्ञानं यदि सत्यं स्यात्तर्हि न निवर्तेत निवर्तते चातो न सत्यमिति विपक्षे बाधकतर्कमाशङ्कते ॥ **सत्यस्यापीति** ॥ **व्याप्त्यभावादिति** ॥ घटादेरपि सत्यत्वोपगमेनापादके आपाद्यनिरूपितव्याप्त्यभावादिति भावः ॥ **विपक्ष इति** ॥ आत्मनोऽनिवृत्त्युपगमे बाधकप्रमाणाभावादिति भावः । अज्ञानं यद्यनादि स्यात्तर्हि आत्मवन्न निवर्तेत निवर्तते चातो नानादीत्यज्ञानधर्मिकानादित्वापादककानिवर्त्यत्वापाद्यकप्रतिकूलरूपापत्तेरात्मावधृतापाद्यापादकव्याप्तिकायाः परिहृतिं चाभिधत्ते ॥ **अनादेरिति** ॥ भावत्वाविशेषितानादित्वस्य निवृत्तिप्रतियोगिन्यपि प्रागभावे तद्विशेषितस्य च तत्तद्वादिदिशा तत्प्रतियोगिभूतदर्शितसदर्थेषु दर्शनेनानिवृत्तिप्रयोजकतावैधुर्येण सत्यत्वस्यैव तादृशतया आत्मनस्तादृशानिवृत्तिप्रयोजकसत्यत्वाक्रान्ततयाऽनिवर्त्यत्वेऽप्यज्ञानस्य मिथ्यात्वेन तादृगनिवृत्तिप्रयोजकराहित्यान्निवृत्तिः सङ्गच्छत इति दर्शितप्रतिकूलतर्कहेतुभूतापाद्याभिमतानिवर्त्यत्वनिरूपितापादकीभूतानादित्वनिष्ठव्याप्तौ सत्यत्वमुपाधिमाशङ्कते ॥ **मिथ्याभूतमिति** ॥ आत्मनोऽनिवृत्त्यापत्तिभयेनाज्ञानस्य सत्यत्वत्यागेऽनादित्वत्यागोऽपि स्यादिति भावेनाभाससाम्यं चाह ॥ **अनादेश्चेती**त्यवतारयन्ति ॥ दर्शितापत्तिहेतुभूतप्रकृतापाद्यानिवर्त्यत्वनिरूपितप्रकृतापादकानादित्वनिष्ठव्याप्तौ सत्यत्वस्योपाधित्वं क्व किमधिकरणावच्छेदेनोपलब्धं भवतीति योजना । आत्मान्यसर्वस्य त्वन्मते सत्यत्वानुपगतेस्तत्र सत्यत्वस्यानिवर्त्यत्वव्यापकत्वानवधारणेनात्मनि सत्यत्वेनानिवृत्तिनिश्चयस्तदभावेनाज्ञाने निवृत्तिनिश्चयश्च दुःशक इति भावः । सत्यस्यापि निवृत्तावात्मापि निवर्तेतेति त्वदीयप्रसङ्गेऽप्यापाद्यापादकव्याप्तौ विरोधिसन्निपातस्योपाधितया तादृशोपाध्यभावादात्मनो न निवृत्तिरित्यभिधित्समानः प्रतिवादिदिशाऽपि विरोधिसन्निपातस्य निवृत्तिप्रयोजकतासंप्रतिपत्तिं संपिपादयिषति ॥ **निवृत्तावनादित्वमिति** ॥

सु०— **ननु ज्ञानेन सत्यं निवर्तमानं किं विषयगतं निवर्तते । उताश्रयगतम् । अथोभयगतम् । नाद्यः । यतश्चित्रावयविनि नीलविशिष्टद्रव्यज्ञानं स्वविषयं वा स्वविषयसमवेतं वा**

रसादिकं विरोधिनं वा पीतिमादिगुणं न निवर्तयति । न द्वितीयः । घटादिज्ञानेनात्मगत-धर्माद्यनिवृत्तेः । न तृतीयः । आत्मनः शरीरविषयज्ञानेन शरीरात्मसम्बन्धानिवृत्तेरिति । मैवम् । उक्तोत्तरत्वात् । यदि ज्ञानमाश्रयगतं निवर्तयेत् तदा धर्मादिकमपि निवर्तयेदित्यत्र व्याप्त्यभावात् । विपक्षे बाधकाभावाच्च । घटादिज्ञानं धर्माद्यविरोधि । आत्मयाथात्म्यज्ञानं तु बन्धविरोधीति वैषम्याच्च । आत्मयाथात्म्यज्ञानस्यैवापादनविषयतायामिष्टापादनम् । चित्रावयविनि नीलविशिष्टद्रव्यज्ञानं तु मिथ्याज्ञानमेव । नापि तत्र पीतिमगुणोऽस्ति । एकमेव हि चित्रं नाम रूपमाश्रयव्याप्यवृत्तीति पदार्थविदः ।

वा० — एवं ज्ञानाद्बन्धनिवृत्तिर्न दृष्टसामर्थ्यात् । आगमप्रतीते च साध्यसाधनभावे न काऽप्यनुपपत्तिरिति पक्षे विवरणोक्तबाधकं परिहृत्यास्तु वा दृष्टसामर्थ्यादेव बन्धनिवृत्तिस्तथाऽपि नानुपपत्तिरित्यभ्युच्चयेन पक्षमभ्युपेत्य तत्रापि विवरणोक्तानुपपत्तिं परिहर्तुं शङ्कते ।। नन्विति ।। यद्यप्यत्र प्रथममेवास्तु वा ज्ञानाद्बन्धनिवृत्तिः सा च दृष्टसामर्थ्यादित्युक्त्वा तत्रैतदाशङ्क्य परिहृत्यानन्तरमभ्युपेत्य चेदमुदितम् । न वयं दृष्टसामर्थ्याज्ज्ञानाद्बन्धनिवृत्तिं ब्रूम इत्यादिग्रन्थकरणे विवरणोक्तक्रमेणैव दूषणमुक्तं भवति । तथाऽप्यत्र तत्प्रमेयानङ्गीकारेण पराभिमतं निराकृत्यास्तु वेत्यादिनोत्तरोत्तरं तदङ्गीकारेणापि पराभिमतनिरासस्याभ्युच्चयेन प्रस्तावदागमेन ज्ञानाद्बन्धनिवृत्तौ प्राप्तानुपपत्तिनिरासानन्तरं किमागमपर्यन्तधावनेनास्तु वा दृष्टार्थसामर्थ्याज्ज्ञानाद्बन्धनिवृत्तिरिति पक्षस्तथापि परोक्तदूषणपरिहारः सुशक इत्युक्तेः सङ्गतत्वादुक्तातिदेशेन दूषणसौकर्याच्चैवं सन्निवेश इति द्रष्टव्यम् । न चैवमप्यस्तु वा दृष्टसामर्थ्याद्बन्धनिवृत्तिस्तथाऽपि नानुपपत्तिरिति साक्षादेवोक्त्वा तद्दूषणपरिहारः कुतो न कृत इति वाच्यम् । ज्ञाननिवर्त्यस्य सत्यस्य विषयगतत्वाद्यन्यतमवस्त्वस्यावश्यवाच्यतया ज्ञानेन विषयगतादिबन्धनिवृत्तौ च विषयगतादिनिवृत्तिदर्शनस्यैव मूलत्वात्तस्य चानुपपन्नतया मूलाभावेन विषयगतादिनिवृत्त्यसम्भवे सत्यस्य ज्ञानेन निवृत्तिर्न स्यादिति सत्यस्यापि निवृत्तावात्मनिवृत्तिरपि स्यादितिवत्सत्यस्यापि निवृत्तौ तस्य विषयगतत्वाद्यन्यतमवस्त्वमपि स्यात् । तन्मूलतया ज्ञानेन विषयगतादिनिवृत्तिदर्शनमप्यनुपपन्नमङ्गीकार्यं स्यादिति बाधकान्तरकथनेऽपि तात्पर्यात् । अत्र चात्मज्ञानेन स्वविषयात्मनिष्ठनियन्तृत्वादिनिवृत्तौ तत्सापेक्षस्य जीवगतस्य नियम्यत्वादेरप्यर्थान्निवृत्तिसिद्धिरित्याशयेनाद्यः । ज्ञानाश्रयजीवगतनियम्यत्वादिप्रपञ्चनिवृत्तौ तत्सापेक्ष ब्रह्मगतनियन्तृत्वादेरप्यर्थान्निवृत्तिरिति द्वितीयः । उभयगतकर्तृत्वादिनिवृत्तिरिति तृतीयः । आद्येऽपि निवर्त्यनियन्तृत्वादिरूपप्रपञ्चविशिष्टविषयकमात्मज्ञानं तन्निवर्तकमुत निवर्त्यप्रपञ्चाविषयकम् । उभयत्रापि विशिष्टविषयस्य केवलविषयकस्य वाऽऽत्मज्ञानस्य स्वविषय-

गतनियन्तृत्वादिनिवर्तकत्वं दृष्टसामर्थ्याद्वदता विशिष्टादिविषयकस्य विषयगतनिवर्तकत्वं दृष्टमिति वक्तव्यम् । न च तद् दृष्टं प्रत्युत तदभाव एव दृष्ट इति व्यभिचार इत्याशयेनाद्यं निराह ॥ **यत इति** अत्र ब्रह्मज्ञानेन सत्यं निवर्तमानं विषयगतं नियन्तृत्वादि निवर्तते यतो ज्ञानेन विषयगतं निवर्तते लोके इति योजनयोक्ताभिप्रायलाभोऽत एव शङ्काग्रन्थे सामान्यनिर्देश इति । एवमेवोत्तरकल्पद्वयेऽपि योजना द्रष्टव्या । विषयगतपक्षदूषणावसरे नीलादेः स्वविषयत्वोक्तिस्तु विशिष्टविषयकस्य विशेषणविषयकत्वस्यापि सत्त्वाभिप्रायेणेति द्रष्टव्यम् । केवलविषयकं तद्गतनियन्तृत्वादिनिवर्तकमित्यत्रापि व्यभिचारमाह ॥ **स्वविषयसमवेतमिति** । नीलज्ञानस्य न रसादिनिवर्तकत्वमविरोधाच्छुद्धात्मविषयं पुनस्तद्विरोधिनं निवर्तयतीत्यतस्तत्रापि व्यभिचारमाह ॥ **विरोधिनं वेति** ॥ अथवा निवर्त्यस्य सत्यस्य विषयगतत्वाद्यन्यतमवस्त्वनियमाद् ब्रह्मज्ञानेन विषयादिगतसत्यनियन्तृत्वादिनिवृत्तौ ज्ञानेन स्वविषयादिगतमन्यदपि सत्यं निवर्तेतेति सत्यस्यापि निवृत्तौ बाधकप्रसङ्गोऽत्र शङ्काग्रन्थेऽभिमतः । तत्र चेष्टापत्तौ तर्हि तत्तज्ज्ञानेन स्वस्वविषयादिगतं निवर्तते किमित्यापाद्यापादकयोः सूचनाय । ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तौ सत्यस्यापि निवृत्तिः किं न स्यादिति सामान्यस्यैव प्रस्तुतत्वाच्च सामान्येनानुवादोऽयम् । एवं च ज्ञानमज्ञानस्यैव निवर्तकमित्यत्राप्रयोजकत्वाशङ्कायां विपक्षे बाधकान्तरं विवरणोक्तमाशङ्कते **नन्विति** ॥ आपादनत्रयेऽपीष्टापत्तिं निरस्यति नाद्यो यत इत्यादिनेति योज्यम् । एवं च विवरणे दृष्टसामर्थ्याज्ज्ञानाद्बन्धनिवृत्तिरिति दर्शनमूलपक्षदूषणत्वेनैनदुक्तावप्युक्तरीत्या विपक्षबाधकत्वस्यापि सम्भवात्तथा शङ्कितम् । अत्र च पक्षे आपादनविवक्षाप्रवृत्तोत्तरग्रन्थस्वारस्यं यथास्थितविन्यासानुपपत्तिशङ्कानुदयश्चेति द्रष्टव्यम् । आत्मज्ञानेनात्मगतनियन्तृत्वादेरुभयगतकर्तृत्वादेर्वा निवृत्तेः सिद्धान्तेऽनभ्युपगमात्प्रथमतृतीयावनङ्गीकारेण पराकृत्य द्वितीयं पक्षमाश्रित्य तत्रोक्तदूषणं परिहरति ॥ **मैवमिति** ॥ यदि ज्ञानमाश्रयगतं निवर्तयेत्तर्हि धर्मादिकमपि निवर्तयेत् । न च धर्मादिकं निवर्तयति । तस्मान्न ज्ञानमाश्रयगतनिवर्तकम् । ततश्च नाश्रयगतनियम्यत्वादिनिवर्तकत्वमात्मज्ञानस्येति ज्ञानसामान्यस्यापादनविषयतामभिप्रेत्यात्मज्ञानस्य नियम्यत्वादिनिवर्तकत्वाभावसिद्धिरार्थिकीति मनुषे आहोस्विदात्मज्ञानं यद्याश्रयगतनियम्यत्वादिनिवर्तकं तर्हि धर्मादिनिवर्तकमपि स्यादित्यात्मज्ञानरूपविशेषस्यापादनविषयतामभिप्रेत्य यज्ज्ञानमाश्रयगतं निवर्तयति तद्धर्मादिकमपि निवर्तयतीति व्याप्तौ च पटादिज्ञानेनेति व्यभिचारोद्भावनमिति वा । तत्राद्यं सत्यस्य निवृत्तावात्माऽपि निवर्तेतेति परोक्ततर्के पूर्वोक्तदूषणातिदेशेन दूषयति ॥ **यदीति** ॥ हन्त तर्हि विरोधिसद्भाव एवेत्युक्तदूषणातिदेशेनापि तं दूषयति ॥ **घटादीति** ॥ मयाऽऽत्मज्ञानेन नियम्यत्वादिवद्धर्मादिनिवृत्तेरभ्युपगमादिष्टापत्तिरिति भावेन द्वितीयं निराचष्टे ॥ **आत्मेति** ॥ एवं चोक्तोत्तरत्वादित्याद्यकल्पनिरासायैवेति द्रष्टव्यम् । इदं च व्यभिचारपरतापक्षे व्यभिचारोपपादनाय विवक्षितेऽन्यथा पटादिज्ञानेनापि

धर्मादिनिवृत्तिः स्यादित्यापादने दूषणं विपक्षबाधकतापक्षे यथास्थित आपादन एवेति द्रष्टव्यम् । एवमाद्यपक्षस्यानङ्गीकारपराहतत्वात्तद्दूषणमनुद्धृत्य स्वाभिमतद्वितीयपक्षदूषणमेवोद्धृतम् । अधुनाप्रतिवादिस्खलितं नोपेक्षामर्हतीत्याशयेनाद्यपक्षोक्तव्यभिचारस्थलं निराकरोति ॥ **चित्रावयविनीति** ॥ तत्र नीलरूपस्य तद्विरोधिपीतिम्नोऽप्यभावान्न तस्य व्यभिचारोदाहरणत्वं युक्तमिति भावः । न च चित्रावयव्यारम्भकनीलावयवविवक्षया नीलविशिष्टवस्तुज्ञानस्यानिवर्तकत्वोदाहृतेर्न विरोध इति वाच्यम् । तथा सति चित्रावयविनीत्यस्य वैयर्थ्यापत्तेः । नीलज्ञानस्य स्वविषयनिवर्तकत्वे चित्रावयविन एवानुपपत्तिरिति प्रदर्शनार्थत्वेन कथञ्चिदवैयर्थ्ये स्वविरोधिनं प्रतिमानमित्यस्यानुपपत्तिरेव । तदेतदप्याह ॥ **चित्रावयविनीति** ॥ नापि तत्र पीतिमगुणोऽस्तीति च । नापि चित्रावयव्यारम्भकपीतावयवे नीलोऽयमासीदिति ज्ञानस्य वा नीलमिति ज्ञानस्य वा विवक्षितत्वात्तज्ज्ञानस्य वा नीलमिति ज्ञानस्य वा विवक्षितत्वात्तज्ज्ञानस्य च वर्तमानपीतानिवर्तकत्वान्नोदाहरणासङ्गतिरित्यपि युक्तम् । वर्तमानविषयज्ञानस्य स्वविषयविरोधिनिवर्तकतां वदन्तं सत्यत्ववादिनं प्रत्येतस्यानुदाहरणत्वात् । न च तथा सति पारमार्थिकप्रपञ्चवादिनस्तत्काले प्रपञ्चाभावासम्भवेन निष्प्रपञ्चब्रह्मज्ञानस्य प्रपञ्चनिवृत्तेः पूर्वं वर्तमानप्रपञ्चाभावविषयकत्वासम्भवेन ततः प्रपञ्चनिवृत्त्यसम्भव इति वाच्यम् । तन्मते निष्प्रपञ्चब्रह्मज्ञानस्य प्रपञ्चनिवर्तकत्वासम्प्रतिपत्तेः । तदिदमुक्तम् ॥ **भ्रम एवेति** ॥ नन्वस्तु तर्हि प्रतिभासबलाच्छुक्लादिरूपस्य समानजातीयरूपारम्भकत्वनियमेन कारणे चित्ररूपाभावे कार्ये तदयोगाच्च नानारूपसमाहार एव चित्रमिति यथास्थितोदाहरण एव नासङ्गतिरिति । न चैवं चित्ररूपमिति प्रतीतिमाश्रित्य चित्ररूपमङ्गीकुर्वतोऽन्यथा प्रतीतौ विप्रतिपत्तेः अव्याप्यवृत्तेर्व्याप्यवृत्तिसजातीयताविरोधेन रूपाणां व्याप्यवृत्तितानियममभ्युपगच्छतो रूपस्य सजातीयरूपारम्भकत्वनियमस्य चासिद्धेर्नानारूपवदवयवारब्धद्रव्यरूपस्याव्याप्यवृत्तित्वमनुभवबलादित्यस्य तवानुभवविप्रतिपत्त्या निरस्ततया नानारूपसमाहारपक्षानुपपत्त्या कथं नोदाहरणासङ्गतिरिति वाच्यम् । तथाऽप्यनुभवद्वयस्य नियमद्वयस्य च प्रतिपक्षतया नैकस्यापि निर्णय इति भ्रम एवेत्युक्तमयुक्तमित्यत आह ॥ **एकमेव हीति** ॥ पदार्थविद इत्यनेन तदुक्तयुक्त्यैव प्रकृतसिद्धौ वाक्यार्थमीमांसाऽभिनिविष्टानां किं पृथक् तत्र युक्त्युपन्यासाऽऽयासेनेति परस्य पदार्थव्युत्पत्तिशून्यस्य वाक्यार्थमीमांसायां नाधिकार इति च सूचयति । एवं हि पदार्थविदामाशयः । नानारूपवदवयवारब्धस्यावयविनो न तावन्नीरूपत्वम् । अप्रत्यक्षत्वप्रसङ्गात् । न चावयवरूपमेव स्वाश्रयसमवेतत्वप्रत्यासत्त्या तत्र हेतुः । चित्रावयवारब्धावयविप्रत्यक्षतयाऽपि व्यभिचारात् । न चाव्याप्यवृत्तिनानारूपाण्येव तथा । अव्याप्यवृत्तेर्व्याप्यवृत्तिसजातीयताविरोधात् । न च व्याप्यवृत्तीन्येव तानि । नीलावयवावच्छेदेन सन्निकर्षे नीलादेरुपलम्भापत्तेः । अतो नीलपीतादिभिरेकं समय चित्ररूपमारभ्यते । न च सामग्रीसत्त्वान्नीलादिभिर्नीलादेरपि जननापत्तिः । अगत्या

नीलेतररूपादेर्नीलादिकं प्रति प्रतिबन्धकत्वकल्पनात् । प्रतिबन्धकतावच्छेदकः संबन्धः स्वसमवायिसमवेतत्वं प्रतिबध्यतावच्छेदकः समवायः कपालादौ नीलेतररूपसत्त्वे घटादौ समवायेन नीलादेरनुत्पादनात् । तथाऽपि चित्ररूपजनकतावच्छेदकं किमिति चेत् । रूपत्वमेव । न चैवमवयवे केवलनीलसत्त्वे चित्रोत्पादः स्यादिति वाच्यम् । नीलाभावपीताभावादीनामवयवस्थितानां चित्रत्वावच्छिन्नं प्रति हेतुत्वात् । हेतुतावच्छेदकसम्बन्धः स्वाश्रयसमवेतत्वं कार्यताघटकः समवायः । एवं च नीलाभावादेर्वाय्वादावपि सत्त्वात्तत्र चित्रोत्पत्तिवारणाय चित्रत्वावच्छिन्ने रूपत्वेन हेतुत्वमुक्तम् । एवं च न कोऽपि दोषः । ननु स्यादियं प्रतिबन्धकादिकल्पना यदि चित्ररूपस्थले नीलेन नीलजनने बाधकं स्यात् । न चाव्याप्यवृत्तेर्व्याप्यवृत्तिसजातीयताविरोधो बाधक इति वाच्यम् । तद्विरोधस्य निष्प्रमाणकत्वात् । अप्रामाणिकविरोधं प्रकल्प्य नीलेतररूपादेर्नीलादिप्रतिबन्धकत्वकल्पनस्य गौरवकरत्वात् । एवं चाव्याप्यवृत्तिनानारूपाण्येव चित्रम् । अत एव लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुर इत्यादिशास्त्रं त्रिश्वेता शलकीत्यादिव्यवहाराश्चोपपद्यन्ते । न चैवं क्वचित्किञ्चिदवयवावच्छिन्नं क्वचिच्च सर्वावयवावच्छिन्नं नीलाद्युत्पद्यते । तत्र च न नियामकमिति वाच्यम् । अवच्छेदकतासम्बन्धेन नीलादिकं प्रति समवायेन नीलादेरुत्पत्तिवारणायावच्छेदकतासम्बन्धेन नीलं प्रति नीलेतररूपं प्रतिबन्धकमतो न तत्र कपालावच्छेदेन नीलरूपोत्पत्तिः । किन्तु नीलकपालावच्छेदेन । न च सर्वनीलारब्धघटादिवृत्तिनीलरूपादेरप्यवच्छेद्यत्वापत्तिरुक्तसामग्रीसत्त्वादिति वाच्यम् । नीलरूपाभावोऽपि नीलरूपं प्रति हेतुः । कार्यताघटकः सम्बन्धोऽवच्छेदकत्वं कारणताघटकः सम्बन्धः स्वाश्रयवृत्तिद्रव्यसमवायः । एवं पीतरूपादौ पीतरूपाभावादिस्तथा । एवं च न कोऽपि दोष इति चित्ररूपाङ्गीकारोऽनुपपन्न इति चेत् । उच्यते । यद्यपि चित्ररूपाङ्गीकारपक्षे नीलादिकं प्रति नीलेतररूपत्वादिना प्रतिबध्यप्रतिबन्धकभावोऽगत्या कल्पनीयः । नीलाभावादीनां चित्ररूपं प्रति हेतुता च कल्पनीया । अव्याप्यवृत्तिरूपपक्षेऽवच्छेदकतासम्बन्धेन नीलादिकं प्रति नीलेतररूपादिकं समवायेन प्रतिबन्धकम् । व्याप्यवृत्तिनीलस्थलेऽवच्छेदकतासम्बन्धेन नीलोत्पत्तिवारणाय पूर्वोक्तद्रव्यघटितसम्बन्धेन नीलाभावादीनामवच्छेदकतासंबन्धेन नीलादिकं प्रति हेतुता कल्पनीयेति कार्यकारणभावकल्पना तुल्या । तथाऽप्यव्याप्यवृत्तिरूपपक्षे चित्रस्थलेऽवयविनि बहूनि रूपाणि तद्ध्वंसप्रागभावादीनि कल्पनीयानि । चित्रपक्षे एकमेव रूपमिति लाघवम् । तस्माच्चित्रं रूपमेकमेवेति पक्ष एव साधुरिति । एवं च नानारूपसमाहारश्चित्रमिति पक्षस्यायुक्तत्वात्प्रतिभासस्य च मिथ्याज्ञानत्वाच्चित्रावयविनि नीलविशिष्टवस्तुज्ञानोदाहरणमयुक्तमित्याशयः ।

मू० प्रकारान्तरेणापि वस्तुनो ज्ञाननिवर्त्यत्वं नास्तीति चोदयति ॥ **ननु ज्ञानेनेति** ॥ ब्रह्मज्ञानेन जीवगतेन सत्यं निवर्तमानं किं विषयभूतब्रह्मगतं नियन्तृत्वादिकमेव तन्निवृत्तौ जीवगतनियम्य-

मेव ब्रह्मज्ञानानिवर्त्यं तन्निवृत्तौ तत्सापेक्षस्यापि ब्रह्मगतनियन्तृत्वादिकस्य निवृत्तिरावश्यकीति अथवाऽऽश्रय-विषयभूतजीवब्रह्मलक्षणोभयसम्बद्धकर्तृत्वादिकमिति विकल्पत्रयार्थः । आद्यपक्षे नियन्तृत्वादिविशिष्ट-ब्रह्मविषयं ज्ञानं स्वविषयभूतं नियन्तृत्वादिविशिष्टं निवर्तयति उत केवलब्रह्मविषयमेव ब्रह्मगतनियन्तृ-त्वादिकमिति विकल्प्याद्यं दूषयति ॥ **नीलविशिष्टद्रव्यज्ञानमिति** ॥ द्वितीयं दूषयति ॥ **स्वविषय-समवेतमिति** ॥ नीलज्ञानस्य न रसादिनिवर्तकत्वमविरोधात् । शुद्धात्मविषयं पुनस्तद्विरोधिनं निवर्तयती-त्यत उक्तम् ॥ **विरोधिनं वेति** ॥ केचित्तु विषयगतं सत्यं निवर्तमानं किं स्वविषयीभूतं किं वा स्वाविषयीभूतम् । द्वितीयेपि स्वविषयगतं स्वविषयागतं अविरोधि वा तद्विरोधि वेति विकल्प्याद्यं दूषयति ॥ **यतश्चित्रावयविनीति** ॥ नीलवानयमिति ज्ञानविषयीभूतनीलस्य नीलवानयमिति ज्ञानेन निवृत्त्यापातादित्यर्थः । न द्वितीय इत्याह ॥ **स्वविषयेति** ॥ नान्त्य इत्याह ॥ **विरोधिनं वेति** । इति व्याचक्षते । ननु चित्राख्यरूपस्यैकत्वात्तत्र नीलरूपाभावात् कथं चित्रावयविनि नीलज्ञानस्य नीला-द्यनिवर्तकत्वमुदाह्रियते इति चेन्न । चित्रावयव्यारम्भकनीलविशिष्टवस्तुज्ञानस्य विवक्षितत्वात् । न चैवं चित्रावयविनीतिपदवैयर्थ्यम् । नीलज्ञानस्य स्वविषयनिवर्तकत्वे चित्रावयविन एवानुपपत्तिरिति प्रदर्शनार्थ-त्वेन सार्थक्यात् । यद्वा नानारूपसमाहार एव चित्रं रूपं तथैव प्रतीतेः । कारणे चित्राभावे कार्ये तदयोगाच्च । शुक्लादिरूपस्य समानजातीयरूपारम्भकत्वनियमात् । नानारूपवदवयवारब्धद्रव्यरूपस्या-व्याप्यवृत्तित्वमनुभवबलात् स्वीकर्तव्यम् । अभावान्तरे गुणान्तरे चादृष्टस्यापि तस्य संयोगे तदभावे च दर्शनबलेनाभ्युपगमात् । एकस्यैव संयोगात्यन्ताभावस्य व्याप्याव्याप्यवृत्तित्वाभ्युपगमे किमपराद्धं रूपेणेति तत्त्वम् । द्वितीयं पक्षमाश्रित्य विरोधिसद्भावस्य निवृत्तौ प्रयोजकत्वान्न दोष इत्याह ॥ **नैवमिति** ॥ आश्रयगतदुःखादिबन्धनिवृत्तिरेव नियम्यत्वादिनिवृत्तिरिति बोध्यम् ॥ **उक्तोत्तरत्वादिति** ॥ प्रसाद एव निवर्तको न तु ज्ञानमित्युक्तोत्तरत्वादित्यर्थः । दोषान्तरमाह ॥ **यदीति** ॥ केचित्तु सत्यस्यापि निवृत्तावात्मनोपि निवृत्तिः स्यादिति पक्षनिराकरणप्रकारेणास्यापि दूषितप्रायत्वादित्यर्थः । तत्प्रकारमाह । यदीतीत्यप्याहुः । किं ज्ञानमात्रे सत्याश्रयगतधर्मादिनिवृत्तिरापाद्यते किं वा आत्मयाथात्म्यज्ञाने सति । आद्यं दूषयति ॥ **घटादीति** ॥ द्वितीयमङ्गीकरोति ॥ **आत्मेति** ॥ धर्मा-दीनामेव बन्धत्वादिति भावः ॥ **चित्रावयविनीति** ॥ चित्रावयविनि नीलरूपाभावादित्यर्थः । यद-त्रोक्तं चित्रावयव्यारम्भके नीलविशिष्टज्ञानं विवक्षितमिति तन्न । नीलावयविनि पीतिमादेरभावेन तद्गतपीतिमादेरित्यस्यासाङ्गत्यापत्तेः । यदपि नानारूपसमाहार इति तदपि न । नानारूपसमाहारस्य चित्रत्वे नीलधवलारुणरूपेषु पटेषु कर्बुरार्थकचित्रप्रत्ययापत्तेः । नीलपीतादिषु मिथः संसृष्टेष्वनारब्ध-

द्रव्येष्वपि कर्बुरप्रत्ययस्तु द्रव्यान्तरोत्पादाभिमानात् । तस्मान्नीलादिवच्चित्रमपि रूपान्तरमेवाभ्युपेयम् । न चैकरूपवदवयवसहितस्यावयविन उपलम्भेऽपि चित्रप्रत्ययः स्यादिति चेदस्त्येव तत्र चित्ररूपप्रत्ययः । चित्रत्वजातिस्तु न अवयववृत्तिविजातीयसमाहाराभिव्यङ्ग्यत्वात्तस्याः । अत एव त्र्यणुके चित्रे कदापि न चित्रप्रत्ययः । तथाप्यचित्रे पार्श्वे चित्रप्रत्ययो मा भूत् धवलप्रत्ययस्तु कुत इति चेत् अवयवरूपसञ्चारेणावयविनोऽपि तथा प्रत्ययात् । तस्माच्चित्रावयविनि नीलाभावात्तत्र नीलविशिष्टज्ञानमित्येतदनुपपन्नमिति भावः । परस्यासम्बद्धप्रलापित्वप्रकटनायैतदुक्तम् । न त्वेतत्पक्षकक्षीकरणार्थम् ॥

प० — विवरणोक्तमाशङ्कते ॥ **ननु ज्ञानेनेति** ॥ **विषयेति** ॥ ज्ञानविषयगतं ज्ञानाश्रयगतं वेत्यर्थः । आद्ये किं स्वविषयगतं किञ्चित्स्वविषयमेव निवर्तयति ज्ञानं उत स्वविषयसमवेतं यत्किञ्चिन्निवर्तयति । अथ स्वविषयसमवेतं स्वविषयस्य विरोधिनमेव विषयगतमिति त्रीनपि कल्पान् क्रमेण निराह ॥ **स्वविषयं वेत्यादि** ॥ स्वविषयं नीलमित्यर्थः । स्वविषयसमवेतं वा रसादिकमित्येकान्वयः । **घटादिज्ञानेनेति** ॥ न्यायमते घटादिज्ञानस्य धर्मादेश्चात्मधर्मत्वादात्मगतेत्युक्तम् । उक्तोत्तरत्वादित्येतद्व्यनक्ति ॥ **यदीति** ॥ घटादिज्ञानस्य धर्माद्यनिवर्तकत्वेऽप्यात्मज्ञानस्य तु स्यादेवेत्याह ॥ **घटादीति** । आत्मयाथात्म्यज्ञानं स्वाश्रयगतं निवर्तयति चेद्धर्मादिकमपि निवर्तयेदित्यापाद्यत इत्यत आह ॥ **आत्मेति** । **इष्टेति** ॥ 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने'त्यादेरिति भावः । एतच्चेष्टापादानं न्यायमतरीत्येति ध्येयम् । तन्मते षोडशपदार्थविविक्तत्वेनात्मयाथात्म्यज्ञानस्यैव धर्मादिनिवर्तकत्वात् । यद्वाऽऽत्मपदेन परमात्मैव ग्राह्यः । परमात्मयाथात्म्यविषयकज्ञानस्यैव जीवगतस्य स्वाश्रयसंबन्धे सकलकर्मनिवर्तकत्वात् । यदपि चित्रावयविनीत्यादि तदपि न । ज्ञानपदेन प्रमारूपज्ञानस्य विवक्षितत्वादिति भावेनाह । **चित्रेति** ॥ **एकमेव हीति** ॥ नानारूपोपेतावयवैर्जाते द्रव्ये जायमानं रूपमनेकं न भवति ॥ तथात्वे रूपस्य संयोगादिवदव्याप्यवृत्तित्वापत्तेः । किन्तु कार्यद्रव्यरूपस्वाश्रयव्यापिचित्ररूपं नामैकमेव तद्रूपमिति पदार्थविदो नैयायिका मन्यन्ते । तान्प्रति त्वया कथ्यमानमापादनमसङ्गतमेवेति भावः ।

या० — प्रकारान्तरेण सत्यस्य ज्ञानेन निवृत्तौ बाधकमाशङ्कते ॥ **ननु ज्ञानेन सत्यमिति** जीवगतेन ब्रह्मज्ञानेन सत्यं निवर्तमानं किं विषयभूतब्रह्मगतं नियन्तृत्वादिकमेव । तन्निवृत्तौ जीवगतनियम्यत्वादिप्रपञ्चस्यापि तत्सापेक्षस्य निवृत्तिरर्थाल्लब्धैवेत्यभिप्रायः । यद्वा आश्रयजीवगतनियम्यत्वादिकमेव ब्रह्मज्ञाननिवर्त्यम् । तन्निवृत्तौ तत्सापेक्षस्यापि ब्रह्मगतनियन्तृत्वादिकस्य निवृत्तिरार्थिकीति अथवा आश्रयविषयीभूतजीवब्रह्मलक्षणोभयसम्बद्धं कर्तृत्वादिकमिति यथाक्रमं विकल्पत्रयार्थः

सर्वत्रापि क्रमेण व्यभिचारमाह ॥ **यत इत्यादिना** ॥ नानारूपसमाहारश्चित्रमिति कस्यचिन्मतमाश्रित्येदमुदितमित्याहुः । आद्यपक्षेऽपि नियन्तृत्वादिविशिष्टब्रह्मविषयं ज्ञानं स्वविषयभूतं नियन्तृत्वादिविशिष्टं निवर्तयति उत केवलब्रह्मविषयमेव ब्रह्मगतनियन्तृत्वादिकमिति विकल्प्याद्यं दूषयति ॥ **नीलविशिष्टद्रव्येति** ॥ स्वविषयं नीलविशिष्टमित्यर्थः । चित्रावयविनीत्येतद्विरोधिनं वा पीतिमादिगुणमिति वक्ष्यमाणगुणोपपत्त्यर्थम् । द्वितीयं दूषयति ॥ **स्वविषयसमवेतमिति** ॥ नीलज्ञानस्य न रसादिनिवर्तकत्वमविशेषात् । शुद्धात्मविषयं पुनस्तद्विरोधिनं निवर्तयतीत्याशङ्क्य तत्रापि व्यभिचारमाह ॥ **विरोधिनं वेति** ॥ द्वितीयपक्षमाश्रित्य विरोधिसद्भावस्य निवृत्तौ प्रयोजकत्वान्नोक्तदोष इत्याह ॥ **मैवमित्यादिना** ॥ **उक्तोत्तरत्वादिति** ॥ सत्यस्यापि निवृत्तावात्माऽपि निवर्तेतेत्यस्य यदुत्तरमुक्तं व्याप्त्यभावादित्यादि तदेवात्रापीत्यर्थः । तदेव दर्शयति ॥ **यदि ज्ञानमिति** ॥ यदि ब्रह्मज्ञानमाश्रयगतं नियम्यत्वादि निवर्तयेत्तदा स्वाश्रयगतं धर्मादिकं निवर्तयेदित्यत्र व्याप्त्यभावादित्यर्थः । पूर्ववदविशेषनिष्ठव्याप्तिनिरासायाह ॥ **विपक्ष इति** ॥ असिद्धश्चाविशेष इत्याह ॥ **घटादिज्ञानमिति** ॥ **बन्धेति** ॥ आश्रयगतनियम्यत्वादिरेव दुःखादिबन्धरूप इति हृदयम् । ननु यदि ब्रह्मज्ञानमाश्रयगतनियम्यत्वादि निवर्तयेत्तदा तद्गतं धर्मादिकमपि निवर्तयेदविशेषादित्यापाद्यते न घटादिज्ञानमतस्तद्वैषम्येऽपि न दोष इत्याकाङ्क्षायामाह ॥ **आत्मयाथात्म्येति** ॥ परमात्मयाथात्म्यज्ञानेन जीवगतधर्मादिबन्धनिवृत्तेरस्माभिरप्यङ्गीकृतत्वादिति भावः ॥ **मिथ्याज्ञानमेवेति** ॥ अतो न याथात्म्यज्ञानस्य विषयतद्गतनिवर्तकत्वे व्यभिचारोदाहरणस्थलमिदमिति भावः ॥ **एकमेव हीति** ॥ नानारूपसमाहारस्य चित्रत्वे नीलधवलारुणेषु पटेषु कर्बुरार्थचित्रप्रत्ययापत्तिः । एकस्मिन्धर्मिणि नानारूपसमाहारातिरिक्तचित्ररूपानङ्गीकारे एकस्यानारम्भकत्वेन सितपीततन्तुद्वयमात्रारब्धपटे रूपोत्पत्त्यसम्भवेन तस्य नीरूपत्वापत्त्याऽचाक्षुषत्वापत्तिश्चेति तेषां भावः । इदं च परस्यासम्बद्धप्रलापित्वप्रकटनायैवोक्तं न तु तत्पक्षकक्षीकरणार्थम् । एकस्याप्यारम्भकत्वे रूपस्याव्याप्यवृत्तित्वे च बाधकाभावेनैकस्मिन्धर्मिणि नानारूपसमाहारातिरिक्तचित्ररूपाङ्गीकारे साधकाभावात् । अत एव 'पीतशुक्लारुणो हरिः । कृष्णश्चे'त्यादीनि वचनानि समञ्जसानीत्यवधेयम् ॥

श्री० — ज्ञानं घटादिज्ञानम् ॥ **तथा सतीति** ॥ ज्ञानेन सत्यं निवर्तमानं विषयगतं चेन्निवर्तते तर्हि नीलविशिष्टद्रव्यस्य निवृत्तिः स्यादित्यापादनं कर्तुं न शक्यते । तव मते तस्याप्यसत्वादित्यर्थः ॥

च० — सत्यस्य ज्ञानेन निवृत्तौ विवरणोक्तानुपपत्तिं परिजिहीर्षुराशङ्कते ॥ **ननु ज्ञानेन सत्यमिति** ॥ अत्रात्मज्ञानविषयीकृतात्मनिष्ठनियन्तृत्वादेरात्मज्ञानेन निवृत्तौ तन्निरूपितजीवगतनियम्य-

स्वादेरप्यर्थान्निवृत्तिः साधिष्यतीत्याशयेनाद्यकल्पस्य तादृशज्ञानाश्रयीभूतजीवगतनियम्यत्वादेस्तेन निवृत्ती तन्निरूपितात्मवृत्तिनियन्तृत्वादेरप्यर्थान्निवृत्तिरिति द्वितीयस्योभयगतकर्तृत्वादिनिवृत्तिरिति तृतीयस्यावतार इत्यवधेयम् । आद्यकल्पेऽपि नियन्तृत्वादिप्रकारकब्रह्मविशेष्यकज्ञानं नियन्तृत्वादिविशेषितं ब्रह्म निवर्तयतीति विशेषणतया नियन्तृत्वाद्यविषयकमेव ब्रह्मविषयकज्ञानं स्वविषयीभूतब्रह्मवृत्तिनियन्तृत्वादिकमिति द्वितीयाभावादिरूपशुद्धत्वोपरागेण ब्रह्मज्ञानं स्वनिरूपितप्रकारतापन्नं यद्दर्शितशुद्धत्वं तद्विरुद्धनियन्तृत्वादिकमिति कल्पत्रयीमभिप्रेत्य क्रमेण प्रतिविधत्ते ॥ **यत इत्यादि** ॥ विरोधिनं वा पीतिमादिगुणमिति समनन्तराभिधास्यमाने पीतिमगुणे स्वनिरूपितप्रकारतापन्ननीलिमनिरूपितविरोधस्फोरणाय चित्रावयवविनीतिपदम् । नानारूपसमाहारश्चित्रमिति कतिपयमततात्पर्यकमुपात्तम् । द्वितीयकल्पमाश्रित्य समाधित्सते ॥ **मैवमित्यादि** ॥ **उक्तोत्तरत्वादिति** ॥ सत्यस्यापि निवृत्तावात्माऽपि निवर्तेतेतिप्रसञ्जनस्य व्याप्त्यभावादिति समाहितिरभिहिता । सैवात्राप्यवसेयेत्यर्थः । तदेव विशदयति ॥ **यदीत्यादि** ॥ ब्रह्मगोचरज्ञानस्याश्रयगतनियम्यत्वादिनिवर्तकतोपगमे घटादिज्ञानस्याप्याश्रयगतधर्मादिनिवर्तकता स्यादित्यत्र व्याप्त्यभावादित्यर्थः । विषयिताप्रत्यासत्त्या ब्रह्मविशेषितज्ञानत्वावच्छिन्नस्यैवाश्रयगतनिवृत्तिप्रयोजकत्वोपगमेन तदन्यविषयविशेषितज्ञानत्वावच्छिन्नस्याश्रयगतनिवृत्तिव्याप्त्यङ्गीकारस्तत्राप्रयोजकतानिवर्तकबाधकतर्कानवतारेण न सम्भवतीत्याह ॥ **विपक्ष इति** ॥ दर्शितज्ञानद्वयस्य विषयवैलक्षण्यनिबन्धनवैलक्षणस्य सत्वेनावैशेष्यमसिद्धमित्याह ॥ **घटादीति** ॥ **बन्धविरोधीति** ॥ नियम्यत्वादेरेव बन्धरूपत्वादिति भावः । प्रमात्वस्य ज्ञानवृत्तिनिवर्तकतावच्छेदकत्वोपगमे न क्षतिरित्याह ॥ **चित्रावयविनीति** ॥ न्यायनये संयोगादिवद्रूपस्याव्याप्यवृत्तिताविरहेणनानारूपवदवयवारब्धपटादिवृत्तिचित्ररूपस्य व्याप्यवृत्तितया नीलपीतादिसामानाधिकरण्याभावेन चित्ररूपवति नीलादिज्ञानस्य भ्रमत्वादिति भावः । पदार्थविदः नैयायिकाः ॥

सु०— अस्तु वा ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तिस्तथाऽपि बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते । किन्तु बन्धस्याज्ञानतत्कार्ययोरन्यतरत्वमेवेति तदेव वर्णनीयम् । अध्यासवर्णनस्य का सङ्गतिः । अज्ञानस्य मिथ्यात्वं तु कपोणिगुडायितम् । निराकरिष्यमाणत्वात् ।

वा० —एवं यत्खलु प्रमितमप्यनुपपद्यमानं स्वोपपत्तये यदपेक्षते तत्तदाक्षिपति नान्यदित्यत्रत्यस्य प्रमितत्वांशस्य प्रथमं निरासः । साक्षाज्ज्ञानाद्बन्धनिवृत्तेरसूत्रितत्वात् । अप्रामाणिकत्वाच्च । सामान्योक्तेश्च

विशेषप्रमाणानुरोधेनान्यथैवोपपन्नत्वादिति । अत एव तत्र प्रमाणान्युदाहृत्य तत्सावकाशत्ववर्णनम् । तदनन्तरं च ज्ञानमज्ञानस्यैव निवर्तकमिति नियमाभावेनानुपपत्तेरभावात्साक्षाज्ज्ञानाद्बन्धनिवृत्त्यभ्युपगमेऽपि न क्षतिरित्यनुपपद्यमानत्वांशस्यास्तु वेत्यादिना निरासः । अधुना ज्ञानमज्ञानस्यैव निवर्तकमिति नियमाभ्युपगमेऽपि साक्षाज्ज्ञानाद्बन्धनिवृत्तेरन्यथैवोपपन्नतया न काचिदपि क्षतिरित्यभिप्रेत्य स्वोपपत्तये यद्यदपेक्षते तत्तदाक्षिपतीतीममंशं निरस्यति ॥ **अस्तु वेति** ॥ साक्षाज्ज्ञानाद्बन्धनिवृत्तिः श्रूयमाणा ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तिबलाद्बन्धस्याज्ञानात्मकत्वं विनाऽनुपपन्ना सती बन्धस्य साक्षादज्ञानत्वं वोपादानोपादेययोरभेदादज्ञानोपादानकत्वमेव वाऽऽक्षिपेदित्यन्यथैवोपपत्तिरिति भावः । नन्वज्ञानोपादानत्वाक्षेपेऽप्युपादेयस्योपादानस्वभावतयाऽज्ञानस्य च मिथ्यात्वात्तत्कार्यबन्धस्यापि मिथ्यात्वमेवेति तदध्यासवर्णनं सङ्गतमेवेत्यत्राह ॥ **अज्ञानस्येति** ॥ अज्ञानस्य मिथ्यात्वं बन्धस्याध्यस्ततया कार्यकारणयोरेकस्वभावत्वात्साध्यं वा प्रकारान्तरेण वा । नाद्यः । बन्धाध्यासस्यैवाभावेन तत्प्रयुक्ताज्ञानमिथ्यात्वस्यासम्भवात्कपोणिलेहनप्रयुक्तकपोणिस्थगुडलेहनतुल्ययोगक्षेमत्वादित्याह ॥ **कपोणीति** ॥ न द्वितीयः । साधकाभावबाधकसद्भावाभ्यामज्ञानस्य च मिथ्यात्वमित्यादिना निराकरिष्यमाणत्वादित्याह ॥ **निराकरिष्यमाणत्वादिति** ॥ केचित्तु निराकरिष्यमाणत्वादित्यत्राज्ञानस्य तन्मिथ्यात्वस्य चेत्यन्वयमभिप्रेत्याज्ञानस्वरूपस्यैव त्वन्मते निराकरिष्यमाणत्वेन तन्मिथ्यात्वं कपोणिगुडायितमित्यर्थः इत्याहुः ।

स०—अस्तु वेत्यादि ॥ अज्ञानस्य स्वाभाविकत्वे तदात्मकस्यापि बन्धस्यानध्यस्तस्यैव निवृत्तिर्भविष्यतीत्यर्थः । नन्वत एव ज्ञानस्य मिथ्यात्वमित्युक्तं तत्राह ॥ **अज्ञानस्येति** ॥ निराकरिष्यमाणत्वादित्येतदज्ञानस्येत्यनेनाभिसम्बध्यते । तथा च कफोणिकूर्पराभिधेयहस्तमूलस्यैव जिह्वासम्बन्धायोग्यत्वात् तदालिप्तगुडलेहनमसङ्गतम् । तथा अज्ञानस्यैवासंभवात् तन्मिथ्यात्वव्युत्पादनमत्यन्तासङ्गतमित्यर्थः । निराकरिष्यमाणत्वात् 'निर्विशेषे स्वयंभाते' 'अज्ञानस्य च मिथ्यात्वमि'त्यनेन निराकरिष्यमाणत्वादित्यर्थः ।

प०—नन्वज्ञानकार्यत्वे बन्धस्य मिथ्यात्वं सिद्धमेव । अज्ञानस्यैव मिथ्यात्वादित्यत आह ॥ **अज्ञानस्येति** ॥ यद्वा बन्धस्याज्ञानरूपत्वात्तस्य च मिथ्यात्वात्तद्वर्णनं युक्तमित्यत आह ॥ **अज्ञानस्येति** ॥ **कपोणिगुडायितमिति** ॥ कपोणिगुडवदाचरितमित्यर्थः । कपोणिर्नाम बाहुमध्यसन्धिः । 'भुजबाहू प्रवेष्टो दोः स्यात्कपोणिस्तु कूर्परः । अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यध' इत्यमरोक्तेः । अत्र कपोणीतिपवर्गाद्याक्षरपाठः साधुः । न तु कफोणीति पवर्गद्वितीयवर्णपाठः । कं कर्म प्रसारणादिकं पुणति

करोतीत्यमरव्याख्याने पुणधातुजत्वस्यैवोक्तेः । मध्यसन्धिबाह्यप्रदेशान्तर्भागे विद्यमानस्य गुडस्य रसनेन्द्रियस्पर्शो यथा न शक्यते तथाऽज्ञाने मिथ्यात्वसंबन्धोऽपि न शक्यत इत्यर्थः ॥ **निराकरिष्यमाणत्वादिति** ॥ 'अज्ञानस्य च मिथ्यात्वमज्ञानादिति कल्पन' इत्यत्रेति भावः ।

या० — **का सङ्गतिरिति** ॥ अज्ञानस्य सत्यत्वे तत्कार्यस्यापि बन्धस्यानव्यमस्तस्यैव निवृत्तिर्भविष्यतीति भावः । नन्वत एवाज्ञानस्य मिथ्यात्वं मिथ्याज्ञाननिमित्तमित्यनेनोक्तमित्यत आह ॥ **अज्ञानस्येति** ॥ कफोणिः कूर्पराभिधं हस्तमूलम् । स्यात्कफोणिस्तु कूर्पर इत्यभिधानात् । तस्य जिह्वासन्निकर्षायोग्यत्वात्तदालिप्तगुडलेहनं यथाऽशक्यसाधनं तथाऽज्ञानस्यैवासम्भवात्तन्मिथ्यात्वव्युत्पादनमप्यत्यन्तासङ्गतमित्यर्थः । निराकरिष्यमाणत्वादित्यत्राज्ञानस्येत्यनुवर्तते । 'निर्विशेषे स्वयं भाते किमज्ञानावृतं भवेदित्यादिनाऽज्ञानस्य निराकरिष्यमाणत्वादित्यर्थः । तन्मिथ्यात्वस्याप्यज्ञानस्य च मिथ्यात्वमित्यादिना निराकरिष्यमाणत्वादित्यर्थः ।

च० — **का सङ्गतिरिति** ॥ पटस्य सत्यत्वेऽपि तदुपादानभूततन्तुनिवृत्त्या पटनिवृत्तिवत् बन्धस्य सत्यत्वेऽपि तदुपादानभूताज्ञाननिवृत्त्यैव तन्निवृत्तेः संभवेन तस्याध्यासवर्णनमसङ्गतमिति भावः । अत्र कफोणिः कूर्पराभिधहस्तमूलमिति व्याकर्तॄणामेकः पन्थाः । अन्यस्तु कपोणिरिति पवर्गीयाद्याक्षरपाठ एव साधुः । कं कर्म प्रसारणादिकं पुणाति करोतीत्यमरव्याख्याने पुणधातुजत्वस्यैवोक्तेरिति ॥ **निराकरिष्यमाणत्वादिति** ॥ अज्ञानस्येत्यनुषञ्जनीयेनान्वेति । निर्विशेषे स्वयं भात इत्यादिना प्रत्याख्यास्यमानत्वादित्यर्थः ।

सु० — **अपि च सत्यस्यापि विषस्य गरुडध्यानेन निवृत्तिदर्शनाद्बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते । विषं न सत्यमिति चेन्न । तथा सति नीलविशिष्टद्रव्यादेरपि तवासत्यत्वेन तन्निवृत्त्यापादनस्यानुपपत्तिप्रसङ्गात् । सत्यम् । तदपि मम मिथ्या । पराङ्गीकारेण त्वापादनमिति चेत् । तर्हि तदेव न ज्ञाननिवृत्तमिति न मिथ्याभूतस्यापि ज्ञानान्निवृत्तिः । मिथ्याभूतं विरोधिज्ञाननिवर्त्यमिति चेन्न । विशेषणवैयर्थ्यात् । अविरोधादेवात्मनोऽनिवृत्तिसंभवात् । मिथ्यात्वमङ्गीकृत्यापि विरोधोऽङ्गीकार्यः । ततो वरं स एव प्रयोजक इत्यङ्गीकारो लाघवात् । ज्ञानविरोधित्वं मिथ्याभूतस्यैवेति चेन्न । प्रमाणाभावात् । दर्शनादिति चेत् । तद्बाधमेन सत्यस्यापि भवत्केन वार्यते । न च दर्शनमात्रं व्याप्तेर्नियामकम् । ध्यानं मानसी**

क्रिया न ज्ञानमिति चेन्न । यदि क्रियापरिस्पन्दः स तर्ह्यतीन्द्रियाश्रितोऽतीन्द्रिय इत्यपरो क्षावभासविरोधो रूपरहितत्वेन तदवभासविरोधश्च । यदि च मानसी सृष्टिरिति मतम् अनुमतमेतत् । श्रवणदर्शनादिजनितमानसवासनामयस्य वस्तुनो मनसाऽवलोकनं ध्यानमि त्यङ्गीकारात् । अतीन्द्रियोपादानकस्यापि द्रव्यस्यैन्द्रियकत्वं त्र्यणुकादेरिवोपपद्यते । नीरूपा द्वायो रूपवतस्तेजसो जन्म वेदान्तिनां प्रसिद्धमेव । तार्किकादीन्स्त्वारम्भवादनिराकरणेन तोषयिष्यामः । एवं च ध्यायतेश्चिन्तार्थताऽपि स्मृतिसिद्धा सिद्धा । अत एव क्रियामानस वदिति सूत्रविरोधोऽपि परिहृतः । विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेव सर्वत्र ज्ञानस्य पुष्कल कारणम् । अनिच्छतोऽप्यनिष्टज्ञानदर्शनात् । तत्कथमिदं ज्ञानमिति चेन्न । विधेः साध्य-साधनभावमात्रज्ञापनेन चरितार्थत्वात् । इच्छाप्रयत्नयोश्च संस्कारोद्बोधे कृतार्थत्वान्मानस-वस्त्ववलोकने व्यापाराभावात् । चक्षुश्चलननिरासवन्मनोविक्षेपनिरासे वा तदुपयोगः ।

वा०—एवं सत्यस्यापि ज्ञानान्निवृत्तौ बाधकाभावेन ज्ञानमज्ञानस्यैव निवर्तकमिति नियमो नास्त्येव । तन्नियमाङ्गीकारेऽपि वा बन्धस्याज्ञानतत्कार्यान्यतरत्वमात्रप्राप्त्या तस्य च सत्यत्वेऽप्युपपत्त्या न बन्धमिथ्यात्वाक्षेप इत्यन्यथैवोपपत्तिं प्रतिपाद्याधुना सत्यस्य ज्ञानान्निवृत्तेः स्पष्टदृष्टतया व्यतिरेकव्यभि-चारेण बन्धमिथ्यात्वस्य तदुपपादकत्वानुपपत्तौ ज्ञानाद्बन्धनिवृत्तेरन्यथैवोपपत्तेर्न तया बन्धमिथ्यात्वाक्षेप इत्याह ॥ **अपि चेति** ॥ न च तत्रापि विप्रतिपत्तिः । सा किं विषनिवृत्तिगरुडध्यानयोः साध्यसाधन-भावे प्रमाणाभावाद्वा विषयस्यासत्यत्वाद्वा ध्यानस्य ज्ञानत्वाभावाद्वा । नाद्यः । दर्शनादित्यन्वयव्यतिरेक-सध्रीचीनप्रत्यक्षस्योपन्यस्तत्वात् । द्वितीयं शङ्कते ॥ **विषमिति** ॥ मन्मते विषस्य सत्यत्वात्तदुदाहरणं युक्तमेव त्वां प्रत्यपि तत्सत्यमेव । तस्य नीलविशिष्टद्रव्ययोगक्षेमत्वात् । तस्याप्यसत्यत्वे सत्यस्य निवृत्तौ नीलविशिष्टद्रव्यज्ञानेन तन्निवृत्त्यापादनमयुक्तं स्यादित्याह ॥ **तथा सतीति** ॥ ननु विषं नीलविशिष्ट-द्रव्यं चेत्युभयमपि मां प्रत्यसत्यमेव । अतो विषस्यानुदाहार्यत्वमुच्यते । आपादनं तु पराङ्गीकारेणे-त्याशङ्कते ॥ **सत्यमिति** ॥ मन्मते नीलविशिष्टद्रव्यस्य सत्यत्वात्सत्यस्य ज्ञानेन निवृत्तौ नीलद्रव्य-स्यापि तज्ज्ञानेन निवृत्तिं मदङ्गीकारेण मां प्रत्यापाद्य सत्यस्य ज्ञानेन निवृत्तिं त्याजयसि चेत् । त्वन्मते तस्य मिथ्यत्वान्मिथ्याभूतस्य ज्ञानेन निवृत्तौ नीलद्रव्यस्य तज्ज्ञानेन निवृत्तिं त्वदङ्गीकारेणैवापाद्य मिथ्याभूतस्यापि ज्ञानेन निवृत्तेस्त्याजयितुं शक्यत्वेन प्रत्यापादनपराहतत्वान्मां प्रत्यपि तदापादनमनुपपन्न-मेवेत्याह ॥ **तर्हीति** ॥ ननु न मिथ्यात्वमात्रं निवृत्तिप्रयोजकमपि तु विरोधित्वमपि । एवं चाविरोधादेव नीलद्रव्यस्य तज्ज्ञानेन न निवृत्तिरिति मां प्रति प्रत्यापादनं न युक्तमित्याशङ्कते ॥ **मिथ्याभूतमिति** ॥

विरोधिज्ञाननिवर्त्यत्वमित्येतावन्मात्रेऽनुपपत्त्यभावेन मिथ्याभूतमिति विशेषणवैयर्थ्यान्नीलद्रव्यस्य सत्यत्वेऽप्य
विरोधादेव न निवृत्तिरिति न मां प्रत्यपीदमापादनं युक्तमित्याशयेनाह ॥ **विशेषणेति** ॥ ननु न तावन्मा
त्रेऽनुपपत्त्यभाव आत्मनो निवृत्तिप्रसङ्गस्यानिष्टत्वादित्यत्राह ॥ **विरोधादिति** ॥ ननु विरोधिपदेनैवमिथ्या
भूतेति विशेषणेनाप्यात्मनो निवृत्तिप्रसङ्गस्य परिहर्तुं शक्यत्वात्को निर्बन्धो विरोधित्वेनैव तत्परिहार इत्य
येन त्वां प्रत्यापादनमनुपपन्नं स्यादित्यत आह ॥ **मिथ्यात्वमिति** । ननु मिथ्याभूतस्यैव ज्ञानविरोधित्वे
सत्यस्य ज्ञानविरोधस्यैवाभावेन सत्यत्वेन ज्ञानविरोधतदभावाभ्यां निवृत्त्यनिवृत्ती त्वया प्रतिपादयितुं शक्ये
मिथ्याभूतमिति विशेषणं च तस्यैव ज्ञानविरोधित्वमिति प्रतिपादयितुमुपादीयते न त्वात्मादिव्यावृत्त्यर्थम्
एवं च त्वां प्रत्यापादनं युक्तमेव मां प्रति प्रत्यापादनं चानुपपन्नमित्याशङ्कते ॥ **ज्ञानेति** ॥ **प्रमाणेति** ।
यज्ज्ञानविरोधि तन्मिथ्येति व्याप्तौ प्रमाणाभावादित्यर्थः । ननु मिथ्याभूते शुक्तिरजतादौ ज्ञानविरोधित्वद
र्शनमेव । तत्र प्रमाणमित्याशङ्कते॥ **दर्शनादिति चेदिति** ॥ अस्तु शुक्तिरजतादौ दर्शनान्मिथ्याभूतस्यापि
ज्ञानविरोधित्वम् । ज्ञानध्यानादिना बन्धविपादेर्निवृत्तिप्रतिपादकागमवशेन सत्यस्यापि ज्ञानविरोधि
त्वाङ्गीकारे न किञ्चिद्बाधकमित्याह ॥ **तर्हीति** ।। ननु दर्शनवशेन ज्ञानविरोधित्वमिथ्यात्वयोर्व्याप्तौ
सिद्धायामागमो ज्ञाननिवर्त्यत्वं बन्धादेः प्रतिपादयितुं प्रवृत्तो मिथ्यात्वं विनाऽनुपपद्यमानस्तत्रैव पर्यवस्य
तीत्यत आह ॥ **न चेति** ॥ एवं च विरोधित्वस्य ज्ञाननिवर्त्यत्वप्रयोजकत्वे मां प्रत्यप्यापादनानुपपत्ति
स्तत्परित्यागेन मिथ्यात्वस्यैवोपपादकत्वाभ्युपगमे त्वां प्रत्यपि नीलनिवृत्त्यापादनस्य कर्तुं शक्यत्वान्नीलादे
सत्यत्वेऽभ्युपगन्तव्ये तत्तुल्ययोगक्षेमत्वेन विषस्यापि सत्यत्वात्तत्र व्यतिरेकव्यभिचारस्तदवस्थ इति भावः
यद्वा माऽस्तु तर्हि विषे व्यतिरेकव्यभिचाराद्बन्धमिथ्यात्वस्यानुपपादकत्वं मिथ्याभूते नीलद्रव्ये ज्ञान
निवर्त्यत्वाभावेनान्वयव्यभिचारादनुपपादकत्वमेवेत्याह **तर्हीति** ॥ एवं च विषयस्यासत्यत्वात्तत्र व्यति
रेकव्यभिचारे परेण परिहृते तस्य ज्ञानान्निवृत्तिमत्त्वेन तत्रान्वयव्यभिचारोक्त्यसम्भवान्नीलद्रव्येऽन्वय
व्यभिचारोद्भावनाय तत्र मिथ्यात्वं परसिद्धं कर्तुं तथा सतीत्यादिना विषस्य नीलद्रव्यतुल्ययोगक्षेमत्वोप
पादनमिति द्रष्टव्यम् । अन्वयव्यभिचारपरिहारायोपपादके विरोधित्वान्तर्भावमाशङ्कते ॥ **मिथ्याभूत**
मिति ।। माऽस्तु तर्ह्यन्वयव्यभिचारः । तथाऽपि मिथ्याभूतमिति विशेषणेन व्यावर्तनीयस्यात्मनो
विरोधित्वेनैव व्यावृत्तेरुपपादके तद्विशेषणवैयर्थ्यं स्यादेवेत्याह ॥ **विशेषणेति** ॥ उभयथाऽप्यात्मव्यावृत्ति
सम्भवे किं विरोधित्वेनैवत व्यावृत्तिरित्यत्राग्रहेणेत्यभिप्रायमजानानस्य शङ्कां परिहरति ॥ **मिथ्यात्वमिति** ।
एवं चान्वयव्यतिरेकव्यभिचारपरिहारेऽपि नास्मत्प्रसञ्जितस्य बन्धमिथ्यात्वेऽनुपपादकत्वस्य हानिः
मिथ्यात्वस्यानुपपादकतया विरोधित्वस्यैवोपपादकत्वेन ज्ञानात्सत्यस्यापि बन्धस्य विरोधादेव निवृत्त्युपपत्ते
र्ज्ञानाद्बन्धनिवृत्तेरन्यथैवोपपन्नत्वादिति भावः । ननु मिथ्याभूतस्यैव ज्ञानविरोधं सूचयितुं तद्विशेषणम्

एवं च ज्ञानविशेषित्वस्योपपादकत्वोक्तावपि तस्य मिथ्यात्वेन विनाऽनुपपद्यमानतया बन्धमिथ्यात्वस्याप्युपपादकत्वसिद्धेर्नान्यथोपपत्तिरित्याशयेनशङ्कते ॥ **ज्ञानेति** ॥ **तथाऽगमेनेति** ॥ ज्ञानाद्बन्धनिवृत्तिप्रतिपादकागमेनेत्यर्थः । ननु दर्शनसिद्धव्याप्तिबलात्सामान्यस्याप्यागमस्य मिथ्यात्वरूपविशेष एव पर्यवसानमित्यत आह ॥ **न चेति** ॥ तृतीयं शङ्कते ॥ **ध्यानमिति** ॥ चेतोवृत्त्यनन्तरं ध्यानमिति वदतः परस्य मते ध्यानस्य परिस्पन्दत्वाभावेऽपिक्रियाशब्दार्थतया प्रसिद्धिमात्रेण प्रथमः कल्पः । अत एव पूर्वं परिस्पन्द इत्युक्त्वा मृष्टिरित्यतः परं मतमित्युक्तमिति भावः । ध्यानदशायां रूपवद्वस्तुविषयकापरोक्षावभासोऽस्तीत्येतत्त सर्वानुभवसिद्धम् । तस्य च विषयान्तरशून्यत्वाद्ध्यानविषयत्वमेव वाच्यम् । एवं च क्रियायाः परिस्पन्दरूपत्वेऽतीन्द्रियाश्रितक्रियाया अतीन्द्रियत्वनियमान्मनसश्च नैय्यायिकादिमतेऽतीन्द्रियत्वात्तदाश्रितपरिस्पन्दस्य चातीन्द्रियत्वेन रूपरहितत्वेन च तद्विषयकापरोक्षावभासानुपपत्ती रूपावभासानुपपत्तिश्चेत्याह ॥ **तर्हीति** ॥ यद्वागरुडं ध्यायामीति ध्यानविषयकापरोक्षावभाससत्त्वे न ध्यानस्य परिस्पन्दत्वे तस्योक्तदिशाऽतीन्द्रियत्वात्तद्विषयकापरोक्षावभासानुपपत्तिः परिस्पन्दस्य निर्विषयत्वेन ध्याने विषयावभासानुपपत्तिर्ध्यानविषये प्रसिद्धरूपावभासानुपपत्तिश्चेत्याह ॥ **तर्हीति** ॥ श्रवणदर्शनादीत्यनुमितिभ्रमादीनां सङ्ग्रहः । नन्वत्र मनसाऽवलोकनस्य ध्यानत्वोक्त्या तस्यापरोक्षज्ञानत्वमुक्तं स्यात् । तथा च परोक्षज्ञानसन्ततिर्ध्यानमिति तत्त्वप्रकाशिकाविरोध इति चेन्न । तत्रेश्वरस्यैव प्रकृतत्वेन तस्य च परोक्षत्वाच्छ्रवणरूपतत्परोक्षानुभवजन्यत्वाद्वासनायास्तन्मयविषयकतन्मानसानुभवेऽपरोक्षेऽपि परोक्षत्वोक्तेरुपचरितत्वात् । न चाखण्डस्मृतेर्ध्यानत्वोक्तिविरोधस्तथाऽपि स्यादिति वाच्यम् । अनुभवजन्यवासनामयविषयत्वेन तदुक्तेरप्युपचरितत्वादिति भावः । नन्वतीन्द्रियाश्रितपरिस्पन्दस्येवातीन्द्रियोपादानकद्रव्यस्याप्यतीन्द्रियत्वनियमात् । वासनाया अतीन्द्रियकत्वेन तन्मयत्वाङ्गीकारेऽप्यपरोक्षावभासविरोधस्तदवस्थ एवेत्यत आह ॥ **अतीन्द्रियेति** ॥ नन्वेवमपि वासनाया नीरूपत्वेन तदुपादानकवस्तुनो नीरूपत्वाद्रूपावभासविरोधस्तदवस्थ एवेत्यतो नैतद्वेदान्तिभिश्चोदनीयमित्याह ॥ **नीरूपादिति** ॥ ननु न वायोस्तेजसो जन्म किन्तु नित्यतैजसपरमाणुभ्यो द्व्यणुकादीनाम् । ततश्च कारणरूपात्कार्यरूपमिति वदद्भिर्नैय्यायिकै रूपावभासविरोधश्चोदयितुं शक्यत एवेत्यत आह ॥ **तार्किकादीन्स्त्वति** ॥ एवं च ध्यै चिन्तायामिति धातुसूत्रं न परमत इव स्वस्य प्रतिकूलमित्याह ॥ **एवं चेति** ॥ ननु तथाऽपि क्रियामानसवदिति सूत्रं प्रतिकूलमेवेत्यतः क्रियाशब्दस्य कार्यपरत्वान्न तद्विरोधोऽपीत्याह ॥ **अत एवेति** ॥ ध्यानस्य क्रियात्वाङ्गीकारेऽनुपपत्तिवज्ज्ञानत्वेऽप्यनुपपत्तिं शङ्कते ॥ **विधीति** ॥ **इदमिति** ॥ विधिजन्यपुरुषेच्छाप्रयत्नसाध्यत्वेन सिद्धं ध्यानमित्यर्थः । सदृशादृष्टचिन्तादीनामिव विध्यादीनां संस्कारोद्बोधरूपसाधकोपयोगेनान्यथासिद्धिमभिधाय प्रतिबन्धकनिरासोपयोगेनापि तामाह ॥ **तथ्यमिति** ॥ षष्ठ्यर्थे वतिः । तथा च

चक्षुश्चलननिरासस्य दिशश्चानवलोकयन्निति ध्यानाङ्गतया बोधितस्याप्यचलं चेच्छरीरं स्यादित्युक्तन्यायेन मनोविक्षेपनिरासे यथोपयोगस्तथा विधिना साध्यसाधनभावे बोधिते फलेच्छायां सत्यां प्रयत्नेन मनोविक्षेपे निरस्ते ध्यानं सुलभमिति विध्यादीनां तदुपयोग इत्यर्थः । केचित्तु सप्तम्यर्थे वतिस्तथा च चक्षुश्चलननिरासे पत्न्यवेक्षितमाज्यं भवतीत्यादि विध्यादीनामुपयोग इव मनोविक्षेपनिरासेऽपि स इत्यर्थ इत्याहुः ।

स० — अत्र निवृत्तिः किं विनाश उत बाध इति विकल्प्य द्वितीये वक्ष्याम इत्याशयेन आद्यं दूषयति ॥ **अपि चेत्यादिना** ॥ तथाच विषादेर्विनाशेऽपि बाधाभावात् कथं व्यभिचारप्रदर्शनमिति चोद्यानवसर इति ध्येयम् । उपलक्षणमेतत् । सत्यस्यैव रागस्य विषयदोषदर्शनेन सत्यस्यैव दुःखस्य सुहृद्दर्शनेन सत्यस्यैव पापस्य सेतुदर्शनेन निवर्त्यत्वं च द्रष्टव्यम् ॥ **अतीन्द्रियाश्रित इति** ॥ यद्यपि वाय्वादिगतस्पर्शादेरैन्द्रियकत्वेनातीन्द्रियाश्रितस्यातीन्द्रियत्वनियमो नास्ति । तथापि तदाश्रितपरिस्पंदस्य तन्नियम एवेति न व्यभिचारः । ननु तत्ववादिमते मनसः साक्षिविषयत्वेनैन्द्रियकत्वात् मायिमते च मनसोऽहमर्थत्वेन तस्य चापरोक्षत्वादुभयरीत्यापि हेतोरसिद्धिरिति चेन्न । तार्किकस्याप्यत्र प्रतिवादित्वेन तन्मतानुसारेणैवमुक्तेर्युक्तत्वात् । अयं भावः । ध्यानस्यापरोक्षत्वमवभासत्वं चानुभवसिद्धम् । तच्चातीन्द्रियाश्रितपरिस्पंदस्यैव ध्यानशब्दार्थत्वे न संभवति । अतीन्द्रियत्वेनापरोक्षत्वासंभवात् । परिस्पंदत्वेनावभासत्वस्य चासंभवादिति ॥ **रूपरहितत्वेनेति** ॥ परिस्पंदस्य शुक्लादिरूपरहितत्वात् ध्याने तदवभासविरोधश्चेत्यर्थः । यद्वा गरुडं ध्यायामीति ध्यानविषयत्वापरोक्षावभास इति पूर्ववाक्यार्थः रूपरहितत्वेनेत्यस्य तु ध्यानस्य परिस्पंदत्वेन तस्य च निर्विषयत्वेन ध्याने विषयावभासो न स्यादित्यर्थः । न च रूपशब्दस्य विषयपरत्वाभावः । स्वं रूपमित्यत्र विषयपरत्वस्य परैरभ्युपगतत्वात् । रूप्यत इति रूपमिति योगसंभवाच्च । न च क्रियाया अपि न निर्विषयत्वं गमनादिक्रियाया ग्रामादिविषयत्वदर्शनादिति वाच्यम् विषयशब्देन प्रकाश्यस्य विवक्षितत्वेन गमनेन ग्रामस्याप्रकाश्यत्वेन वैवक्षिकविषयकत्वस्य तत्राभावादिति भावः । ननु यथा मनोगतायाः क्रियाया अतीन्द्रियत्वादपरोक्षावभासविरोधस्तथातीन्द्रियवासनामयस्य वस्तुनोपीत्यत आह ॥ **अतीन्द्रियेति** ॥ आदिपदेनातीन्द्रियवायूपादानकस्य वह्नेर्ग्रहणम् । त्र्यणुकचतुष्टयेनेव परमाणुचतुष्टयेनापि चतुरणुकोत्पत्तेरेकदेशिभिरंगीकृतत्वात् तदनुसारेण चतुरणुकमादिपदेन ग्राह्यमित्यपि आहुः । ननु नीरूपस्य वस्तुनः कथमपरोक्षावभासः । न च नीरूपत्वासिद्धिः । नीरूपोपादानकत्वेन तत्सिद्धेरिति चेत् । किमेतदौपनिषदानां चोद्यमुत तार्किकादीनाम् । नाद्य इत्याह ।

ध्यै चिन्तायामितिसूत्रसिद्धेत्यर्थः । ननु तर्हि ध्यानस्य मानसक्रियात्वाभिधायकसूत्रविरोध इत्यत आह ॥ **अत एवेति** ॥ वासनोपादानकत्वस्यावलोकनविशेषस्य ध्यानशब्दार्थत्वादित्यर्थः अस्यापि धात्वर्थरूपक्रियात्वादिति भावः । इच्छाद्यन्वयव्यतिरेकानुविधायिनो ध्यानस्य कथं तद्विपरीतज्ञानत्वमिति शङ्कते ॥ **विधिजन्येति** ॥ **निरासवदिति** ॥ पत्न्यवेक्षितमाज्यं भवतीत्यत्र विधिजन्येच्छादीनां चक्षुश्चलननिरासे उपयोगवन्मनोविक्षेपनिरासे इच्छादीनामुपयोग इत्यर्थः ॥

प०— ज्ञाननिवर्त्यत्वस्य मिथ्यात्वरूपसाध्येन व्यभिचारं चाह ॥ **अपि चेति** ॥ मिथ्याभूतजगदन्तःपातित्वाभिप्रायेण शङ्कते ॥ **विषञ्च सत्यमिति चेदिति** ॥ **तवेति** ॥ सर्वमिथ्यात्ववादिन इत्यर्थः ॥ **तन्निवृत्तीति** ॥ स्वविषयनीलादेः सत्यस्य निवृत्तिः स्यादिति पूर्वोक्तापादनमसङ्गतं स्यादित्यर्थः ॥ **दर्शनादितिचेदिति** ॥ स्वाप्नपदार्थेषु शुक्तिरूप्यादौ चेति भावः ॥ **आगमेन सत्यस्यापि भवदिति** ॥ विश्वमायानिवृत्तिरित्याद्यागमेन सत्यस्याप्यज्ञानादिबन्धस्य निवर्तनमावेद्यमानं केन वार्यते तदप्युपेयमेवेत्यर्थः । यद्वा सेतुदर्शनगरुडध्यानादिना ब्रह्महत्यादेः सत्यस्य 'सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहती'त्याद्यागमेव सत्यस्यापि भवन्निवर्तनमवगम्यमानं केन वार्यत इत्यर्थः । तत्र सत्त्वं नोभयसम्मतम् । शुक्तिरूप्यादौ मिथ्यात्वमुभयसम्मतमित्यतो दोषान्तरमाह ॥ **नचेति** ॥ किञ्चेति चार्थः । तथात्वे वह्नेरपि धूमव्याप्यतापत्तेः । क्वचित्सहदर्शनस्य सत्त्वादिति भावः । नन्वस्तु नाम पररीत्या विषं सत्यम् । न तस्य ज्ञाननिवर्त्यत्वम् । ध्यानस्य ज्ञानरूपत्वाभावादिति शङ्कते ॥ **ध्यानमिति** ॥ मानसक्रियेति कोऽर्थः । क्रियापदेन मनोनिष्ठः परिस्पन्द एव भाति नातोऽन्यत्किञ्चिदस्तीत्यभिप्रायः । उत मनःपरिणामविशेषस्य मानसावभासो ध्यानमिति । आद्ये आह ॥ **यदीति** ॥ स्वमते साक्षिवेद्यत्वेऽपि न्यायमतावष्टम्भेनाह ॥ **सतह्यतीन्द्रियेति** ॥ साक्षिवेद्यत्वपक्षेऽप्याह ॥ **रूपेति** ॥ रूपमाकृतिः । परिस्पन्दस्यामूर्तत्वेन करचरणाद्यवयवोपेतगरुडाकृत्यवभासविरोध इत्यर्थः । द्वितीयपक्षे त्वाह ॥ **यदि चेति** ॥ नन्वेवं संस्कारोपादानकत्वे गरुडाकृतेरतीन्द्रियत्वापत्तिरित्यत आह ॥ **अतीन्द्रियेति** ॥ **वेदान्तिनामिति** ॥ 'आकाशाद्वायुर्वायोरग्निरग्नेराप'इत्याद्युपनिषद्वाक्यं विचारयतामित्यर्थः ॥ **आरम्भवादेति** । वैशेषिकाधिकरणे आरम्भवादनिरासे सति तैरप्येवमेवोपेयं भविष्यतीति भावः ॥ **स्मृतीति** ॥ ध्यै चिन्तायामिति व्याकरणस्मृतिसिद्धा चिन्तार्थतासिद्धेत्यर्थः । चिती संज्ञान इति धातोरिति भावः । **क्रियेति** ॥ 'पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवदि'त्युपासनापादीयब्रह्मसूत्रविरोधोऽपि प्रप्युक्तः । तत्रापि मानसक्रियापदेनोक्तदिशा मानससृष्टेरेवाभिमतत्वादित्यर्थः । नन्वेवं ध्यानस्य ज्ञानरूपत्वे ध्यायीतेति ध्यानविध्ययोग इति शङ्कते ॥ **विधिजन्येति** ॥ लिङादिज्ञानजन्येत्यर्थः ॥ **विधेरिति** ।

ध्यायीतेत्यादि लिङादिप्रत्ययस्येत्यर्थः ॥ **इच्छाप्रयत्नयोरिति** ॥ ध्यायीतेत्यादिलिङादिप्रत्ययादिना ध्यानस्य पुमर्थसाधनत्वावगतौ सत्यां तदनन्तरं ध्यानं मेऽस्त्वितीच्छया तत्साधनगोचरप्रयत्नेन च प्रागनुभूतवस्तुगोचरसंस्कारोद्बोधे सति तत्परिणामरूपस्य वस्तुनो मनसावलोकनस्य ध्यानत्वेन विधेर्वा विधिजन्यप्रयत्नेच्छयोर्वा ध्यानेऽनुपयोगेन ध्यानस्य ज्ञानत्वेपि ध्यानविध्यनुपपत्तिर्नेति भावः ॥ **एतच्चाभ्युपेत्योक्तमिति ज्ञेयम्** ॥ न्यायामृते तृतीयपरिच्छेदे ज्ञानविधेरपि समर्थनात् ॥ **मानसेति** ॥ वस्तुनोऽवलोकनस्य च द्वयोरपि विशेषणम् ॥ मानसं संस्कारद्वारा मनःपरिणामरूपं यद्वस्तु तस्य मानसं मनोजन्यं यदवलोकनं तत्रेत्यर्थः । एतेन ध्यानं स्मृतिरूपमेवेति वदन्तो निरस्ताः । स्मृतिचिह्नतत्तोल्लेखाभावात् । मानसत्वासनापरिगततया सन्निकृष्टवस्तुविषयकत्वात् । संस्कारस्य वस्तुपरिणाम एवोपक्षीणत्वेन मानसावलोकनस्य संस्काराजन्यत्वाच्चेति ॥ **तदुपयोग इति** ॥ प्रयत्नस्योपयोग इत्यर्थः ।

या० — व्यभिचारमप्याह ॥ **अपि चेति** ॥ सत्यस्य ज्ञाननिवर्त्यत्वाभावो द्वेधा वक्तव्यः । विषयस्यासत्यत्वाद्वा ध्यानस्य ज्ञानत्वाभावाद्वेति विकल्पं मनसि निधायाद्यमाशङ्क्य निराकरोति ॥ **नन्वित्यादिना** ॥ सत्यस्यापि निवृत्तौ नीलविशिष्टेत्याद्युदाहृतं तत्तत्सत्यत्वानङ्गीकारे न सङ्गच्छते । तस्य सत्यत्वे विषयस्यापि सत्यत्वं स्यात् । तुल्यन्यायत्वादित्यर्थः ॥ **मिथ्याभूतस्यैवेति** ॥ तथाच स्वरूपकथनाय मिथ्याभूतमिति विशेषणमिति भावः । द्वितीयमाशङ्क्य निषेधति ॥ **ध्यानं नामेति** ॥ **अपरोक्षज्ञानत्वावभासेति** ॥ ध्यानेऽपरोक्षत्वावगाह्यनुभवविरोध इत्यर्थः ॥ **रूपरहितत्वेनेति** ॥ रूपशब्दोऽत्र स्वं रूपं शब्दस्येत्यत्रेव विषयवचनः। तथाच परिस्पंदस्य विषयशून्यत्वेन ध्याने सविषयकत्वावभासविरोध इत्यर्थः । वस्तुतस्तु ध्येयगरुडादेरपि परिस्पन्दात्मकताया अत्राभिप्रेतत्वात्तस्यापरोक्षत्वावभासविरोधः । ध्येयस्य हि मानसापरोक्षत्वमनुभवसिद्धम् । न चातीन्द्रियपरिस्पन्दात्मकस्य तस्य तत्सम्भवति । तथा तत्र स्वर्णादिरूपविशेषावभासविरोधः । परिस्पन्दस्यारूपत्वादित्यर्थः । अत एवानुपदं सिद्धान्ते ध्येयस्यैवैन्द्रियकत्वं रूपवत्त्वं च समर्थ्यते । ननु वासनाया अतीन्द्रियत्वात्तदुपादानकध्येयवस्तुनोऽप्यतीन्द्रियत्वापत्त्याऽपरोक्षावभासविरोधो भवत्पक्षेऽपि समान इत्यत आह ॥ **अतीन्द्रियेति** ॥ ननु वासनाया नीरूपत्वेन ततो रूपजन्मासम्भवे ध्येये रूपावभासविरोधोऽविशिष्ट इत्यत आह ॥ **नीरूपादिति** ॥ **एवं चेति** ॥ ध्यानस्य ज्ञानरूपत्व इत्यर्थः ॥ **स्मृतिसिद्धेति** ॥ ध्यै चिन्तायामिति पाणिनिवचनसिद्धेत्यर्थः । नन्वेवं ध्यानस्य क्रियामानसवदिति मानसक्रियात्वोक्तिविरोध इत्यत आह ॥ **अत एवेति** ॥ धात्वर्थत्वादेवेत्यर्थः । सूत्रे क्रियाशब्देन धात्वर्थक्रियैव विवक्षिता न परिस्पन्द इति भावः । यद्वा ध्यानस्योक्तरीत्या मानससृष्टिरूपत्वादेवेत्यर्थः । तथाच सूत्रे क्रियापदं कार्यपरमिति भावः । ननु

ध्यानमात्मानमुपासीतेत्यादिविधिजन्यपुरुषेच्छाप्रयत्नजन्यमुपलब्धम् । ज्ञानं तु विध्यादिनिरपेक्षस्वकारणाधीनमतस्तयोः कथमभेद इत्याशङ्कते ॥ **विधिजन्येत्यादिना** ॥ **तत्कथमिदमिति** ॥ विध्यादिसापेक्षोत्पत्तिकमिदं ध्यानं न ज्ञानमित्यर्थः ॥ **साध्यसाधनभावमात्रेति** ॥ विधेरिष्टसाधनतावबोधकत्वेन ब्रह्मज्ञानसाधनत्वं ध्याने विधिर्बोधयति न तु ध्यानमुत्पादयतीत्यर्थः ॥ **संस्कारोद्बोध इति** ॥ ध्येयवस्तूपादानभूतमानसवासनोद्बोध इत्यर्थः । विक्षेपो विषयान्तरसञ्चारः ॥ **तदुपयोग इति** ॥ इच्छाप्रयत्नयोरुपयोग इत्यर्थः । मनोविक्षेपनिरासस्यापि ध्यानार्थमपेक्षितत्वादिति भावः ।

श्री०— **तदेवेति** ॥ मिथ्याभूतं नीलविशिष्टं द्रव्यं तद्गतं रसादिकं च त्वन्मते न ज्ञानान्निवृत्तमित्यर्थः ॥ **विरोधीति** ॥ नीलविशिष्टद्रव्यस्य रसादेश्च तज्ज्ञानविरोधित्वाभावादिति भावः । तर्ह्यात्मनोऽपि ज्ञानेन निवृत्तिः स्यादतो मिथ्याभूतमिति विशेषणं सार्थकमिति चेत्तत्राह ॥ **अविरोधादेवेति** ॥ आत्मज्ञानस्यात्मनश्च विरोधाभावादिति भावः ॥ **अङ्गीकार्य इति** ॥ अन्यथा नीलविशिष्टद्रव्यज्ञानेन मिथ्याभूतस्य तद्विषयादेर्निवृत्तिप्रसङ्ग इत्यर्थः । **अतीन्द्रियाश्रित इति** ॥ मनसोऽतीन्द्रियत्वेन तन्निष्ठपरिस्पन्दस्याप्यतीन्द्रियत्वादित्यर्थः । ननु वायोस्तेजसो जन्म तार्किकासम्मतं तत्परमाणुभ्य एव तज्जन्माङ्गीकारादित्यत आह ॥ **तार्किकादीन्स्त्वति** ॥

च०— अज्ञानं न निवर्त्यं सत्यत्वादित्यस्यानैकान्त्यमप्याह ॥ **अपि चेति** ॥ विषस्य सत्यत्वाभावनिबन्धनस्य सत्यस्य ज्ञाननिवर्त्यत्वाभावस्य ध्यानस्य ज्ञानरूपत्वाभावनिबन्धनस्य च तादृशाभावस्य भेदभित्रकल्पद्वयीमभिसन्दधान आद्यं प्रत्याख्याति ॥ **विषं नेत्यादिना** ॥ कल्पान्तरमपहस्तयते ॥ **ध्यानमिति** ॥ मानसक्रियापदेन मनोनिष्ठपरिस्पन्दस्तत्परिणामविशेषो मानसावभासो वेति कल्पद्वयीमभिप्रेत्याद्यं प्रत्याह ॥ **स तर्हीति** ॥ न्यायमतानुरोधेनेदम् । सिद्धान्ते साक्षिवेद्यत्वात् । सिद्धान्तदिशाऽप्याह ॥ **रूपेति** ॥ स्वं रूपं शब्दस्येतिवत् स्वरूपज्ञानसंततिमितिवच्चात्र रूपशब्देन वस्तुस्वरूपमुपादीयते न गुणविशेषः ॥ **अपरोक्षेति** ॥ ध्यानधर्मिकापरोक्षत्वप्रकारकावभासविरोध इत्यर्थः ॥ तथाच परिस्पन्दस्यामूर्तत्वेन करचरणादिसंस्थानविशेषरूपाकृतिरहितत्वेन तद्विशेषविशेषितगरुडाद्यवभासविरोध इत्यर्थः ॥ द्वितीयं प्रतिविधत्ते ॥ **यदि चेति** ॥ अतीन्द्रियोपादानकस्यापि तादृशसंस्कारोपादानकस्यापि । तार्किकादीन् वायोस्तेजोजन्मानुपगच्छतस्तोषयिष्यामः समर्थयिष्यामः । स्मृति-

मिमतत्वादित्यर्थ इत्यभ्यातीयथन् । एतन्मते सूत्रघटकक्रियापदं कार्यतात्पर्यकमवसेयम् ॥ **तत्कथमिद-मिति** ॥ आत्मानमुपासीतेत्यादिविधिजन्यपुरुषेच्छाप्रयत्नघटितसामग्रीजन्यत्वात्तादृशसामग्रीजन्यत्वरूप-विरुद्धधर्माधिकरणत्वलिङ्गकभेदाध्यवसायादिति भावः ॥ **विधेरिति** ॥ ध्यानधर्मिकब्रह्मज्ञानलक्षणसमी-हितसाधनत्वप्रकारकज्ञानजनन एव व्यापृततया विधेर्न ध्यानोत्पादकतेत्यर्थः ॥ **कृतार्थत्वादिति** ॥ ध्येय-स्वरूपोपादानभूतमानसवासनाजनन एवोपक्षीणतया ध्येयवस्तुस्वरूपनिर्वृत्तावन्यथासिद्धत्वादित्यर्थः ॥

सु०— किञ्च सेतुदर्शनादिना पापादिनिवृत्तिः सुप्रसिद्धा । मध्येऽदृष्टकल्पनायां तु न प्रमाणमस्ति । अन्यथा प्रकृतेऽप्यदृष्टकल्पनाप्रसङ्गात् । अदृष्टसाध्यत्वे मोक्षस्यानित्यताप्रसक्ति-रिति चेत् ज्ञानजन्यत्वेऽपि साम्यात् । ज्ञानजन्यत्वेऽपि प्रध्वंसवन्नानित्यत्वमिति चेत् । समानमेतददृष्टसाध्यत्वेऽपीति ।

वा०— एवं ज्ञानत्वोपपादनसापेक्षे ध्याने स्पष्टदृष्टता सत्यनिवर्तकतया उपपादिता । अधुना तन्निरपेक्षे पापादिनिवर्तकतया श्रुतिस्मृतिप्रसिद्धे सेतुग्निचित्कपिलादर्शनादौ तामुपपादयति ॥ **किञ्चेति** ॥ ननु स्वर्गादिसाधनत्वेन श्रुतस्यापि यागादेरदृष्टद्वारकत्ववत्पापादिनिवृत्तिसाधनत्वेन श्रुतस्यापि सेतुदर्शनादेरदृष्टद्वारकत्वमेवेति न साक्षाज्ज्ञाननिवर्त्यत्वं पापादीनाम् । बन्धे च साक्षाज्ज्ञाननिवर्त्यत्वं तन्मिथ्यात्वं विना नोपपन्नमिति न व्यभिचार इत्यतो यागादेः कालान्तरभाविस्वर्गसाधनतानुपपत्तेरदृष्ट-कल्पकत्वेऽपि पापादिनिवृत्तेस्तदैव सम्भवेन न प्रकृतेऽदृष्टकल्पकं किञ्चिदस्तीत्याह ॥ **मध्य इति** ॥ ननु कथं नास्ति सेतुसाक्षात्कारमात्रस्य दुरितनिवर्तकत्वे तत्र स्थितानामपि दुरितनिवृत्तिप्राप्त्या दूरदेशा-गमनछत्रपादुकादिविधुरत्वस्वकृतदोषोद्घोषणादिनियमादियुतस्यैव तस्य पापादिनिवर्तकत्वे वक्तव्ये नियमा-दृष्टस्यावश्यकल्प्यत्वादित्यतो मध्य इत्युक्तम् । एवं च नियमादृष्टसहकृतसेतुदर्शनादेः पापादिनिवर्तक-त्वसिद्धावपि सेतुदर्शनादिजन्यादृष्टस्य पापादिनिवृत्त्यर्थमनपेक्षणान्न व्यभिचारपरिहार इति भावः । ननु विशिष्टज्ञाननिवर्त्यस्य मिथ्यात्वव्यभिचारेऽपि न मदभिमतस्य ज्ञानमात्रनिवर्त्यस्य मिथ्यात्वव्यभिचार इत्याशय इति चेत् । तर्हि भाषाप्रबन्धजन्येनानधीतवेदान्तजन्येनाधीतवेदान्तजन्येनाप्यसम्भावना-विपरीतभावनाप्रारब्धकर्मादिप्रतिबद्धेन ब्रह्मज्ञानेन बन्धानिवृत्तेर्नियमाधीनवेदान्तश्रवणादिनियमादृष्टसहकृत-ब्रह्मज्ञानमेव तन्निवर्तकं त्वयाऽपि वाच्यम् । अन्यथा वेदान्ताध्ययनस्य श्रवणनियमस्यासम्भावनादि-निवर्तकमननादेश्च वैयर्थ्यं स्यात् । प्रारब्धवशाज्जीवन्मुक्तस्य संसारानुवृत्तिश्च न स्यात् । तथा च विशिष्टस्य व्यभिचारोद्भावनं कथं न प्रकृतसङ्गतमित्याशयेनाह ॥ **अन्यथेति** ॥ सहकारित्वेनादृष्टसापेक्षत्वे

प्रकृतेऽदृष्टकल्पनाया असम्भवेऽपि बाधकाभावात्सेतु
दर्शनादावदृष्टकल्पनोपपद्यत इत्याशयेन शङ्कते ॥ **अदृष्टेति** ॥ मोक्षस्यानित्यतायामदृष्टजन्यत्वं प्रयोजक जन्यत्वमेव वा । नाद्यः । कारणान्तरजन्यत्वेऽनित्यत्वाभाववददृष्टजन्यत्वेऽपि तदभावोपपत्त्याऽप्रयोजकत्वात् । न द्वितीय इत्याह ॥ **ज्ञानेति** ॥ ननु ज्ञानफलस्य नित्यत्वबोधकश्रुतिबलाज्जन्यभावत्वस्य विनाशिताप्रयोजकत्वकल्पनान्मोक्षस्य ध्वंसत्वान्न विनाशितेति ज्ञानजन्यत्वपक्षे समाधातुं शक्यत्वेऽपि अदृष्टजन्यत्वपक्षे कल्पकाभावान्नानित्यता समाधातुं शक्येत्यत उक्तरीत्या ज्ञानमात्रस्य मोक्षसाधनत्वाभावाज्ज्ञानस्य नित्यफलकताबोधकमेवादृष्टस्यापि तद्बोधकमित्यदृष्टजन्यत्वेऽपि नानित्यतापत्तिरित्याह ॥ **ज्ञानजन्यत्वेऽपीति** ॥ यद्वाऽदृष्टजन्यत्वेऽभ्युदयत्वापत्त्याऽनित्यताप्रसङ्गेऽपि ज्ञानजन्यत्वे ध्वंसरूपत्वान्नानित्यतापत्तिरिति न साम्यमित्यतोऽदृष्टजन्यस्याभ्युदयत्वनियमस्याप्रयोजकतया ध्वंसत्वेन समाधानं तत्रापि सुशकमेवेत्याशयेनाह ॥ **ज्ञानजन्यत्वेऽपीति** ॥ प्रध्वंसत्वादित्युपलक्षणम् । श्रुत्यादिबलाच्चेत्यपि द्रष्टव्यम् ।

स०— अनित्यताप्रसक्तिरिति ॥ अनित्यत्वापत्तिरित्यर्थः । अदृष्टसाध्यस्वर्गादेस्तद्दर्शनादिति भावः ॥ **साम्यादिति** ॥ विशेषणादिज्ञानजन्यविशिष्टज्ञानस्यापि तद्दर्शनादिति भावः ।

प०—अपि च । सत्यस्यापीत्यादिना गरुडध्याननिवर्त्यत्वं सत्यस्याप्युक्तम् । ध्यानस्य ज्ञानत्वं च व्युत्पादितम् । तथापि चेद्ध्यानस्य ज्ञानत्वमुपेत्य ज्ञाननिवर्त्यत्वं सत्यस्य न मन्यते तं प्रति सत्यस्य ज्ञाननिवर्त्यत्वे स्थलान्तरमाह ॥ **किञ्चेति** ॥ **सुप्रसिद्धेति** ॥ 'सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहती'-त्यादिपुराणेषु प्रसिद्धेत्यर्थः । ननु साक्षाज्ज्ञाननिवर्त्यत्वं मिथ्याभूतस्यैव न सत्यस्य । पापादि तु सेतुदर्शनेनादृष्टे जाते सति तद्द्वारा निवर्तते न साक्षात् । अज्ञानं तु 'भूयश्चान्ते विश्वमायानिवृत्तिरि'ति साक्षादेव निवर्तते । अतोऽज्ञानादिबन्धस्य मिथ्यात्वमेव न पापादेरित्यत आह ॥ **मध्य इति** । प्रकृतेऽपि ज्ञानेन बन्धो निवर्तत इत्यत्रापीत्यर्थः ।

श्री०— सुप्रसिद्धा 'सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहती'त्यादिपुराणेषु ॥ **पापादीति** ॥ सत्यभूतपापादीत्यर्थः । ननु सेतुदर्शनेन पापं न निवर्तते । किं नाम सेतुदर्शनजनितादृष्टेनैवेति चेत् तत्राह ॥ **मध्य इति** ॥ सेतुदर्शनपापनिवृत्त्योर्मध्य इत्यर्थः ॥ **प्रकृतेऽपीति** ॥ ज्ञानजन्यादृष्टेनैव बन्ध-

निवृत्तिरस्त्वित्यर्थः । तथा च ज्ञाननिवर्त्यत्वाप्राप्त्या न मिथ्यात्वसिद्धिरिति भावः ॥ **अनित्यतेति** ॥ स्वर्गादिति भावः ॥ **प्रध्वंसरूपत्वादिति** ॥ बन्धनिवृत्तिरूपमोक्षस्य प्रध्वंसरूपत्वादित्यर्थः ॥ **समानमिति** ॥ तस्मात्सेतुदर्शनेनैव सत्यभूतपापादिनिवृत्तिरिति भावः ।

सु० — अपि च बन्धविध्वंसलक्षणत्वाद्बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते । किं नाम सत्यत्वमेव । न हि मिथ्याभूतस्य शशविषाणादेर्ध्वंसोऽस्ति । ननु यथा मिथ्याभूताच्छशविषाणादेर्व्यावृत्तौ ध्वंसः सत्ये पर्यवस्यतीति भवतोच्यते । तथा सत्याच्चिदात्मनोऽपि व्यावृत्तौ मिथ्याभूते पर्यवस्यतीति मयाऽपि वक्तुं शक्यत एव । सत्यमापाततस्तथा तथाऽप्यपि सौत्री अर्थापत्तिः सन्देहास्कन्दिता कुण्ठितैव । अनिर्वाच्यनिरासेन निश्चयमपि भवतो जनयिष्यामः । बन्धबाध एव मुक्तिरिति चेत् । नैवं श्रुतिसूत्रे वदतः । तरति शोकमित्यादौ विपरीताभिधानात् । विमुक्तश्च विमुच्यत इति श्रुतार्थापत्तिस्तु भाष्यकृतैवान्यथोपपादिता ।

वा० — एवं सम्मुखतया ज्ञानाद्बन्धनिवृत्तिं मूलस्थमुक्तिपदाभिप्रेततया विवक्षित्वा तस्या अन्यथैवोपपत्तिरभिहिता । अधुना मूलस्थमुक्तिपदस्वारस्यानुरोधेन मुक्तिपदार्थस्य बन्धध्वंसस्य प्रतियोगिसत्यत्वाव्याप्ततया न तद्विरुद्धबन्धमिथ्यात्वसापेक्षतेति विरुद्धताप्रतिपादनमुखेनान्यथैवोपपत्तिं दर्शयति ॥ **अपि चेति** ॥ अत्र मुक्तिशब्दार्थतया बन्धध्वंसस्य प्रसिद्धत्वान्मूलोक्तान्यथाऽनुपपत्तेश्च तत्पक्ष एव सम्भवात्तमेव पक्षं सिद्धवत्कृत्य विरुद्धतामभिधाय तद्दूषणनिरासाय परेण शङ्कितस्य स्वाभिमतमुक्तिशब्दार्थस्य निरासोऽभिहितो न तु प्रथममेव मुक्तिशब्दार्थं विकल्प्येति द्रष्टव्यम् । ननु पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्ववतोपि बन्धस्य स्वरूपेण ध्वंससम्भवान्न प्रतियोगिसत्यतानियमो ध्वंसस्य येन मिथ्यात्वसापेक्षता विरुध्येतेत्यतः सप्रतियोगिकस्यासत्प्रतियोगिकत्वाभावे सत्यप्रतियोगिकत्वमेव सिध्यतीत्यभिप्रेत्य लोकप्रसिद्धमिथ्याशब्दार्थतयोभयसम्प्रतिपन्नासद्व्यावृत्तिं ध्वंसस्य प्रतियोगिसत्यत्वनियमे हेतुत्वेनाह ॥ **न हीति** ॥ उभयसम्प्रतिपन्नसत्याद्व्यावृत्त्या प्रतिपक्षं शङ्कते ॥ **नन्विति** ॥ अयमप्यन्यथाऽप्युपपत्त्यार्थापत्तिराभास एवेति न त्वदिष्टसिद्धिरित्याह ॥ **सत्यमिति** ॥ अर्थापत्तेराभासत्वसिद्धावपि सत्यत्वमेवापेक्षत इति मूलस्थैवकाराभिप्रेततयाऽन्यथैवोपपत्तिप्रतिपादनप्रकारस्य प्रतिज्ञातस्य हानिस्तवाप्यनिष्टमेवेत्यत आह ॥ **अनिर्वाच्येति** ॥ सत्याद् ध्वंसस्य व्यावृत्तिं वदतस्तवापि नोभयसिद्धमिथ्याशब्दार्थासत्प्रतियोगिकत्वं संमतमपि त्वनिर्वाच्यत्वं मिथ्याशब्दार्थत्वेन प्रकल्प्य तत्प्रतियोगित्वं वाच्यम् । तच्च वैलक्षण्यं सदसतोरित्यादिना-

नैवापेक्षत इत्युक्तेऽप्रयोजकत्वे प्राप्ते तत्परिहाराय प्रतियोगिमिथ्यात्वस्य ध्वंसविरोधित्वेसिद्धान्तिना वक्तव्ये कथं विरोधित्वमित्याशङ्कते ॥ **किन्नामेति** ॥ मिथ्यात्वविरोधिनत्यत्वव्याप्तत्वाद्विरोधित्वमिति समाधत्ते ॥ **सत्यत्वमेवेति** ॥ तां व्याप्तिमेवोपपादयति ॥ **न हीति** ॥ गूढाभिसन्धिः शङ्कते ॥ **नन्विति** ॥ अभिप्रायमजानान इवोत्तरमाह ॥ **सत्यमिति** ॥ तावताऽन्यथैवोपपत्त्यभावेऽप्यन्यथाऽप्युपपत्त्याऽर्थापत्तेराभासत्वमेवेत्याह ॥ **तथाऽपीति** ॥ ध्वंसेऽसद्व्यावृत्तिवत्सद्व्यावृत्तेरपि सत्त्वादसद्व्यावृत्त्या सत्ये पर्यवसाने सद्व्यावृत्त्याऽसत्यपि पर्यवसानापत्त्या तस्याश्च तवाप्यनिष्टत्वादुभयसम्प्रतिपन्नमदसद्व्यावृत्तिभ्यां सदसद्विलक्षणे पर्यवसानस्यावश्यवक्तव्यतया ध्वंसप्रतियोगिनः सदसद्विलक्षणत्वसिद्धौ मदिष्टसिद्धिरिति पराभिसन्धिमधुना खण्डयति ॥ **अनिर्वाच्येति** ॥ एवं च सत्यान्तराद्व्यावृतस्यापि ध्वंसस्य सत्यान्तरप्रतियोगित्वसम्भवान्नानुपपत्तिरित्याशयः । निवृत्तिर्बाध इति स्वमतानुसारेणाविरोधं शङ्कते ॥ **बन्धेति** ॥ आदिपदेन ततो ह्यस्य बन्धविपर्ययावित्यादिसूत्रोपादानम् ॥ **विपरीतेति** ॥ नदीं तरतीत्यादौ सत्यप्रतियोगिकसम्बन्धध्वंस इव शुक्तिरजतं तरतीत्यप्रयोगाच्छ्रुतौ तरतीत्यबाधस्यैवाभिधानादिति भावः ।

स०—**अनिर्वचनीयनिरासेनेति** ॥ वैलक्षण्यं सदसतोरित्यनेनेति शेषः । ननु विमुक्तश्चेति श्रुत्या संसारिणो मुक्तत्वाधिगतेस्तदन्यथानुपपत्त्याऽध्यस्तबन्धबाधो **मुक्तिरिति** सिध्यतीत्यत आह ॥ **विमुक्तश्चेति** ॥ जीवस्य परब्रह्मत्वाभावेपि मुक्तत्वोक्तिर्युज्यते । तद्गतबन्धस्याज्ञानमूलत्वेनास्वाभाविकत्वात् । अस्वाभाविके त्वविद्यमानत्वव्यपदेशदर्शनादिति ॥ प्रमादात्मकत्वादित्यादिना भाष्ये अन्यथोपपादिनेत्यर्थः ।

प०– शेषोक्त्या व्याचष्टे ॥ **बन्धविध्वंसलक्षणत्वादिति** । मुक्तिरिति योज्यम् । शङ्कां निराह ॥ **सत्यमित्यादिना** ॥ **अर्थापत्तिः** ॥ ज्ञाननिवर्त्यत्वान्यथाऽनुपपत्तिरूपार्थापत्तिः ॥ **कुण्ठैव** ॥ बन्धमिथ्यात्वनिर्णयायाक्षमैवेत्यर्थः ॥ **अनिर्वाच्यनिरासेनेति** ॥ मिथ्यापदस्यानिर्वाच्यमर्थ इति त्वदभिमतस्य 'वैलक्षण्यं सदसतोरप्येतेन निषिध्यत'इत्यादिना वक्ष्यमाणदिशा निरासे सति ज्ञाननिवर्त्यत्वं सत्यस्यैवेति तव निश्चयो भविष्यतीत्यर्थः । मुक्तिर्न बन्धध्वंसः । येनोक्तदोषः स्यादिति शङ्कते । **बन्धबाध इति** ॥ **श्रुतिसूत्रइति** ॥ तरतीत्यादिश्रुतिरग्रे व्यक्ता । जिज्ञासासूत्रं चेत्यर्थः । तत्र बन्धरूपानर्थनिबर्हणहेतुब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्येव प्रतीत्या बन्धबाधस्याप्रतीतेरिति भावः । ननु मास्तु ज्ञाननिवर्त्यत्वबोधकश्रुत्यन्यथानुपपत्त्या बन्धमिथ्यात्वसिद्धिः । 'विमुक्तश्च विमुच्यत'इति संसा-

रिणोऽपि, विमुक्तत्वश्रवणान्यथानुपपत्त्या बन्धमिथ्यात्वसिद्धिरस्तु । बन्धस्य सत्यत्वे तदयोगादित्यत आह ॥ **विमुक्तश्चेति** ॥ 'प्रमादात्मकत्वाद्बन्धस्येत्यानन्दमयाधिकरणे भाष्यकृतैव जीवगतबन्धस्याज्ञानमूलत्वेनास्वाभाविकत्वादस्वाभाविके चाविद्यमानपदप्रयोगदर्शनात्तदभिप्रायेण विमुक्तश्चेत्युक्तिः न तु मिथ्यात्वाभिप्रायेणेत्युपपादितेत्यर्थः ।

या० — वक्तुं शक्यत एवेति ॥ अनिर्वचनीयस्य मन्मते ध्वंसप्रतियोगित्वादिति भावः ॥ **निश्चयमपीति** ॥ ध्वंसप्रतियोगित्वं सत्यस्यैवेति निश्चयमित्यर्थः ॥ **विपरीताभिधानादिति** । अविद्यमानस्य तरणानुपपत्तेस्तरणोक्त्या बाधाभावस्यैवाभिधानादिति भावः । 'विमुक्तश्च विमुच्यत'इति श्रुत्या संसारिणोऽपि मुक्तत्वावगतेस्तदन्यथाऽनुपपत्त्याऽध्यस्तबन्धबाध एव मुक्तिरिति सिध्यतीत्यत आह ॥ **विमुक्तश्च विमुच्यत इति** ॥ बन्धस्याध्यस्तत्वाभावेऽपि मुक्तित्वोक्तिर्युज्यते । तस्याज्ञानमूलकत्वेन जीवस्वभावत्वाभावात् । अस्वाभाविके चाविद्यमानपदप्रयोगादिति 'प्रमादात्मकत्वाद्बन्धस्य विमुक्तत्वं च युज्यत'इत्यनेन भाष्येणान्यथोपपादितेत्यर्थः ।

श्री० — अर्थापत्तिः ज्ञाननिवर्त्यत्वान्यथाऽनुपपत्तिरूपार्थापत्तिः । कुण्ठितैव मिथ्यात्वनिर्णयाक्षमैवेत्यर्थः । मिथ्याभूतेऽनिर्वाच्ये ॥ **निश्चयमिति** । तथाच मिथ्याभूताच्छशविषाणादेर्व्यावृत्तो ध्वंसः सत्य एव पर्यवस्यतीति निश्चयो भवतीति भावः ॥ **बन्धबाध एवेति** ॥ तथा च बन्धमिथ्यात्वं प्राप्नोति ।

च० — वक्तुं शक्यत एवेति ॥ अनिर्वचनीयस्यैव ध्वंसप्रतियोगित्वोरीकृतेरिति भावः ॥ **निश्चयमिति** ॥ ध्वंसप्रतियोगित्वधर्मिकमिथ्यात्वासामानाधिकरण्यप्रकारकनिश्चयमित्यर्थः । बन्धबाधः बन्धात्यन्ताभावः । तथाच तस्य नित्यतया बन्धध्वंसवत्प्रतियोगितासंसर्गावच्छिन्नध्वंसत्वावच्छिन्नजन्यतानिरूपिततादात्म्यसंसर्गावच्छिन्नजन्यभावत्वावच्छिन्नजनकतापन्नानपेक्षणादिति भावः । विमुक्तश्च विमुच्यत इति श्रुतौ बन्धापादानकमोचनक्रियाकर्तृत्वविशेषितस्यैव संसारिणस्तिङन्तशक्तिविषयक्रियाकर्तृत्वावगतेर्बन्धविपर्यस्ततामन्तरेणानुपपद्यमानतया तादृशाध्यस्तबाधाभाव एव मुक्तिरिति सेत्स्यतीत्यत आह॥ **विमुक्तश्चेति**॥ बन्धस्य विपर्यस्तत्वानुगमेऽपि तस्याज्ञाननिबन्धनत्वोरीकारेण जीवनिसर्गत्वाभावेनानैसर्गिके चाविद्यमानपदप्रयोगदर्शनेन प्रमादात्मकत्वाद्बन्धस्य विमुक्तत्वं च युज्यत इति भाष्यकृतैव भङ्ग्यन्तरेणोपपादिततया विमुक्तत्वोक्तिः सङ्गच्छत एवेत्यर्थः ॥

सु० — अपि चैवम् — उक्तिर्ब्रह्मज्ञानं जीवगतं बन्धं निवर्तयतीति सौत्री प्रयोजनोक्ति-र्बन्धमिथ्यात्वं नापेक्षते । यदि जीवज्ञानं जीवगतस्य बन्धस्य निवर्तकमिति प्रयोजनोक्तिः सूत्रे स्यात्तदा कथञ्चिदपेक्षेताऽपि बन्धमिथ्यात्वम् । न चैवं सूत्रकृदाह ॥ न हि शुक्तिकाया-मारोपितं रजतं घटज्ञानान्निवर्तते । ब्रह्मज्ञानं नाम त्वंपदार्थस्य जीवस्य तत्पदार्थेन ब्रह्मणैक्या-नुभव इति तु स्वगोष्ठीनिष्ठं प्रलापमात्रम् । निराकरिष्यमाणत्वात् ।

वा० —एवं मुक्तिरिति पदच्छेदेनान्यथोपपत्तिमुपपाद्यैवम् उक्तिरितिपदच्छेदमुपेत्य तामुपपादयति ॥ **अपि चेति** ॥ अधिष्ठानज्ञानस्य तदारोपितनिवर्तकत्वदर्शनाज्जीवज्ञानं तद्गतबन्धनिवर्तकमित्युक्ते बन्धस्यारोपितत्वलाभेऽप्यधिष्ठानेतरज्ञानस्यान्यगतनिवर्तकत्वादर्शनान्न तदुक्त्या तस्यारोपितत्वसिद्धिरित्याह । **ब्रह्मेति** ॥ एवमित्युक्तिलब्धमाह ॥ **यदीति** ॥ जीवज्ञानेन सत्यस्यापि जीवगतबन्धस्य निवृत्तौ बाधकाभावान्न तथोक्त्याऽपि नियमेन बन्धमिथ्यात्वसिद्धिरित्याशयेनोक्तं कथञ्चिदिति । विवक्षितब्रह्मज्ञानस्य जीवज्ञान एव पर्यवसानान्नानुपपत्तिरिति शङ्कते ॥ **ब्रह्मेति** ॥ **निराकरिष्यमाणत्वादिति** ॥ सत्यत्वाचे नेत्यादिनैक्यस्य न चाप्येकत्वविज्ञानादुक्तन्यायेन मुच्यत इत्यैक्यज्ञानस्य बन्धनिवृत्तिहेतुतायाश्च निराकरिष्यमाणत्वादित्याशयः ।

प० — **इतिप्रयोजनोक्तिरिति** ॥ अथातो जीवजिज्ञासेति यदि स्यादित्यर्थः । **कथञ्चिदिति** गरुडध्यानसेतुदर्शनरूपज्ञानस्य स्वसमानाधिकरणसत्यविषादिनिवर्तकत्वं दृष्टमिति तदाऽपि न मिथ्यात्वसिद्धिर्बन्धस्य । तथापि स्वात्मन्यारोपितदेहादितादात्म्यं स्वात्मयाथात्म्यज्ञाननिवर्त्यं दृष्टमिति तद्वच्छङ्कास्पदं भवतीति कथञ्चिदित्युक्तम् । जीवेऽध्यस्तो बन्धो ब्रह्मज्ञानान्निवर्ततामित्यत आह ॥ **नहीति** किन्त्वधिष्ठानभूतशुक्तितत्वज्ञानादेवेति वाक्यशेषः ॥ **निराकरिष्यमाणत्वादिति** ॥ 'सत्यत्वाच्चे दुःखादेः प्रत्यक्षेण विरोधतः । न ब्रह्मतां वदेद्वेदो जीवस्य हि कथञ्चने'त्यादिनाऽत्रैवाधिकरणे किञ्चिदुपरिभाग इति भावः ॥

श्री० —एवं जीवस्वरूपे आरोपितकर्तृत्वभोक्तृत्वादिरूपबन्धोऽधिष्ठानभूतजीवज्ञानान्निवर्तत इत्युक्तिर्यदि स्यात्तदा बन्धमिथ्यात्वमपेक्षेतेत्यर्थः । सत्यस्यापि निवृत्तौ बाधकाभावस्योक्तत्वात्कथञ्चिदित्युक्तम् ब्रह्मज्ञानं जीवगतं बन्धं निवर्तयतीति सौत्रीप्रयोजनोक्तिः कुतो बन्धमिथ्यात्वं नापेक्षते ॥

सु०— अपि च यदि बन्धमिथ्यात्वं यदि च ज्ञानमात्राद्बन्धबाधः । तदा ज्ञाने सति किमपि मुक्तिर्नैवापेक्षत इति सद्य एव साक्षात्कृतब्रह्मणां शरीरादिनिवृत्तिः प्रसज्येतेत्यर्थापत्तेस्तर्कविरोधः । एतच्च तृतीये प्रपञ्चयिष्यामः । एवं सूत्रितप्रयोजनाक्षिप्तं बन्धमिथ्यात्वमिह वर्णितमित्येतन्निराकृतम् ।

वा०—एवमर्थापत्तेरन्यथोपपत्तिप्रतिपादकतया मूलं व्याख्यायाधुना बन्धमिथ्यात्वमित्यस्योद्देश्यकोटिनिवेशं ज्ञानस्वभावत इत्यनुवृत्तस्य ज्ञानमात्रादित्यर्थं मुक्तिशब्दस्यावृत्तिं तस्य बन्धबाधार्थकत्वं योग्यतया ज्ञाने सति किमपीत्यस्योपपादके एवकारेण सद्य एवेत्यस्य ज्ञानमात्रादित्युक्तिसामर्थ्येन साक्षात्कृतब्रह्मणामित्यस्य च लाभं मुक्तिशब्दस्य शरीरादिनिवृत्तिपरत्वमुद्देश्यस्य विधेयकोटिप्रवेशं प्रसङ्गतात्पर्यं चाभिप्रेत्य तर्कबाधपरतयाऽपि योजयति ॥ **अपि चेति** ॥ ननु ज्ञानमात्राद्बन्धबाधेऽपि प्रारब्धकर्मवशाद्वा दग्धपटायमानाविद्यावशाद्वाऽविद्यासंस्कारवशाद्वाऽविद्यालेशवशाद्वाऽविद्याकारद्वयनिवृत्तावपि तृतीयाकारानुवृत्तेर्वा न सद्यः शरीरादिनिवृत्तिरित्यत आह ॥ **एतच्चेति** ॥ न चाप्येकत्वविज्ञानादिति वाक्यव्याख्यावसरे एतत्परिहारेण प्रपञ्चयिष्याम इत्यर्थः ।

स०— **अपि च यदीति** ॥ ऐक्यसाक्षात्कारो हि सविलासाविद्यां विच्छिन्द्यात् । ततश्च भेददर्शनरहितस्य शरीरपालनाद्यर्था भिक्षाटनादिप्रवृत्तिर्न स्यात् । न चाविद्यांशवती येनाविद्यालेशावस्थाननिमित्ता प्रवृत्तिः स्यात् । तथात्वे तस्य लेशस्यैक्यसाक्षात्कारेऽप्यनिवृत्तस्य कदाप्यनिवृत्तिप्रसङ्गः । प्रारब्धकर्मादिवशादनिवृत्तिरिति चेत् । कर्मादेरप्यविद्याकार्यस्यैक्यसाक्षात्कारेण समूलघातं हतत्वात् । प्रक्रियामात्रस्यचाप्रामाणिकत्वादिति भावः ।

प०— यदि तदेत्यध्याहृत्य वाक्यं योजयति ॥ **यदि बन्धमिथ्यात्वमिति** ॥ तस्यैवार्थः यदि च ज्ञानमात्राद्बन्धबाध इति ॥ **अर्थापत्तेरिति** ॥ मिथ्यात्वसाधकज्ञाननिवर्त्यत्वान्यथाऽनुपपत्तेरित्यर्थः ॥ **तृतीय इति** ॥ अध्याये 'परप्रसादनेच्छोस्तु विलम्बो नाम युज्यते । पुमिच्छाधीनता नोचेद्विलम्बः किं कृतो भवेदि'त्यादिनोपासनापादेऽन्त्यभागे प्रपञ्चयिष्याम इत्यर्थः ॥

या०—नन्वविद्यासंस्काराद्वा प्रारब्धकर्मवशाद्वा शरीराद्यवस्थानमित्यत आह ॥ **एतच्चेति** ॥ संस्कारकर्मादेरप्यज्ञानोपादानकत्वेन तन्निवृत्तावस्थानासम्भवात् । न हि भावकार्यमुपादानव्यतिरेकेणा-

वतिष्ठते । न चाविद्यांशवती येनाविद्यालेशावस्थाननिमित्तमिदं सर्वमुपपद्यत इत्यादि प्र
इत्यर्थः ॥

न्या० — प्रपञ्चयिष्याम इति ॥ साधनलक्षणे उपासनाचरणान्त्यभागे परप्रसादनेच्छो
नुपूर्वीकानुव्याख्याप्रतीकव्याख्यावसरे संस्कारकर्मादेरप्यज्ञानोपादानकत्वेन तन्निवृत्तावनवस्थानासंभ
भावकार्यमुपादानातिरेकेणावतिष्ठते ॥ न चाविद्यांशवतीयेनाविद्यालेशावस्थाननिमित्तमिदं
इति ग्रन्थेनाविद्यासंस्काराद्वा प्रारब्धकर्मवशाद्वा शरीरावस्थानं नेति व्यक्तीकरिष्याम इत्यर्थः ।

सु० — अथवा विषयोक्त्याक्षिप्तमित्येतदनेन निराचष्टे । एवमुक्तिः सौत्री
विषयत्वोक्तिर्बन्धमिथ्यात्वं नापेक्षते । यदि हि सूत्रे जीवात्मनो विषयतयोक्तिः स्
तस्य सन्दिग्धतासिद्धये कर्तृत्वादिबन्धमिथ्यात्वं कथञ्चिदपेक्षेतापि । ब्रह्मैव ह्यत्र
च्यते । न ह्यन्यस्य सन्दिग्धतयाऽन्यस्य विचारविषयतोपपद्यते । अतिप्रसङ्गात् ।
ब्रह्मेत्येतां तु दुराशामपाकरिष्यामः । यद्वा सकलतन्त्रार्थोपोद्धातः प्रयोजनं युष्मदस्म
ग्रन्थस्येत्येतदनेनापाकरोति । तथा हि । एवमुक्तिः सकलजगज्जन्मादिनिमित्तत्वलक्ष
जीवजडात्मकात्प्रपञ्चादत्यन्तव्यावृत्तं ब्रह्मैवाशेषवेदप्रतिपाद्यमित्येवं तत्तु समन्वयादि
क्तिर्जीवगतबन्धमिथ्यात्वं नापेक्षते । एषा हि ब्रह्मण्येव प्रमाणाभासप्रतिपन्नस्य जीव
मिथ्यात्वमपेक्षते । यदि हि जीवस्य ब्रह्मतायां सकलवेदान्तपर्यवसानं प्रतिपादयितु
प्रवृत्तं स्यात्तदा विरोधशान्त्यै बन्धमिथ्यात्वापेक्षा । न चैवम् । यथा चैतत्तथा
नन्वपेक्षायाः पुरुषधर्मत्वात्कथमेतत् । इत्थम् । प्रतीयमानोऽर्थोऽर्थान्तरविषयां पुरु
मुपजनयन्सापेक्ष इत्युपचर्यते । यद्वा प्रमितस्यानुपपद्यमानस्यार्थस्यैवोपपादकाक्षेपशा
ऽत्रोच्यत इति । एवञ्च ज्ञानाद्बन्धनिवृत्तेर्बन्धमिथ्यात्वेन विनाऽनुपपद्यमानत्वाभा
क्षेपकत्वमित्युक्तम् ॥

न्या० —मुक्तिपदोपात्ततया प्रयोजनान्यथानुपपत्तिमात्रनिराकरणार्थं भाष्यमिति भ्रान्ति
एवमिति । कर्तृत्वादेर्मिथ्यात्वाभावेऽपि देहव्यतिरिक्तत्वाणुत्वादिना सन्दिग्धतायाः सम्भ
कथञ्चिदित्युक्तम् । ननु न प्रतिज्ञामात्रेण सूत्रार्थनिश्चयः । तत्तु समन्वयादित्यादिकं न सर्वव्य
ब्रह्मणोऽशेषवेदप्रतिपाद्यत्वपरम् अपि त्वद्वितीयनिर्गुणब्रह्मणोऽशेषोपनिषत्प्रतिपाद्यत्वपरमिति वि

प्रतिज्ञा तु शक्यत्वादित्यतो युक्तिपूर्वं समन्वयसूत्रादेर्भवदुक्तार्थपरतानिराकरणेनास्मदुक्तार्थपरताया ईक्षत्यधिकरणादौ साधयिष्यमाणत्वान्नप्रतिज्ञामात्रमेतदित्याह ॥ **यथा चेति** ॥ अपेक्षत इत्यस्य मुख्यार्थत्वाय विवक्षाविशेषं दर्शयति ॥ **यद्वेति** ॥ ननु मिथ्यात्वमपीत्युत्तरवाक्ये क्रियापदाभावेन पूर्ववाक्यात्क्रियापदस्य मुक्तिरित्यस्यचानुवृत्तेर्वक्तव्यत्वान्मुक्तिर्बन्धस्य मिथ्यात्वमपि नापेक्षते प्रत्यक्षविरोधादित्यर्थनिष्पत्त्योक्तस्यैव पुनरुक्त्यैकस्मिन्नेव समुच्चयार्थापिपदानुपपत्त्याऽपेक्षाभावे प्रत्यक्षविरोधस्य हेतुत्वानुपपत्त्या च नोत्तरवाक्यं पूर्वसङ्गतम् । न चास्तिभवत्योः सर्वत्र सम्बन्धादस्तीतिक्रियासम्बन्धे बन्धमिथ्यात्वं नास्तीत्येतदर्थप्रतिपादकमिदं वाक्यमिति वाच्यम् । तथात्वेऽर्थापत्तौ पूर्ववाक्योक्तदूषणानुपपादकत्वाद्‌र्थान्तरोक्तेश्च प्रकृतानुपयोगादसङ्गतिरित्यतः पूर्वोक्तानुपपादकत्वेऽप्यर्थापत्तौ दूषणान्तरकथनपरत्वान्नासङ्गतिरित्याशयेन प्रकरणशुद्धये पूर्ववाक्याभिप्रायानुवादपूर्वमुत्तरवाक्यतात्पर्यमाह ॥ **एवमिति** ॥ अत्र बुध्याविवेकेन ज्ञानाद्बन्धनिवृत्तेरेवाभावादित्यप्यन्वयः । तेन च ज्ञानाद्बन्धनिवृत्तेः प्रथमोक्तप्रमितत्वाभावोक्तिः । अनुपपद्यमानत्वाभावादित्यनेनास्तु वेत्युक्तानुपपत्त्यभावोक्तिः । बन्धमिथ्यात्वेन विनेत्यनेन बन्धमिथ्यात्वस्यानुपपादकत्वस्योक्तिः । दूषणान्तरमित्यनेन प्रमाणविरोधोक्तिः । एवंचार्थापत्तिसामग्र्यभावः सकलतद्दोषवत्त्वं चेति सूचितं भवति । अत एवोत्तरत्रैषाखल्वित्यादिना तत्सामग्र्यादिवर्णनमिति ध्येयम् ।

स०—— **अपाकरिष्यामः** ॥ यजमानप्रस्तरत्वमित्यनेन ॥ **यथा चैतत्तथा वक्ष्यामः** ॥ 'जन्माद्यस्येतिसूत्रेण गुणसर्वस्वसिद्धये' इत्यादिना प्रमेयदोषस्य प्राधान्येनाभिधानं ग्रन्थदोषस्याप्राधान्येनाभिधानं मत्वाऽऽह ॥ **एवं ज्ञानादीति** ॥

प०——**कथंचिदपेक्षतापीति** ॥ बन्धस्य सत्यत्वेऽपि देहादिविविक्तत्वाविविक्तत्वाणुत्वमहत्त्वनित्यत्वानित्यत्वादिनापि सन्देहसंभवात्कथंचिदित्युक्तम् ॥ **नह्यन्यस्येति** ॥ जीवस्येत्यर्थः ॥ **अन्यस्येति** ॥ ब्रह्मण इत्यर्थः ॥ **अपाकरिष्याम इति** ॥ 'न ब्रह्मतां वदेद्वेद' इत्यादिनेति भावः । एवमध्यासभाष्यस्य परोक्तसङ्गतिद्वयं निरस्य तृतीयामपि सङ्गतिं निराकर्तुमिदमेव वाक्यं प्रकारान्तरेण व्याख्याति ॥ **यद्वा सकलेति** ॥ **इत्यादिग्रन्थस्येति** ॥ परकीयाध्यासभाष्यस्येत्यर्थः ॥ **यथा चैतत्तथा वक्ष्याम इति** । 'निर्गुणत्वं च तेनैव निषिद्धं प्रभुणा स्वयमि'ति 'कथन्नित्यगुणस्यास्य स्यादैक्यं गुणहानत'इत्यादि च जन्माधिकरणे । 'तस्माच्छास्त्रेणजिज्ञास्यमस्मदीयं गुणार्णवम् । वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तममि'तीक्षत्यधिकरणे तत्रतत्रेति भावः । मुक्तिरपेक्षते उक्तिरपेक्षत इति योजनाद्वयेऽप्यनुपपत्तिमाशङ्क्य निराह । **नन्वपेक्षाया इति** ॥

या०—**विरोधभ्रान्त्या इति** ॥ विरुद्धधर्माधिकरणत्वेन ब्रह्मात्मताया अयोगादिति भावः **बन्धेति** । जीवगतदुःखादीत्यर्थः ॥ **वक्ष्याम इति** ॥ अस्मिन्नेवाधिकरणे 'सत्यत्वात्तेन दुःखादे प्रत्यक्षेण विरोधतः । न ब्रह्मतां वदेद्वेदो जीवस्य हि कथञ्चने'त्यादिनेति शेषः ।

श्री०—ब्रह्मज्ञाननिवर्त्यत्वे बाधप्राप्त्या बन्धस्य मिथ्यात्वं प्राप्तमेवेत्यतो बन्धस्य ब्रह्मज्ञा निवर्तकमेव न भवतीत्याशयेनाह ॥ **न हीति** ॥ तथा जीवगतो बन्धो न ब्रह्मज्ञानान्निवर्तत इति भावः ननु न ब्रह्मज्ञानं घटज्ञानतुल्यमित्याशङ्कते ॥ **ब्रह्मज्ञानं नामेति** ॥ **सद्य एवेति** ॥ तथा च वातपुत्रीय ब्रह्मोपदेशाः प्रसज्येरन्नित्याशयः ॥ **सन्दिग्धतेति** ॥ आत्मा च ब्रह्म तस्य चाहं कर्तेत्याद्युक्तरीत्येत्यर्थः अन्यस्य जीवात्मनः अन्यस्य ब्रह्मणः । नन्वात्मन एव ब्रह्मत्वाज्जीवस्य सन्दिग्धत्वेऽपि ब्रह्मणो विषयत्व युक्तमित्यत आह ॥ **आत्मा चेति** ॥

च०— **वक्ष्याम इति** ॥ प्रकृतनय एव सत्यत्वात्तेनदुःखादेरित्यादिना जन्मादिनये निर्गुणत्व च तेनैवेत्यादिनेक्षतिनये च वासुदेवाख्यमित्यादिनाभिधास्याम इत्यर्थः ॥ **उपचर्यत इति** ॥ जानाति मन्थाचल इत्यादिवदिति भावः ॥

अनु० — मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधतः ॥

सु०— दूषणान्तरं चार्थापत्तेराह ॥ **मिथ्यात्वमपीति** ॥ न केवलं बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते किं नाम बन्धस्य मिथ्यात्वं नास्तीत्यपिसंबन्धः । नन्वेतदनुपपन्नम् । प्रमाणं हि स्वमहिम्नैवार्थं व्यवस्थापयति । न पुनः प्रागर्थसिद्धिमपेक्षते । तथात्वे वा प्रमाणवैयर्थ्य पूर्वप्रमाणस्यापि तथात्वेनानवस्था च स्यात् । अतः प्रागाक्षेप्यासिद्धिरर्थापत्तेर्भूषणमेव । प्रवृत्ताया त्वर्थापत्तौ नाक्षेप्यासिद्धिः प्रमितत्वादेव । एवं तर्हि परिचितचरपुरुषस्य दिवाऽभुञ्जानस पीनत्वमनुपपद्यमानं रसायनसिद्धिं योगर्द्धिं वा कस्मान्नाक्षिपेत् । तदसिद्धिरपि प्रागर्थापत्ति प्रवृत्तेरलङ्कार एव । उत्तरकालं तु नास्त्येवेति चेत् । न । वैषम्यात् । न हि रसायनसिद्ध्या द्यसिद्धतया नार्थापत्तिप्रमेयम् । अपि तर्हि परिचितचरे पुरुषे प्रमाणबाधिततया । असिद्ध साधयति प्रमाणं न तु प्रमाणविरुद्धमिति हि प्रसिद्धम् । एषा खल्वर्थापत्तिसामग्री । यदा

एवाभिमतत्वमनुपपद्यमानोऽन्यथाऽप्युपपादितैरन्यथैवोपपादितैः प्रमाणविरुद्धार्थत्वं चेत्यर्थापत्ति-दूषणानीति । सत्यम् । वयमपि हि बन्धमिथ्यात्वमहं कर्ता भोक्ता सुखी दुःखीत्यादिप्रत्यक्ष-विरुद्धत्वादेव नार्थापत्तिप्रमेयमिति ब्रूमः । तदिदमुक्तं प्रत्यक्षविरोधत इति । प्रत्यक्षविरोधतो-ऽपीति वा योजना । तेन प्रमाणान्तरविरोधं समुच्चिनोति । चेष्टादिलिङ्गैरहमित्येव यो वेद्य इत्याद्यागमैश्चात्मनः कर्तृत्वाद्युपेतस्यैव प्रमितत्वात् । अथवाऽर्थापत्तेराभासत्वेनानाक्षिप्तबन्ध-मिथ्यात्वं वर्णयत्परेषां भाष्यमनुपयुक्तमित्युक्तम् । अयुक्तमपि प्रत्यक्षादिविरुद्धार्थप्रतिपादक-त्वादित्यनेनोच्यते । ननु प्रत्यक्षं बन्धस्वरूपमात्रं गोचरयति न तु तस्मिन् मिथ्यात्वाभावम् । अतोऽर्थापत्तेर्भाष्यकारीयस्य वा तन्मिथ्यात्वव्युत्पादनस्य कथं प्रत्यक्षविरोधः । नैवम् । प्रत्यक्षं खलु बन्धं गोचरयदस्तीति नास्तीति वा गोचरयेत् । उभयोदासीनस्य ज्ञानस्यादर्शनात् । आद्ये-ऽस्तित्वं मिथ्यात्वाभावश्चेत्यनर्थान्तरमिति कथं न प्रत्यक्षविरोधः । द्वितीयेऽनुभवविरोधस्तद्-व्युत्पादनवैयर्थ्यप्रसङ्गश्च ।

वा०—ननु नास्य दूषणान्तरपरत्वं प्रतीयते प्रत्युतोक्तरीत्या वैयर्थ्यमेवेत्यतोऽपिशब्दार्थप्रदर्शन-पूर्वं योग्यक्रियासंबन्धं प्रदर्शयति ॥ **न केवलमिति** ॥ नन्वर्थासिद्धिमात्रेणार्थापत्तिनिरासात्प्रत्यक्षविरोध-कथनमधिकमसङ्गतं चेत्यतो नात्र भाष्यकारस्यासिद्धिमात्रे तात्पर्यम् । वक्ष्यमाणानुपपत्तेः । प्रमाणा-विरोधस्य चोपपत्तेस्तत्रैव तात्पर्यं युक्तमित्यभिप्रेत्य परमुखेनैव तदुभयं साधयितुं शङ्कासमाधानपूर्वं प्रत्यक्ष-विरोधादिति हेतुं सङ्गमयति ॥ **नन्वित्यादिना** ॥ ननु सहकारिसामर्थ्यादप्यर्थव्यवस्थापकत्वात्कथमेत-दित्यत एवकारव्यावर्त्यमाह ॥ **न पुनरिति** ॥ सामान्यन्यायं प्रकृते सङ्गमयितुमाह ॥ **अत इति** ॥ गूढाभिसन्धिरसिद्धेर्भूषणत्वेऽतिप्रसङ्गं शङ्कते ॥ **एवं तर्हीति** ॥ प्रत्यक्षस्यैव विशिष्यग्रहणे प्रयोजनमनुप-लभमानोऽपिशब्दस्य प्रयोजनान्तरं दर्शयति ॥ **प्रत्यक्षेति** ॥ अस्याप्यर्थापत्तिदूषणत्वेऽर्थापत्तेराभासत्वात् सूत्रानाक्षिप्तबन्धमिथ्यात्वप्रतिपादकत्वात्परभाष्येऽनुपयुक्ततामात्रप्रतिपादकत्वं ततोवरं परभाष्यायुक्तता-प्रतिपादकत्वमित्यभिप्रेत्य तत्परतया भाष्यं योजयति ॥ **अथवेति** ॥ यद्यप्यर्थापत्तिप्रमेयस्य बन्धमिथ्या-त्वस्य प्रमाणविरोधे प्रतिपादिते बन्धमिथ्यात्वप्रतिपादकपरभाष्यस्यायुक्तता सिद्ध्यति तथाऽपि साक्षात्त-ल्लाभायेदमिति द्रष्टव्यम् । भाष्ये विरोधपदसूचितपरस्पराभावविषयकत्वमुपपादयितुं शङ्कते ॥ **नन्विति** ॥

स०— मिथ्यात्वसिद्धिः किमर्थापत्तिप्रवृत्तेः प्राङ्नास्तीत्युच्यते पश्चाद्वा । नाद्य इत्याह ॥ **प्रमाणं हीति** ॥ प्रमाणसंप्लवेऽपि निरपेक्षप्रवृत्तिरिति दर्शयितुमपेक्षत इत्युक्तम् । **तथात्वे** प्रागर्थसिद्ध्य-पेक्षत्वे । प्रमाणाकाङ्क्षाया एवानुदयादिति भावः । किमर्थापत्तेरेवायं नियमः प्रमाणमात्रस्य वा । नाद्यः ।

विनिगमकाभावात् । द्वितीयेऽतिप्रसङ्गमाह ॥ **पूर्वेति** ॥ न केवलं प्रागर्थसिद्धिर्दूषणं किन्तर्हीत्यत आह ॥ **अत इति** ॥ द्वितीयं प्रत्याह ॥ **प्रवृत्तायां त्विति** ॥ प्रागर्थसिद्धेर्दूषणत्वेऽतिप्रसङ्गं शङ्कते ॥ **एवं तर्हीति** ॥ नार्थसिद्धिमात्रं प्रमाणप्रवृत्तौ कारणं किन्तु प्रमाणान्तराविरोधादि च । न चेह तदस्तीत्याह ॥ **न वैषम्यादिति** ॥ **अथवेति** ॥ ग्रन्थदोषस्यैव प्राधान्येनाभिधानम् । प्रमेयदोषस्तदुपयोगीत्यर्थः । ग्रन्थार्थप्राधान्यरूपपक्षद्वयेऽपि नायं दोष इति शङ्कते ॥ **नन्विति** ॥ **तद्व्युत्पादनमिति** ॥ असत्त्वलक्षणमिथ्यात्वस्य प्रत्यक्षसिद्धत्वाभ्युपगमे तादृशमिथ्यात्वव्युत्पादनं शास्त्रे न स्यादित्यर्थः ॥

प० —**दूषणान्तरश्चेति** ॥ बाधितविषयत्वं चेत्यर्थः ॥ **इति संबन्ध इति** ॥ अपिपदस्य नञश्चाध्याहृतास्तीतिपदेनान्वय इत्यर्थः । परमुखेनैव समाधिं वाचयितुं प्रतिबन्दीमाशङ्कते ॥ **एवंतर्हि-परिचितचरपुरुषस्येति** ॥ रसायनमौषधविशेषः । योगस्य ऋद्धिर्योगर्द्धिः । योगसमृद्धिरित्यर्थः ॥ **नास्त्येवेति** ॥ असिद्धिर्नास्त्येवेत्यर्थः । परेणैव समाधिं वाचयति ॥ **वैषम्यादित्यादिना** । तत्सममस्माकमित्याह ॥ **सत्यं वयमपीत्यादिना** ॥ अनुक्तसमुच्चयेऽपिपदमित्युपेत्याह ॥ **प्रत्यक्षविरोधतोपीतिवेति** ॥ तर्हि प्रमाणान्तरमित्यतोऽनुमानागमावित्याह ॥ **चेष्टादीति** ॥ हिताहितप्राप्तिपरिहारानुकूलपरिस्पन्दविशेषश्चेष्टा । चक्षुरादीन्द्रियाणि श्वासवायवश्चादिपदार्थाः ॥ 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोरि'त्यादि तत्वनिर्णयोक्तागमैरित्यर्थः ॥ **अनेनेति** ॥ मिथ्यात्वमपीत्यादिनेत्यर्थः ॥ **भाष्यकारीयस्येति** ॥ परभाष्यकारीयस्येत्यर्थः ॥ **तद्व्युत्पादनेति** ॥ बन्धमिथ्यात्वव्युत्पादनवैयर्थ्यमित्यर्थः । प्रत्यक्षेणैव बन्धगतनास्तित्वग्रहणादिति भावः ॥

या० — **परिचितपुरुषस्येति** ॥ रसायनशून्यत्वेनायोगित्वेन च निश्चितपुरुषस्येत्यर्थः । न पुनः प्रमाणविरुद्धमित्येतदुपपादयितुमाह ॥ **एषा खल्वित्यादिना** ॥ उक्तानां सामग्रीत्वमुपपादयति ॥ **अत एवेति** ॥ अन्यथैतेषां दूषणता न स्यादिति भावः ॥ **चेष्टादिलिङ्गैरिति** ॥ चेष्टादिलिङ्गैस्तदनुकूलयत्नवानात्माऽनुमीयते । यत्नवत्त्वमेव च कर्तृत्वमिति भावः । 'अहमित्येव यो वेद्य' इत्यत्र जीवस्य बन्धमोक्षपात्रत्वोक्त्या प्राणधारणार्थकजीवशब्दवाच्यत्वोक्त्या वा कर्तृत्वं लभ्यत इत्यवगन्तव्यम् । आदिपदेन 'यत्कर्म कुरुते तदभिसम्पद्यत' इत्याद्यागमसंग्रहः ॥ **अनुभवविरोध इति** ॥ सुखादिकमस्तीति जानामीति साक्ष्यनुभवविरोध इत्यर्थः ॥ **तद्व्युत्पादनेति** ॥ नास्तितायाः प्रत्यक्षसिद्धत्वे तदपरपर्यायमिथ्यात्वस्य व्युत्पादनं भाष्ये महता प्रबन्धेन क्रियमाणं व्यर्थं स्यात् । न हि प्रत्यक्षसिद्धोऽर्थो व्युत्पादनमपेक्षत इति भावः ॥

श्री० — **नास्त्यपीति** ॥ बन्धमिथ्यात्वमसिद्धमित्यर्थः ॥ प्रत्यक्षविरोधत इति मूलमवतारयितुं
ङ्कते ॥ **नन्विति** ॥ **तथात्व इति** ॥ प्रमाणमूलभूताया अर्थसिद्धेः प्रागेवोक्तत्वादिति भावः ॥
थात्वेनेति ॥ प्रमाणस्य प्रागर्थसिद्धिसापेक्षत्वेन प्रागर्थसिद्धिरपि प्रमाणाधीना तत्प्रमाणमपि प्रागर्थ-
सिद्धिसापेक्षं साऽपि पुनः प्रमाणाधीनेत्यनवस्था स्यादित्यर्थः ॥ **प्रागिति** ॥ अर्थापत्तिरूपप्रमाणप्रवृत्तेः
ागित्यर्थः । अत्र सिद्धान्ती प्रतिबन्दीमुत्तरमाशङ्कते ॥ **तदसिद्धिरपीति** ॥ तयोराक्षेप्ययोर्योगर्द्धि-
ायनयोरसिद्धिरित्यर्थः ॥ **नास्तीति** ॥ असिद्धिर्नास्त्येवेति संबन्धः । पूर्वपक्षी वैषम्यमुत्तरमाह ॥
षम्यादिति ॥ **परिचितचर इति** ॥ भूतपूर्वेच चडिति सूत्रात् रसायनादिशून्यत्वेन पूर्वं परिचित
त्यर्थः । ननु प्रमाणबाधितस्याप्यर्थापत्तिरूपप्रमाणसाध्यत्वं किं न स्यादित्यत आह ॥ **असिद्धमिति** ॥
माणान्तरेति ॥ अनुमानागमरूपप्रमाणान्तरेत्यर्थः ॥ **उभयोदासीनस्येति** ॥ विधिनिषेधाववधूयेत्यर्थः ॥

च० — **परिचितेति** ॥ पर्युपसृष्टस्य चिनोतेः कर्मसाधननिष्ठायां निष्पन्नः योगित्वरसायन-
हित्योपरक्तनिश्चयकर्मतामाचष्ट इति तादृग्निश्चयविषयस्येत्यर्थः । **योगर्धिं** तप समृद्धिम् । न तु
माणविरुद्धमित्यंशं प्रतिपिपादयिषति ॥ **एषा खल्विति** ॥ **तद्व्युत्पादनवैयर्थ्येति** ॥ प्रत्यक्षेणैव
न्धनास्तित्वात्मकमिथ्यात्वस्यावगाढतया तादृशार्थे शास्त्रीयव्युत्पादनानवश्यंभावेनादिभाष्ये तदध्यस्तता-
ुत्पादनं यत्तदनर्थकमापद्येतेति भावः ।

अनु० — **मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेत् ।**

सु० — **स्यादेतदेवम् । यदीदं प्रत्यक्षं तत्त्वावेदकं भवेत् । न चैतदस्ति । समस्तो-
ध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमेवाद्वितीयंखल्वात्मतत्त्वं नेहनानाऽस्ति किञ्च-
त्यादिश्रुतिस्मृतीतिहासपुराणेषु गीयते । न चैतान्युपक्रमादिवशादीदृगात्मतत्त्वमभिदधति
त्पराणि सन्ति शक्यानि केनाप्युपचरितार्थानि कर्तुम् । तद्विरुद्धं च प्रादेशिकमनेकविध-
ःखादिप्रपञ्चोपप्लुतमात्मानमादर्शयत्प्रत्यक्षं कथमुपप्लवो न भवेत् । येयं चैतन्यस्य स्वत एव
श्रितलक्षणब्रह्मरूपतावभासं प्रतिबध्य जीवत्वापादिकाविद्याकर्मपूर्वप्रज्ञासंस्काररचित्रभित्तिरनादि-
निर्वाच्याविद्या । तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञानक्रियाशक्तिद्वयाश्रयः
र्तृत्वभोक्तृत्वैकाधारः कूटस्थचैतन्यसंवलनमच्छातज्योतिरपरोक्षोऽहङ्कारः । स च**

गीयते। परिस्पन्दशक्त्या च प्राण इति। तदुपरागनिमित्तं मिथ्यैवात्मनः कर्तृत्वादिकं प्रतिभाति। स्फटिकमणेरिवोपधाननिमित्तो लोहितिमा। तदेवमहं कर्ता भोक्ता सुखी दुःखीत्यादिप्रत्यक्षे श्रुत्यादिविरोधेन पूतिकूष्माण्डीकृते बन्धमिथ्यात्वव्युत्पादनमुपपन्नतरमित्यत आह ॥ मिथ्यात्वं यदीति ॥ भवेदेतन्नेह नानेत्यादिवाक्यविरोधेन प्रत्यक्षमाभासीकृत्य बन्धमिथ्यात्ववर्णनम्। बालजनमनोहरा चैषा प्रक्रिया। यदि तद्वाक्यमुक्तविधात्मतत्त्वपरं स्यात्। न चैवम्। तथाहि। किमापाततः प्रतिपन्न एव वाक्यार्थः। अथवोपक्रमोपसंहाराभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इत्याद्युक्तलिङ्गानुगुणस्तदविरुद्धश्च। नाद्यः। मीमांसावैयर्थ्यापत्तेः। द्वितीये तु कथमिदं वाक्यमुक्तलक्षणात्मतत्त्वपरं स्यात्। उपक्रमादिलिङ्गेषु बलवत्योपपत्त्या विरुद्धत्वात्। अत एव ह्यसतः सदजायतेत्यादिवाक्यप्रपतिन्नोऽर्थः कुतस्तु खलु सोम्यैवं स्यात्कथमसतः सज्जायेतेत्युपपत्तिविरुद्धस्त्यज्यते। वक्ष्यति च भगवान्सूत्रकारोऽभिमान्यधिकरणे मृदब्रवीदित्यादिवाक्यात्प्रतीतमप्यर्थमुपपत्तिविरुद्धं परित्यज्यार्थान्तरम्। कथमत्रोपपत्तिविरोध इति चेत्। एवं यदि दुःखादेरात्मातिरिक्तस्य समस्तस्य मिथ्यात्वं श्रुत्यादिबलेन स्यात्तर्हि तस्य श्रुत्यादिवाक्यस्य तावन्मिथ्यात्वं भवेत्। आत्मातिरिक्तत्वात्। अन्यथा स्वस्मिन्नेवास्य प्रामाण्यं प्रतिहतमिति न कञ्चिदर्थं प्रतिपादयेत्। यदि चेदं वाक्यं मिथ्या स्यात्तथाऽपि न दुःखादेर्मिथ्यात्वं प्रतिपादयेत्। मिथ्याभूतस्य वन्ध्यासुतवचसः साधकत्वादर्शनात्। तदेवमस्य वाक्यस्य मिथ्यात्वामिथ्यात्वयोर्बन्धमिथ्यात्वप्रतिपादनासामर्थ्यात्प्रत्यक्षबाधकत्वानुपपत्तेर्न दुःखादिबन्धमिथ्यात्वसिद्धिरिति।

वा०—नन्वनेन वाक्येन प्रत्यक्षविरोधेन मिथ्यात्वे निरस्ते मिथ्यात्वं यदीत्युत्तरवाक्ये तत्प्रसज्योपपत्तिविरोधेन तन्निराकरणमुक्तं बलाभावेन मिथ्यात्वोज्जीवनायोगात्। न च श्रुत्यादिकमेव तदुज्जीवकमिति वाच्यम्। श्रुत्यादेः प्रत्यक्षोपमर्दकत्वासम्भवात्। न ह्यागमाः सहस्रं घटं पटयितुमीशते। प्रत्युत ज्येष्ठप्रमाणप्रत्यक्षविरोधेन श्रुत्यादेरुपचरितार्थत्वमेव युक्तमिति नोत्तरवाक्यं सङ्गतमित्यतो भामतीमतेन प्राप्तशङ्कापरिहारकतया तत्सङ्गमयति ॥ **स्यादेतदिति** ॥ अत्र शक्रेणापीति परेण व्यवहृतेऽपि देवताद्रोहजनितं पापं तस्यैवास्त्विति भावेन तत्तात्पर्यार्थानुवादोऽयं केनापीति। ज्येष्ठत्वंचानपेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे। रजतज्ञानस्य ज्यायसः कनीयसा शुक्तिज्ञानेन बाधदर्शनादिति भावः। अत्र समस्तेत्यादेः प्रादेशिकमित्यनन्तानन्देत्यादेरनेकविधदुःखत्युदासीनमेकमद्वितीयमित्यस्यादिपदसङ्गृहीतकर्तृत्वभोक्तृत्वनानात्वसद्वितीयत्वं प्रतियोगितयोपात्तम्। उपप्लवो विपर्यासः। ननु नायं स्मर्यमाणारोपः।

पूर्वानुभूतमात्रविषयकत्वाभावात् । नापि गृह्यमाणारोपो ग्रहणोपाधेरदर्शनादित्यतः पञ्चपादिकोक्तरीत्या ग्रहणोपाधिमुपपाद्य द्वितीयं कक्षीकरोति ॥ **येयमित्यादिना** ॥ यद्वा न प्रत्यक्षं भ्रमः । श्रौतबाधेऽप्यनिवृत्तेरित्यतः सोपाधिकभ्रमत्वादनिवृत्तिरित्यभिप्रेत्य सोपाधिकत्वमुपपादयति ॥ **येयमित्यादिना** ॥ अत्र बुद्ध्युपरागनिमित्तमात्मनः कर्तृत्वादिकं मिथ्यैव प्रतिभातीत्येतावत्येवानुवदितव्ये बुद्धेरहमर्थत्वानुवदनमहमर्थस्यानात्मत्वनिरासोपक्षेपाय । अत्र च ननु चिदात्मन एवाहमर्थत्वात्कथमनात्मधर्माणामात्मन्यारोप इत्यतश्चिदात्मनो बुद्ध्या निष्कृष्येति । वेदान्तवादिभिरित्यनेन बुद्धेर्गुणेनात्मगुणेन चेव ह्यारोपमात्रा ह्यपरोपिद्रष्टुर्बुद्धिश्च न विचेष्टतीत्यादेः परिमाणक्रियावत्त्वादिनाऽऽत्मातिरिक्तबुद्धिरूपद्रव्यसाधकतया परोपन्यस्तप्रमाणस्य सङ्ग्रहः । नन्वात्मन्यहङ्कारस्यानादित्वेऽविद्यातत्सम्बन्धातिरिक्तानादित्वेनानुच्छेद्यत्वापत्त्या सादित्वेऽपि निरुपादानत्वे भावकार्यत्वानुपपत्त्या सोपादानत्वेऽपि सर्वसामर्थ्यविधुरासत्कार्यत्वानुपपत्त्या सदुपादनकत्वे च कार्यस्यापि सत्त्वापत्त्या नात्माऽन्यत्वमुपपन्नमित्यतोऽनिर्वाच्याविद्योपादानकत्वान्नानुपपत्तिरित्याशयेन येयमित्यादि तस्या इत्यन्तमुपादानकीर्तनम् । तत्र जीवब्रह्मणोरेवान्यत्वे कर्तृत्वाद्यध्यासवर्णनमनुपपन्नमित्यविद्याकार्यप्रदर्शनम् । स्वत एवेति स्थितलक्षणा सिद्धरूपा या ब्रह्मस्वरूपता तदवभासमित्यर्थः । अविद्याया एकरूपत्वान्नविचित्रकार्योत्पादकत्वमित्यत उक्तेऽविद्याकर्मपूर्वप्रज्ञासंस्कारचित्रभित्तिरित्यत्राविद्यायाः स्वभित्तित्वासम्भवादविद्याशब्दो भ्रान्तिपरः । पूर्वप्रज्ञा पूर्वानुभवो भ्रान्तिसम्यगनुभवभेदेन पृथङ्निर्देशः । तथा चाविद्याकर्मपूर्वप्रज्ञानां संस्कार एव चित्रं तस्य भित्तिरित्यर्थः । उपादानीभूताविद्याया अपि सादित्वे तदुपादानपरम्परयाऽनवस्थेत्यत उक्तमनादिरिति । अनिमित्तककार्यानुपपत्त्या परिच्छिन्नज्ञानतयाऽहङ्कारप्रेरकत्वानुपपत्त्या जीवाधिष्ठातृकत्वासम्भवान्निर्धर्मकतया ब्रह्माधिष्ठातृकत्वासम्भवाच्च निमित्तासम्भव इत्यतो वस्तुतो निर्धर्मिकत्वेऽपि काल्पनिकधर्मवत्तयेश्वरस्याधिष्ठातृत्वोपपत्तिरिति निमित्तकथनं तस्याः परमेश्वरेति । स्वरूपमेव तस्य न निष्कृष्टमित्यतस्तत्स्वरूपकथनं विज्ञानेति । कर्तृत्वादेरात्मधर्मत्वान्न तत्कार्यत्वमित्यतस्तस्यैव धर्म इत्याह ॥ **कर्तृत्वेति** ॥ अनुपलम्भेन तत्र प्रत्यक्षाभावकौटस्थ्यविरोधेन साक्षिणोऽप्यसम्भवान्न तत्र प्रमाणमित्यतः साक्षिचैतन्यस्य कूटस्थत्वेऽपि तस्मिन्नध्यासलक्षणसंवलनेन परिनिष्पन्नप्रकाश इति प्रमाणकथनं कूटस्थेति । नित्यानुमेयत्वव्यावृत्तयेऽपरोक्ष इति । यदर्थमेतावदुक्तं तदाह ॥ **तदुपरागेति** ॥ अहङ्कारोपरागात्तन्निष्ठकर्तृत्वादेरात्मन्यारोपमात्रं वा रजतादिवन्मिथ्याभूतकर्तृत्वादेरात्मन्युत्पत्तिर्वास्तु । न चाद्येऽहङ्कारेऽसतः कर्तृत्वादेरारोपे व्यधिकरणप्रकारत्वाद्यन्यथाख्यात्यापत्तिः । कर्तृत्वादिविशिष्टाहङ्कारस्यात्मन्यारोपाभ्युपगमेनान्यत्र सतोऽन्यत्रारोपानभ्युपगमेनान्यथाख्यात्यनापत्तेः । न च द्वितीये कर्तृद्वयापत्तिः । आत्माहङ्कारयोस्तादात्म्याध्यासाभ्युपगमेन तदनापत्तेरिति विवरणाभिप्रायः । प्रकृतेन सङ्गमयति ॥ **तदेवमिति** ॥ पूतिशब्देन दुर्गन्ध्य-

भिधीयते । ततश्च दुर्गन्धयुक्तकूष्माण्डफलमिव कृत इत्यर्थः । मिथ्यात्वंयदीति मूलं न साक्षात्प्रकृत सङ्गतम् । अतोऽभिप्रेतार्थपूरणेन तत्सङ्गमयति ॥ **भवेदेतदिति** ॥ ननु प्रत्यक्षमप्याभासीकृत्य प्रवर्तमान श्रुत्यादेः कथमुपपत्तिविरोधमात्राद्भयमित्यत उपपत्तिविरोधकथनेन प्रबलेनाप्यागमेन तदविरुद्धार्थ एव प्रतिपादनीयोऽन्यथा मीमांसावैयर्थ्यप्रसङ्ग इत्यस्य तात्पर्यलिङ्गेष्वपि प्रबलयोपपत्त्या विरोधकथनेन च परोक्तोपक्रमादीनां तद्विरोधस्य च भाष्यकारेण सूचनान्नानुपपत्तिरित्याशयेन भाष्याभिप्रेतप्रमेयं दर्शयति । **तथा हीत्यादिना** ॥ एवमुपपत्तिविरोधप्राबल्यमुपपाद्य भाष्यमुत्थापयितुं शङ्कते ॥ **कथमिति** ॥ ननु दुःखादेर्मिथ्यात्वेऽपि कुतस्तद्वाक्यमिथ्यात्वं व्याप्त्यभावादित्यतो विशेषेण सामान्यव्याप्तिमभिप्रेत्य सर्वस्येति वक्तव्ये दुःखादेरिति वचनमात्मातिरिक्तग्रहणायेति तत्सूचितमविशेषं वक्तुमादिपदेनात्माऽन्यस्य सर्वस्य ग्राह्यतां वक्तुं च दुःखादेरित्यनुवादेनात्मातिरिक्तस्येति व्याख्यानम् । अग्रत इत्यस्यार्थकथनं तावदिति । अप्रयोजकत्वं परिहरति ॥ **अन्यथेति** ॥ इष्टापत्तिपरिहाराय मिथ्यायाः साधकत्वं चेत्युत्तरवाक्यबल-लब्धमनिष्टं सोदाहरणमाह ॥ **यदि चेति** ॥

स०—ननु कर्तृत्वभोक्तृत्वशून्यत्वे तदवभासः कथमिति चेदहङ्कारोपरागादिति ब्रूमः । तर्ह्ययमहङ्कारः किमुपादानक इत्यत आह ॥ **येयमिति** ॥ येयमित्याद्युपादानकीर्तनम् । अविद्याया एकरूपत्वान्न विचित्रकार्योत्पादकत्वमित्यत उक्तम् ॥ **अविद्याकर्मेति** ॥ भ्रान्तिकर्मपूर्वानुभवतत्संस्कारा इत्यर्थः । त एव चित्रं तस्य भित्तिरिवेति विग्रहः । परमेश्वराधिष्ठितेति निमित्तकारणनिर्देशः ॥ **विज्ञानेति** । स्वरूपप्रदर्शनम् ॥ **तदेवमिति** ॥ प्रकृतोपयोगोक्तिः । पूतिशब्देन दुर्गन्धोऽभिधीयते ॥

प०—**अभिदधतीति** ॥ शत्रन्तं । अभिदधानानीत्यर्थः । संतीत्यपि शत्रन्तं । तात्पर्यवत्त्वेन विद्यमानानीत्यर्थः । प्रादेशिकं प्रदेशस्थं अल्पपरिमाणमिति यावत् । अहमिहैवास्मि सदने जानान इति प्रतीतेरुदयात् । उपप्लवोऽप्रमाणं । न केवलं श्रुत्यादिविरोधेन कर्तृत्वादिविषयं प्रत्यक्षमतत्वावेदकं । अपि तु वस्तुस्थितिपर्यालोचनयाऽपीत्याह॥**येयंचैतन्यस्येत्यादिना**॥ येयमित्यादिकं वक्ष्यमाणाहंकाररूपकार्यस्योपादानसङ्कीर्तनम् । स्वत एव स्वभावत एव स्थितं यल्लक्षणमानन्दादि । या च स्वत एव स्थिता ब्रह्मरूपता तदुभयावभासं प्रतिरुध्येत्यर्थः । जीवेभ्यो ब्रह्मान्यदिति मतमपाकर्तुमेतदुक्तम् । जीवत्वापादिकेत्यस्यानादिरनिर्वाच्याविद्येत्यनेनान्वयः । अविद्या भ्रान्तिः । तां विशिनष्टि ॥ **विद्येति** । विद्या वृत्तिरूपं ज्ञानम् । कर्म पुण्यपापलक्षणं । पूर्वप्रज्ञा स्मृतिः । संस्कारो वासनापरपर्यायः । एतेषां विद्यादीनां भित्तिरिव भित्तिः । कारणमिति वार्थः ॥ **पूतिकूश्मांडीकृते** ॥ पूतिकूष्माण्डवत्प्रकृतेऽप्रमाणीकृत इति यावत् । उपपत्तिविहीनस्य वाक्यस्यार्थो न गम्यत इति ज्ञानपादीयानुव्याख्यानानुरोधेन मूलवाक्यं योज-

यितुमुपोद्धातमाह ॥ **भवेदेतदित्यादिना** ॥ एवमितिपर्यन्तेन ॥ **बालजनेति** ॥ अज्ञजनमनोहरा । एषा ॥ येयं चैतन्यस्येत्यादिनोक्ता । प्रक्रिया च भवेदित्यन्वयः ॥ **तद्वाक्यमिति** ॥ एकवचनं समुदायाभिप्रायं मूलवाक्यानुरोधेन कृतमिति ध्येयम् । तेन श्रुतिस्मृतीतिहासपुराणेष्वित्युपक्रमाविरोधः । इत्याद्युक्तेत्यादिपदेन श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा । पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णय इत्युक्तदिशेति ग्राह्यम् ॥ **मीमांसेति** ॥ 'आकाशस्तल्लिङ्गादित्यादिना हि आकाश इति होवाचेत्यादिवाक्ये प्रतीतार्थत्यागेनार्थान्तरमुपादीयते । यद्यापाततः प्रतिपन्न एव श्रुत्यर्थस्तर्हि श्रुत्यर्थनिर्णायकन्यायविचाररूपमीमांसारंभ एव न स्यादित्यर्थः ॥ **उपपत्तिविरुद्ध इति** ॥ निःस्वरूपस्यासतः पूर्ववृत्तित्वरूपकारणत्वानुपपत्तिरूपोपपत्तिविरुद्धस्त्यज्यत इत्यर्थः ॥ **उपपत्तिविरुद्धमिति** ॥ मृत्तु वक्री जडत्वादित्याद्युपपत्तिविरुद्धं मृत्पदस्य जडरूपमर्थं परित्यज्य चेतनरूपमर्थान्तरं वक्ष्यतीत्यर्थः ॥ **कथमत्रेति** ॥ 'नेहनाने'त्यादिवाक्ये । मूलं योजयति ॥ **यदीत्यादिना** ॥ तदिति व्यस्तं समस्तं चेत्युपेत्य वा तदिति व्यस्तमेवाव्ययमित्युपेत्यार्थद्वयमाह ॥ **तत्तर्हि तस्येति** ॥ अस्तु वाक्यस्य मिथ्यात्वं किं नः छिन्नमित्यतस्तदेव वाक्यं यदीत्यस्य तद्वाक्यस्येत्यत्रान्वयं पूर्वस्मादनुवृत्तनञो दुःखादेर्न मिथ्यात्वं भवेदित्यन्वयं चोपेत्य प्रकारान्तरेण व्याचष्टे ॥ **यदि चेदं वाक्यमिति** ॥ मिथ्यात्वं दुःखादेर्न भवेदित्यस्य फलितार्थः न दुःखादेर्मिथ्यात्वं प्रतिपादयेदिति ॥ **सिद्धिरितीति**शब्दो मूलव्याख्यानेन पूर्वोक्तशङ्कोत्तरसमाप्तौ ॥

या० —**स्यादेतदिति** ॥ प्रत्यक्षस्य दोपशङ्काकलङ्कितस्य न निर्दोषश्रुतिसिद्धमिथ्यात्वप्रतिरोधकत्वमिति शङ्काग्रन्थार्थः । न केवलं श्रुत्यादिविरोधेन कर्तृत्वादिविषयकं प्रत्यक्षमतत्त्वावेदकमपि तु वस्तुस्थितिपर्यालोचनयाऽपीत्याह ॥ **येयं चैतन्यस्येत्यादिना** ॥ येयमित्यादिकं वक्ष्यमाणाहङ्काररूपकार्यस्योपादानसङ्कीर्तनम् । स्वत एव स्वभावत एव स्थितम् । यल्लक्षणमानन्दादि या च स्वत एव स्थिता ब्रह्मरूपता तदुभयावभासं प्रतिबद्धचेत्यर्थः । जीवेभ्यो ब्रह्मान्यदिति मतमपाकर्तुमेतदुक्तमिति ज्ञातव्यम् । अविद्या भ्रान्तिः । पूर्वप्रज्ञा पूर्वानुभवः । भ्रान्तिश्च कर्म च पूर्वानुभवश्चेति तथोक्तास्तेषां संस्कार एव चित्रं तस्य भित्तिरिति विग्रहः । तत्र च भ्रान्तिसम्यगनुभवभेदमङ्गीकृत्य पृथङ्निर्देश इति ज्ञातव्यम् । अविद्याया एकरूपत्वान्न विचित्रकार्योत्पादकत्वमिति शङ्कां निराकर्तुमेतदुक्तम् । परमेश्वरेति निमित्तप्रदर्शनम् । विज्ञानेति स्वरूपप्रदर्शनार्थम् । कर्तृत्वभोक्तृत्वेति कार्यप्रदर्शनम् । कूटस्थचैतन्येति प्रमाणोपन्यासः । यद्यपि चैतन्यमविकारं तथाऽपि तस्मिन्नैक्याध्यासलक्षणेन संवलनेन परिनिष्पन्नप्रकाश इत्यर्थः । नित्यानुमेयत्वं व्यावर्तयति ॥ **अपरोक्षेति** ॥ शक्तिद्वयोपेतमहङ्कारस्वरूपमित्युक्तम् । तत्प्रपञ्चयति ॥ **स चेति** ॥ तदुपरागेति फलप्रदर्शनम् । तदेवमिति प्रकृतोपयोगोक्तिः । पूतिशब्देन दुर्गन्ध्यमिधीयते पूतिगन्धस्तु दुर्गन्ध इत्यभिधानात् । अर्थान्तरमभिमानिदेवतारूपम् ।

मित्यर्थः । उपप्लुतं उपद्रुतम् । उपप्लवो भ्रमरूपः । अहङ्कारगतमेव कर्तृत्वं भोक्तृत्वं च तदुपरागाज्जीवे मिथ्याभूतमेव प्रतीयत इत्याह ॥ **येयमित्यादिना** ॥ परिस्पन्दशक्त्या । ननु श्रुतिप्रतीतार्थस्य कथमुपपत्तिविरोधेन त्यागोऽदृष्टत्वात् सूत्रकारासम्मतत्वाच्चेत्यत आह ॥ **अत एवेति** ॥ बलवदुपपत्तिविरुद्धत्वादेवेत्यर्थः ।

च०— दोषजन्यत्वसन्देहाहिताप्रामाण्यशङ्कास्कन्दितप्रत्यक्षं निर्दोषत्वायत्त तच्छङ्कानास्कन्दितताकश्रुतिप्रत्यापितमिथ्यात्वप्रतिसन्धानं कथं भवेदित्याशयेन शङ्कते ॥ **स्यादेतदिति** ॥ स्वत एव स्थितेति लक्षणब्रह्मरूपतयोर्विशेषणम् । लक्षणं परमानन्दादिकम् । उभयावभासं प्रतिबध्येत्यर्थः । अविद्याशब्देन भ्रान्तिरुपादीयते । पूर्वप्रज्ञापदेन पूर्वानुभवः । कृतद्वन्द्वप्रज्ञान्तेन षष्ठ्यन्तेन संस्कारपदस्य समासः । तादृशसंस्कारा एव चित्रं तस्य भित्तिरिवेतिविग्रहः । एकरूपाया अप्यविद्यायाः विचित्रनानाकार्यनिर्वाहकता सङ्गच्छत इति ध्वनयितुमेतदुपात्तम् । शक्तिद्वयाश्रयः विज्ञानशक्तिक्रियाशक्त्याश्रयः पूतिशब्दो दुर्गन्धिवचनः अर्थान्तरमभिमानिदेवतारूपम् ।

सु०— तत्त्वविदो वदन्ति । सर्वोऽपि हि बन्धो बुद्धीन्द्रियशरीरविषयतद्धर्मलक्षणोऽस्माभिरप्यात्मन्यारोपित एवेत्यङ्गीक्रियते । यथोक्तं भाष्यकृता । प्रमादात्मकत्वाद्बन्धस्येति । अतः किन्निबन्धनो बन्धमिथ्यात्वनिरासे निर्बन्धः । सत्यम् । तथाऽप्यस्त्यत्र दर्शनभेदः । एवं खल्वध्यात्मविदां दर्शनम् । क्रियाज्ञाने प्रति कारकान्तराप्रयोज्यत्वादिलक्षणं कर्तृत्वं भोक्तृत्वं च परमेश्वरायत्तमात्मनि स्वतो विद्यत एव । क्रियावेशादिरूपाया विक्रियाया विनाशाद्यहेतुत्वस्य वक्ष्यमाणत्वात् । तस्यापरायत्तत्वावभासोऽविद्यानिमित्तको भ्रमः । अविद्यादिकं च स्वरूपेणात्मसंबन्धित्वेन च सदेव । एवं बुद्धीन्द्रियशरीरविषयाः स्वरूपसन्त एवेश्वरवशा अप्यविद्यादिवशादात्मीयतयाऽध्यस्यन्ते । परायत्तात्मीयताऽप्यस्त्येव । तांश्चात्मनो विविक्तानपि विस्पष्टतयाऽनुपलभमानस्तद्धर्मान्दुःखादींस्तत्यानेवात्मीयत्वेन पश्यंस्तत्कृते नीचोच्चत्वलक्षणे विकृती सत्ये एव प्रतिपद्यते । ततो रागद्वेषाभ्यां प्रयुक्तस्तद्विनिवृत्तये यत्करोति तदप्येतादृगेवातनोतीत्यनेकयोनिषु बम्भ्रमीति । न क्वाप्यात्यन्तिकं तदुपशमं लभते विना परमपुरुषाराधनादिति । मायावादिनस्तु दुःखादिकं स्वरूपेणापि मिथ्येति मन्यन्ते । यदवोचत् । सत्यानृते मिथुनीकृत्येति । अतस्तन्निराकरणनिर्बन्धो युक्त एवेत्येतत्परिभावयितुं

बन्धमिथ्यात्वमिति सम्मुग्धे प्रस्तुतेऽपि दुःखादेरिति निष्कृष्योक्तम् । स्वातन्त्र्यादेर्नान्यो
ऽतोऽस्तिकर्तेत्यादिश्रुतिबाधितत्वात् । न हि सर्वमिथ्यात्वश्रुतेरिवास्याः कश्चिद्विरोधोऽस्ति
वक्ष्यति चैतत्तत्र तत्र सूत्रकारः ।

वा०— ननु बन्धमिथ्यात्वमिति पूर्ववाक्ये बन्धशब्देन यदुच्यते तावतोऽप्यत्र दुःखा
दिशब्देन ग्रहणं तद्विशेषस्य वा । नाद्यः । बन्धशब्देन प्रस्तुतस्य शब्दान्तरेणोपादाने निमित्ता
भावात् । द्वितीयेऽपि युक्तिर्बन्धविशेषमिथ्यात्वनिरास एवेति तदुपपादनमुत दुःखादिरूपबन्ध
विशेषस्यैव सत्यत्वादन्यस्यच मिथ्यात्वाद्बन्धशब्दोक्तस्य निष्कर्षार्थं वा । नाद्यः । एतद्वाक्योक्तस
श्रुतेरुपपत्तिविरोधस्य दुःखादाविवान्यत्रापि समत्वात् । न द्वितीयः । सिद्धान्ते बन्धमात्रस
सत्यत्वाद्बन्धविशेषस्यैव सत्यत्वे वापूर्वपक्षिणं प्रति तन्निष्कर्षप्रदर्शनस्यानुपयोगाच्च । न च
स्वयूथ्यान्प्रत्येव तत्प्रदर्शनमिति वाच्यम् । स्वयूथ्यानां सर्वमिथ्यात्वप्रसक्तेरेवाभावेन तान्प्रत्यप्यस्यानुप
योगादित्यतः स्वयूथ्यान्प्रति प्रसञ्जकसद्भावान्मिथ्यात्वनिरासप्राप्तानौचितीपरिहाराय भाष्यकारीयनिष्कर्ष
प्रदर्शनमित्यभिप्रेत्य प्रसञ्जकं निष्कर्षप्रदर्शनसूचितभाष्यकारीयपरिहारप्रकारं च दर्शयति ॥ **तत्त्ववि**
इत्यादिना ॥ **प्रमादेति** ॥ प्रमादोऽज्ञानम् । तथा चाविद्यकत्वोक्त्याऽऽरोपितत्वसिद्धिरिति भावः
अत्र निर्बन्धपदेनैतत्सूचयति । स्वयं बन्धमिथ्यात्वमभ्युपगम्यापि परं प्रति तन्निराकारणं किं प्रथमभाष्
तदुक्तेरसङ्गतत्वप्रदर्शनार्थं वा तदुक्तोपपादनप्रकारस्यानुपपन्नत्वप्रदर्शनार्थं वा । नाद्यः । तस्य पूर्ववाक्येनै
सिद्धत्वात् । तदर्थमुपपत्तिविरोधस्यावक्तव्यत्वाच्च । अथवेत्यादिनाऽस्यायुक्तताप्रतिपादनपरत्वेनावतारित
त्वाच्च । नापि द्वितीयः । प्रमेये विवादाभावे उपपादनप्रकारनिरासायैतावतःप्रयासस्यानुचितत्वादिति
अत्र कर्तृत्वभोक्तृत्वयोर्दुःखादिवन्मायावादिरीत्या बुद्धिधर्मत्वं शङ्कितुरभिप्रेतम् । अत एव शङ्का
दशायां पृथक् तदनुपादानं तन्न तथा भ्रमितव्यम् । कर्तृत्वादेरात्मधर्मत्वेन दुःखादिवैलक्षण्यात्
अतोऽपि दर्शनभेद इत्यभिप्रेत्य । ननु कर्तृत्वादेः स्वातन्त्र्यरूपत्वे तस्य भगवद्धर्मत्वेन क्रियावेशरूपत्वे
विनाशोत्पत्तिप्रयोजकविकाररूपस्य तस्यानादिनित्ये जीवेऽसम्भवेन च कथमात्मधर्मत्वं तस्योपपद्यत इत्या
शङ्कां कर्तृत्वादिस्वरूपनिरूपणेन तत्र प्राप्तदोषपरिहारेण च निरस्यति ॥ **क्रियाज्ञाने प्रतीति** ॥ अ
कारकान्तरेत्युक्त्या स्वस्य कारकत्वसूचनान्नातिप्रसङ्गः । क्रियावेशत्वादिकमादिपदार्थः । अत्र स्वत
स्वरूपेण विद्यत इत्युक्त्या न परमत इवाहमर्थेऽपि स्वरूपेणाध्यस्तमित्यात्मनि स्वतोऽनौपाधिकमित्युक्त्य
स्फटिकलौहित्यवन्नान्योपरागनिमित्तमिति स्वत आत्मस्वरूपमित्युक्त्या दुःखादिवन्नागन्तुकमिति च दर्शन
भेदकथनमिति द्रष्टव्यम् ॥ **क्रियेति** ॥ क्रियावेशोनामाहंकरोमीत्यादिरभिनिवेशः । आदिपदेनोक्त

स्यादेव भोगिन्द्रत्वादिना न विनाशित्वादिप्रसङ्ग इत्यस्य अभिमतनिरासपरत्वे नानित्यताऽस्मत्पक्षे तु चैत-
न्यादेर्विशेषिण इत्यादिना वक्ष्यमाणत्वादित्यर्थः । कर्तृत्वादेरनध्यासे प्रमादात्मकत्वं न तदंशे स्यादित्यत
आह ॥ **तस्येति** ॥ निमित्तग्रहणेन परमत इव नोपादानत्वमित्याह । नन्वविद्याया असत्त्वे नासतः
साधकत्वमनिर्वाच्यत्वे च तत्खण्डनानुपपत्तिरित्यत आह ॥ **अविद्यादिकं चेति** ॥ नन्वेवमपि बुद्धीन्द्रि-
यादेरस्वरूपत्वात्स्वरूपेणैवाध्यास इति कथं दर्शनभेदस्तदंश इत्यत आह ॥ **एवमिति** ॥ ननु
बुद्ध्यादीनामनात्मीयत्वे नात्मविकारहेतुसुखादिसाधनत्वमित्यत आह ॥ **परायत्तेति** ॥ एवं च कर्तृत्वा-
दीनामात्मीयत्वात्तत्रापरायत्तत्वामात्राध्यासो बुद्ध्यादीनां चापरायत्तात्मीयतयाऽध्यास इति भेदः । नन्वय-
मध्यासः शुक्तिरजताध्यासतुल्यतया न बन्ध इत्यत एतदध्यासस्य बुद्ध्यादिधर्मभूतदुःखाद्यनात्मीयतानव-
गमसहकृतस्योच्चनीचत्वादिरूपविकारापादकत्वाद्युक्तं बन्धमिथ्यात्वमित्याह ॥ **तद्धर्मानिति** ॥ ननु बुद्ध्या-
दीनां विविक्ततयोपलम्भे न तद्धर्माणामनात्मीयतयाऽदर्शनं युक्तमित्यत आह ॥ **तांश्चेति** ॥ ननु यद्येता-
वन्मात्रं बन्धस्तर्हि तन्निवृत्तिः कर्मादिना सुलभेत्यतो निवृत्तकर्मणोऽन्यादृशत्वेऽपि प्रवृत्तकर्मणो बन्धा-
पादकत्वमेवेत्याह ॥ **तत इति** ॥ तादृशस्यापि कर्मविशेषेण निवृत्तिः किं न स्यादित्यत आह ॥ **नेति** ॥
आत्यन्तिकं मूलकारणाविद्योच्छेदप्रयुक्तम् । अत एवोक्तं कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यत इति ।
नन्वेवं मोक्षशास्त्रमनुपपन्नमित्यत आह ॥ **विनेति** ॥ **सत्येति** ॥ स्वरूपेण सत्यं संसृष्टतयाऽनृतं मिथुनी-
कृत्याध्यस्य क्त्वाप्रत्ययो गौणः । एतदध्यासरूपोऽहंममेति लोकव्यवहारो नैसर्गिक इत्यन्वयः ॥
एतदिति ॥ न तु दुःखादेरेव बन्धत्वाद्वाऽन्यमिथ्यात्वनिरासेऽस्या युक्तित्वासम्भवाद्वेति भावः । ननु
भाष्यकारीयमर्धजरतीयमनुपपन्नं नियामकाभावादित्यत्राह ॥ **स्वातन्त्र्यादेरिति** ॥ ननु माऽस्तु भाष्य-
काराभिप्रेतेऽनुपपत्तिर्मूलं तु नकिमपि पश्याम इत्यत आह ॥ **वक्ष्यति चेति** ॥ तदनन्यत्वमितरव्यप-
देशादित्यादौ जीवे स्वातन्त्र्यकर्तृत्वादिनिरासेन कर्ताशास्त्रार्थवत्त्वादित्यादौ कर्तृत्वाभ्युपगमेन वैधर्म्या-
च्चेत्यादौ जगत्सत्यत्वप्रतिपादनेन भाक्तंवा विद्यैवत्वित्यादौ कर्मादेर्मोक्षसाधनत्वादिप्रतिपादनेन चैतदेव
वक्ष्यतीत्यर्थः ।

स० — वक्ष्यमाणत्वादिति ॥ नानित्यताऽस्मत्पक्षे तु चैतन्यादेर्विशेषिणः । लक्षणस्य निवृत्तौ
तु स्यान्न तच्चेतने क्वचिदित्यादिना वक्ष्यमाणत्वादित्यर्थः ।

प० — अत्र मिथ्यात्वं यदि बन्धस्येति वा मिथ्यात्वं यदि तस्य स्यादिति वा वक्तव्ये दुःखा-
देरिति विविच्य कीर्तनस्य फलं वक्तुं शङ्कामाह ॥ **तत्त्वविद इति** ॥ तत्त्वज्ञानिनः शङ्कन्त इत्यर्थः ।

यथोक्तमिति ॥ आनन्दमयनये ॥ **प्रमादात्मकत्वादिति** ॥ यद्यपि प्रमादात्मकत्वादित्यस्यास्वाभाविकत्वादित्येवार्थो न मिथ्यात्वादिति । तथापि जीवस्वातन्त्र्यविवक्षायां मिथ्यात्वमपि तदर्थ इत्यत्रैतदुदाहरणमिति ज्ञातव्यम् ॥ **दर्शनभेद इति** ॥ तत्त्वज्ञानिदर्शनमायिदर्शनयोर्भेद इत्यर्थः । 'स्वतन्त्रः कर्ते'ति पाणिन्युक्तस्वातन्त्र्यं विवृण्वन्नेवाह ॥ **कारकान्तराप्रयोज्यत्वादीति** ॥ आदिपदेन तार्किकरीत्या ज्ञानचिकीर्षाकृतिसमवायित्वलक्षणमिति गृह्यते । उच्चत्वादिरूपं भोक्तृत्वमिति वा ॥ **स्वत इति** ॥ परमत इवोपाधिसम्बन्धमपेक्ष्येत्यर्थः । 'कर्ता शास्त्रार्थवत्त्वादि'त्यत्र द्वितीये तथैव सूत्रकृता निर्णीतत्वादिति भावः । नन्वेवमौदासीन्यप्रच्युतिरूपक्रियावेशरूपविकारप्राप्तेरात्मनो जनिमत्त्वादनित्यत्वं स्यादित्यत आह ॥ **क्रियावेशेति** ॥ **वक्ष्यमाणत्वादिति** ॥ 'नानित्यताऽसत्पक्षेतुचैतन्यादेर्विशेषिण' इत्यादिना समयपादे 'नैकस्मिन्नसम्भवादि'ति जैनमतापाकरणाधिकरणे वक्ष्यमाणत्वादित्यर्थः ॥ **बम्भ्रमीतीति** ॥ पुनःपुनर्भ्रमति । क्रियासमभिहारे यङ्लुगन्तम् ॥ **यदवोचदिति** ॥ तद्भाष्यकार इति शेषः ॥ **सत्यानृत इति** ॥ सत्यं चैतन्यं अनृतमन्तःकरणादिकम् । मिथुनीकृत्य तादात्म्येन भ्रान्त्वा अहं ममेत्यादि नैसर्गिकव्यवहारं करोतीत्यादि । परिभावयितुं प्रकटयितुमित्यर्थः । अपरायत्तत्वावभासो भ्रम इत्युक्तम् तत्कुत इत्यत आह ॥ **स्वातन्त्र्यादेरिति** ॥ **एतत्तत्रतत्रेति** ॥ जीवस्य स्वतः कर्तृत्वादिमत्त्वेऽपि तत्स्वातन्त्र्यबुद्धिर्भ्रम इत्येतत्पूर्वोक्तं प्रमेयं सर्वं 'कर्ता शास्त्रार्थवत्त्वादि'त्यादिसूत्रेषु 'इतरव्यपदेशादि'त्यधिकरणसूत्रेषु 'अन्यथानुमितौ च ज्ञशक्तिवियोगादि'त्यादौ च वक्ष्यतीत्यर्थः ।

या० — मूले दुःखादेरिति निष्कृष्योक्तेः प्रयोजनं वक्तुमाह ॥ **तत्त्वविद इत्यादिना** ॥ **प्रमादात्मकत्वादिति** । यद्यपि प्रमादात्मकत्वादित्यस्यास्वाभाविकत्वादित्येवार्थो न मिथ्यात्वादिति तथाऽपि जीवस्वातन्त्र्यविवक्षायां मिथ्यात्वमपि तदर्थ इत्यभिप्रेत्यात्रैतदुदाहरणमिति ज्ञातव्यम् ॥ **वक्ष्यमाणत्वादिति** । नानित्यताऽसत्पक्षे तु चैतन्यादेर्विशेषिणः । लक्षणस्य निवृत्तौ तु स्यान्न तच्चेतने क्वचिदित्यत्रेति शेषः । ननु दुःखादिवज्जीवगतस्वातन्त्र्यादेरपि सत्यत्वमेव किं न स्यादित्यत आह ॥ **स्वातन्त्र्यादेरिति** ॥ ननु सर्वमिथ्यात्वश्रुतेरिवास्या अपि श्रुतेरुपपत्तिविरोधान्न जीवस्वातन्त्र्यनिषेधकतेत्यत आह ॥ **न हीति** ॥ अतो ब्रह्मणोऽन्यः कर्ता चेतनो नास्तीति जीवस्य ब्रह्मान्यत्वमेव निषिध्यते न तु ब्रह्मणोऽन्यः स्वतन्त्रकर्ता, अतोऽन्यो नास्तीति श्रुत्यर्थ इत्यत आह ॥ **वक्ष्यते चैतदिति** ॥ जीवस्य ब्रह्मान्यत्वं जन्माधिकरणादिषु वक्ष्यतीत्यर्थः । यद्वा यदध्यात्मदर्शनविषयतयोक्तं कर्तृत्वादेः सत्यत्वादिकं तत्कर्ता शास्त्रार्थवत्त्वादित्यादौ सूत्रकारो वक्ष्यतीत्यर्थः । यद्वा जीवकर्तृत्वस्यापि श्रुत्यनुमानादिसिद्धत्वेन तद्वि

रोधात्कथं नास्याः कश्चिद्विरोध इत्यत आह ॥ **वक्ष्यतीति** ॥ तत्र तत्र 'एतेन शिष्टा अपरिग्रहा' इत्यत्र 'इतरव्यपदेशादि'त्यत्र'अन्यथाऽनुमिताविे'त्यत्र 'उपलब्धिवदनियम' इत्यत्र चेत्यर्थः ।

श्री०— ननु करणभोजनादिरूपक्रियाया आगन्तुकत्वेन तदावेशरूपकर्तृत्वादिलक्षणविक्रियाप्राप्त्या तन्नाशेनात्मनोऽपि विनाशः स्यादित्यत आह ॥ **क्रियावेशेति** ॥ परवशा अधीनाः । तान् शरीरेन्द्रियादीन् । विविक्तान्भिन्नान् ॥ **विस्पष्टतयेति** ॥ स्फुटतरभेदज्ञानशून्यत्वेन इत्यर्थः । तद्धर्मान् शरीरादिधर्मान् । तत्प्रयुक्तानिति यावत् । अनात्मत्वेन आत्मभिन्नत्वेन । तदनाश्रितत्वेनेति यावत् । ननु जीवगतकर्तृत्वादेरपरायत्तत्वावभासोऽविद्यानिमित्तको भ्रमः । कुतोऽपरायत्तत्वरूपं स्वातन्त्र्यं सत्यमेव किं न स्यादित्यत आह ॥ **स्वातन्त्र्यादेरिति** ॥

च०— दुःखादेरिति विशिष्यमूलकारीयनिर्देशस्य फलमभिधित्सते ॥ **तत्वविद् इत्यादि** । **क्रियावेशादीति** ॥ अहंकरोमीत्यभियोगादीत्यर्थः ॥ **वक्ष्यमाणत्वादिति** ॥ समयपादे जैनमतनिरासावसरे नानित्यतास्मत्पक्षे तु चैतन्यादेरित्यादिनाभिधास्यमानत्वादित्यर्थः ॥ **वक्ष्यतीति** ॥ एतेन, इतर, अन्यथानुमितावित्यादिनाभिधास्यतीत्यर्थः ।

सु०— यदपि परेणात्मानात्मनोरितरेतराध्याससमर्थनाय तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिकाः प्रवृत्ताः । सर्वाणि च शास्त्राणि इत्यादिना प्रमाणान्तरमादर्शितम् । तदनेनैव निरस्तम् । अत्र हि प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोग्यभोगलक्षणव्यवहारत्रयस्य शरीरेन्द्रियादिष्वहंममाध्यासपुरःसरत्वप्रदर्शनेन व्यवहारकार्यलिङ्गकमनुमानं व्यवहारान्यथाऽनुपपत्तिर्वाऽध्यासे प्रमाणमुक्तम् । न चानेनान्तःकरणशरीरेन्द्रियविषयाणां तद्धर्माणां दुःखादीनां च मिथ्यात्वं सिद्ध्यति । स्वरूपसतामपि तादात्म्यतत्संबन्धित्वाभ्यामारोपेणैव व्यवहारोपपत्तेः । न चारोपितत्वमात्रेण मिथ्यात्वम् । आत्मनोऽप्यन्तःकरणादिष्वारोपितत्वेन मिथ्यात्वप्रसङ्गात् । अङ्गीकृतश्चान्तःकरणादिषु परेणात्माध्यासः । यथोक्तम् । तं प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति । चेतनस्याचेतने स्वरूपाध्यासाभावात्संसृष्टतयैवाध्यासात्तन्मात्रेणैव सकललौकिकवैदिकव्यवहारोपपत्तेर्न मिथ्यात्वमिति चेत् सममचेतनस्यापि । यदत्र केनचित्प्रलपितम् । इतरेतराध्यासेऽपि

पुराणतदविरुद्धन्यायनिर्णीतोऽबाधित इति । तदसत् । प्रपञ्चबाधकश्रुत्यादेर्निराक्रियमाणत्वात् युक्तीनां च निराकरिष्यमाणत्वात् । श्रुत्यादिसिद्धत्वे च मिथ्यात्वस्य तमेतमविद्याख्य मित्यादि व्यर्थमापद्येत । न खलु कोऽपि वादी वदति । केनापि रूपेण शरीरादिकमात्मनि नाध्यस्तमिति । येनाध्यासमात्रमुपपाद्येत । तादात्म्याध्यासं च निराकरिष्यत्याचार्यः । विना च तेन व्यवहारमुपपादयिष्यति ।

वा० — अत्र दुःखादेरिति निष्कृष्योक्त्या न केवलं स्वपक्षानुसारिशङ्कापरिहारोऽपितु परपक्षीयसाधकान्तरनिरासोऽपीति भावेनाह ॥ **यदपीति** ॥ किं तत्प्रमाणमित्यतो विवरणरीत्या तत्प्रकारं दर्शयति ॥ **अत्र हीति** ॥ अत्र प्रमाणप्रमेयग्रहणं स्वैकदेशभूतप्रमातुर्व्यवहारान्तरस्य चोपलक्षणमिति भावेनाह ॥ **प्रमात्रिति** ॥ देहेन्द्रियादिष्वित्यादिना तदीयभाष्ये वक्ष्यमाणोपपादनप्रकारसूचनम् । विवादाध्यासितो व्यवहारोऽध्यासनिबन्धनो व्यवहारत्वात्स्वप्नादिव्यवहारवदित्यनुमानमत्राभिप्रेतम् । अथवा देवदत्तस्य जाग्रत्स्वप्नकालौ तस्यैव देहेन्द्रियादिष्वहंममाध्यासपुरःसरप्रमातृत्वादिव्यवहारवन्तौ देवदत्तसुषुप्तिकालान्यत्वे सति तत्कालत्वात् यन्नैवं तन्नैवं यथा तस्यैव सुषुप्तिकाल इति व्यतिरेक्यनुमानम् । प्रमातृत्वादिव्यवहारो देहादितादात्म्याध्यासं विना नोपपद्यते सुषुप्तावध्यासाभावेन व्यवहाराभावादित्यर्थापत्तिः । ननु यः कर्तृकरणभावः स सम्बन्धपुरःसर इति व्याप्तेर्देहादीनां प्रमातुश्च सम्बन्धमात्रेण व्यवहारोपपत्त्या सति संबन्धमात्रे तादात्म्याभावापराधेन कार्याभावादर्शनादर्थापत्तेरन्यथोपपत्तिरनुमानस्य चाप्रयोजकतेति चेन्न । सम्बन्धान्तरस्य दुर्निरूपत्वेन तादात्म्यस्यैव संबन्धत्वपर्यवसानात् । तथा हि । संबन्धान्तरं किं स्वस्वामिता वा स्वेच्छामात्रानुविधायित्वं वा संयोगो वा समवायो वा भोक्तृभोग्यत्वं वा स्वकर्मारब्धत्वं वा स्वेन्द्रियाधिष्ठेयत्वं वा । नाद्यः । भृत्यादिशरीरेणापि प्रमातृत्वादिव्यवहारापातात् सुषुप्ते तदापाताच्च । न च सहकार्यन्तराभावस्तदेति वाच्यम् । आत्मनः स्वतः कर्तृत्वशक्तौ हि तत्कल्पना न च तत्सम्भवः । कारकान्तराप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वरूपप्रमातृत्वस्य व्यापारवद्देहेन्द्रियतादात्म्याध्यासं विना स्वतो व्यापारशून्ये कूटस्थे चिन्मात्रेऽनुपपत्तेः । अस्तु तर्हि स्वेच्छानुविधायित्वं संबन्ध इति द्वितीयो भृत्यादिशरीरं तु स्ववचनानुविधायीति नातिप्रसङ्ग इति चेन्न । तत्किमिच्छानुविधानयोग्यतामात्रमुतेच्छयाऽनुविधीयमानत्वं वा । नाद्यः । सुषुप्तेऽपि तत्सत्त्वेन व्यवहारस्य दुर्वारत्वात् न द्वितीयः । आतुरे तदभावेन व्यवहारानापत्तेः । इच्छानुविधानस्य व्यवहारमूलत्वमनुभवसिद्धमिति चेत् । तत्किं सार्वत्रिकमुत काचित्कम् । नाद्यः । इच्छानुविधानमन्तरेण दुर्गन्धादिप्रमातृत्वदर्शनात् न द्वितीयः । इच्छाया अन्तःकरणपरिणामरूपतयाऽन्तःकरणतादात्म्याध्यासमन्तरेण निर्विकारचिदात्मनि तदसम्भवेनेच्छाया अप्यध्यासमूलत्वेनाध्यासस्यैव व्यवहारहेतुत्वात् । नापि संयोगसमवायौ व्यवहार

निमित्तम् । सुषुप्तेऽपि तयोः सत्त्वात् । भोक्तृभोग्यत्वस्वकर्मारभ्यत्वस्वेन्द्रियाधिष्ठेयत्वादीनां भोगाद्य यासमूलत्वाद्भृत्यादिशरीरे सद्भावाच्च न व्यवहारहेतुत्वम् । अथ भृत्यादिव्यावृत्तयेऽव्यवधानेन भोग्यसंबन्ध इत्युच्यते तर्हि भोगयोग्यतामात्रस्य सुषुप्तेऽपि सत्त्वाद्भुज्यमानत्वस्य चात्मनः सर्वशरीरदेशकालेष्वव्यवधानस्य समत्वात्कस्यचिदेव शरीरस्य कयोश्चिदेव देशकालयोर्भोग्यत्वे नियामकमूलसम्बन्धसापेक्षत्वान्न स्वयमेव व्यवहारनिर्वाहकत्वम् । एवं च संबन्धान्तरासम्भवात्कल्पिततादात्म्यमेव सम्बन्ध इति नार्थापत्त्यादेरन्यथोपपत्त्यादिकमिति भावः । अनुमानार्थापत्ती मिथ्यात्वसाधकतयोपन्यस्ते आरोपितत्वमात्रसाधकतया वा । नाद्य इत्याह ॥ **न चेति** ॥ ननु व्यवहारो मिथ्यात्वेन विनाऽनुपपद्यमानः कथं न तत्साधयेदित्यत आह ॥ **स्वरूपेति** ॥ अत्र स्वरूपसतामितिविशेषणंप्रति विशेष्यतयाऽन्वितानामन्तःकरणादीनां धर्मिणामहं मनुष्य इत्यादितादात्म्येन दुःखादिधर्माणां च मम दुःखमित्यादितत्सम्बन्धित्वेनेति सम्बन्धः । अत एव पूर्वं द्वन्द्वेन निर्देष्टव्ये पृथङ्निर्देशः । अत्र स्वरूपसतामप्यारोपोक्त्या द्वितीयोऽपि परास्तः । आरोपितत्वस्य स्वरूपसत्त्वाविरोधित्वेन तत्साधनस्य निष्फलत्वात् । ननु यथाकथञ्चिदारोपितत्वाङ्गीकारे सिद्धमेव मिथ्यात्वमित्यत आह ॥ **न चेति** ॥ तद्विपर्ययेणेत्यत्र तदचेतनमन्तःकरणादिकं तद्विपर्ययश्चेतनमित्थंभूतलक्षणे तृतीया । एवं च चेतनमात्मानमचेतनेष्वध्यस्यतीत्यर्थः । कथमन्यथाऽन्तःकरणादिषु चिदात्मतादात्म्यानभ्यासे प्रमेयप्रवणकर्तृस्थचित्स्वभावरूपप्रमायाः केवलजडान्तःकरणपरिणामत्वमुपपद्येतेति तदाशय इति भावः । यदत्रेत्यादिना वाचस्पतिमतेन वैषम्यमाशङ्क्य निराकर्तुं साम्योपक्षेपाय तन्निवर्त्यं शङ्कते ॥ **चेतनस्येति** ॥ यद्वा गूढाभिसन्धेरेवात्मवैषम्यशङ्कासाम्यपरिहारौ यदत्रेत्यादिना च तदुद्धाटनमिति द्रष्टव्यम् । अत्र बन्धस्य प्रकृतत्वेऽपि दुःखादेरिति निष्कृष्योक्त्या प्रतीयमानतादात्म्यस्वातन्त्र्यादिरूपसम्बन्धस्य मिथ्यात्वेऽपि दुःखादेस्तत्र सिध्यतीति सूचनेनैतन्मानान्तरनिरासः सिध्यति तदनेनेत्थं मूलयोजनामभिप्रैति । पूर्ववाक्यान्नेत्यनुवर्तते । सावधारणं चैतत् । दुःखादेर्मिथ्यात्वं नैव मानान्तरेण न सिध्यतीति यावत् । आरोपमात्रेण व्यवहारोपपत्त्या तन्मात्रस्य चात्मन्यपि सत्त्वेन न मिथ्यात्वप्रयोजकतेति हेतुरवधारणलब्धः। तत्र च नेहनानेत्यादिवाक्यबलादात्मवैषम्ये यदत्रेत्यादिना शङ्किते मिथ्यात्वं यदि दुःखादेरिति मूलेन तद्वाक्ये उपपत्तिविरोधोद्भावनमिति । यद्वाऽऽत्मन्यपि सत्त्वेनारोपमात्रस्य मिथ्यात्वाप्रयोजकत्वादारोपमात्रेण च व्यवहारोपपत्त्या न मानान्तरं मिथ्यात्वसाधकमित्येतावदर्थे बहिरेव सिद्धे नेहनानेतिवाक्यबलादात्मवैषम्ये शङ्किते तत्रोपपत्तिविरोधप्रतिपादकेनानेन मूलेन परम्परया मानान्तरनिरासः सिध्यतीति भावः । श्रुतियुक्तिभिरित्यत्र श्रुतिशब्दः स्मृत्यादीनामुपलक्षकः । अतएवोत्तरत्र श्रुत्यादेरित्याह ॥ **निराकरिष्य-**

श्रुत्यादीति ॥ इतरेतराध्यासेऽपि प्रपञ्चबाधन श्रुत्यादिभिरिति वदता श्रुत्यादेरेव मिथ्यात्वसा
अध्यासस्येत्युक्तं स्यात् । तथा च तत्प्रतिपादकं भाष्यं व्यर्थमिति भावः । ननु मिथ्यात्वेऽ
प्रत्यध्यासस्यानुपपादनीयत्वेऽप्यध्यासे विप्रतिपन्नं प्रति तदुपपादनं सङ्गतमेवेति चेन्न । विष
क्षिप्तबन्धमिथ्यात्वव्युत्पादनावसरेऽध्यासमात्रस्याव्युत्पादनीयत्वात् अध्यासमात्रविप्रतिपन्नो वादी
चेत्याह ॥ न खल्विति ॥ अङ्गीकृत्यैव तादात्म्येनारोपमिदमुक्तम् । वस्तुतस्तु सोऽपि
देहात्मत्वंयदिनतत्प्राप्तमित्यादिना भाष्यकारेण निराकरिष्यमाणत्वादित्याह ॥ तादात्म्येति
कथं स नास्ति व्यवहारान्यथाऽनुपपत्त्यादेरुक्तत्वादित्यत आह ॥ विना च तेनेति ॥ उपचार
ऽहमिति व्याप्तत्वादात्मनो देह इत्यादिनेति भावः । उपलक्षणं चैतत् । क्रियावेशादिलक्षण
विनाशाद्यहेतुत्वात्प्रमातृत्वादेर्जीवे स्वाभाविकत्वान्नाध्याससापेक्षत्वमिति पूर्वोक्तरीत्या स
द्रष्टव्यम् । अत्र तादात्म्यतत्सम्बन्धित्वाभ्यामारोपे प्रस्तुते तादात्म्यारोपस्य विशिष्यनिरासेन
त्वेनारोपोऽनुमत इति ज्ञायते । अत एव स्वातन्त्र्यरूपतत्सम्बन्धारोपः पूर्वमुपपादित इति द्र

स० — एवं श्रुत्या तावन्मिथ्यात्वं सिध्यतीत्येतन्निराकृतम् । प्रमाणान्तरं च
निराकरोति ॥ यदपीति ॥ व्यवहारकार्यलिङ्गकमनुमानमिति ॥ प्रमातृत्वादिव्यवहार
न्द्रियादिष्वहंममाध्यासपुरःसरं प्रमातृत्वादिव्यवहारत्वात् यदाध्यासाभावस्तदा व्यवहारा
सुषुप्ताविति कार्यलिङ्गकमनुमानमित्यर्थः । उपलक्षणं चैतत् । देवदत्तस्य जाग्रत्स्वप्नकालौ
करणभूतदेहेन्द्रियादिष्वहंममाध्यासपुरःसरप्रमातृत्वादिव्यवहारवन्तौ तस्यैव सुषुप्तिकालादन्यक
कालस्तथाविधव्यवहारवान्न भवति स न तस्यैव सुषुप्तिकालादन्यकाल इति प्रयोगान्तरमपि द्रष्टव्य
व्यतिरेकिणमनङ्गीकुर्वाणं प्रत्याह ॥ व्यवहारान्यथानुपपत्तिर्वेति ॥ व्यवहारत्रितयमध्यासम
पद्यमानमध्यासं कल्पयतीत्यर्थः ॥ युक्तीनां चेति ॥ वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिन
वादिविप्रतिपत्तिनिरासार्थं तद्व्युत्पादनमर्थवदिति चेत् किमध्यासमात्रव्युत्पादनं क्रियते ताद
वा । नाद्य इत्याह ॥ न खल्विति ॥ नान्त्य इत्याह ॥ तादात्म्येति ॥ जातमात्र
इत्यादिना तृतीयस्य द्वितीये । ननु स्वरूपाध्यासाभावे कृशोऽहमित्यादिव्यवहारः कथमित्य
विना च तेनेति । व्याप्तत्वादात्मनो देहे इत्यादिना ।

प० — मूले वाक्यस्येत्युपलक्षणम् । परोक्तमन्यदपि बन्धमिथ्यात्वप्रमाणं निरसनीय
तदप्यनूद्य निराह ॥ यदपीति ॥ प्रमाणान्तरमादर्शितमित्यन्वयः ॥ तमेतमिति ॥ अध्यासि

अविद्याख्यं अविद्यानिमित्तम् ॥ **शास्त्राणि** 'ब्राह्मणोवाजपेयेनयजेते'त्यादिशास्त्राणीत्यर्थः ॥ प्रमाणान्तरमनुमानमर्थापत्तिर्वेत्यग्रे व्यक्तम् । ननु तदात्मतया तत्संसृष्टतया वाऽऽरोपितत्वाद्देहादेर्मिथ्यात्वमस्त्वित्यत आह ॥ **नचेति** ॥ परमुखेन समाधिं वाचयित्वा सम्यं ममेत्याह ॥ **चेतनस्येति** ॥ **सममचेतनस्यापीति** ॥ नन्वेवमिदंरजतमित्यादिभ्रमस्थलेऽपि रजतस्यासत्त्वं न सिद्ध्येत् । चिरन्तनतार्किकरीत्या तादात्म्यतत्संसर्गयोरेवासत्त्वापत्त्याऽभिनवान्यथाख्यातिर्वक्ष्यमाणा न युक्ता स्यादिति चेत् । नैवम् । स्मर्यमाणारोपस्थले आरोप्यस्य सर्वस्यासत्त्वेऽपि गृह्यमाणारोपस्थले सिद्धान्तेऽपि तादात्म्यादिरूपधर्ममात्रस्यासत्त्वेन धर्मिणस्सत्त्वस्यान्यथाख्यातिवादे वक्ष्यमाणत्वात् । अस्यापि गृह्यमाणारोपत्वान्नान्तःकरणादेरचेतनस्य मिथ्यात्वसिद्धिरित्युक्तमिति ध्येयम् ॥ **युक्तीनां च निराकरिष्यमाणत्वादिति** ॥ विश्वं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरूप्यवदित्यादियुक्तीनां समयपादे शून्यवाद्यपाकरणप्रस्तावे भेदो मिथ्या भेदत्वादित्यादेः पृथगुपदेशादित्येतद्व्याख्यावसरे विवादपदं सदसद्विलक्षणं ज्ञाननिवर्त्यत्वादित्यादेर्वैलक्षण्यं सदसतोरप्येतेन निषिध्यत इत्यादिनाऽत्रैवाग्रे निराकरिष्यमाणत्वादित्यर्थः ॥ **इत्यादीति** ॥ अनुमानादिप्रमाणोपन्यासपराध्यासभाष्यमित्यर्थः ॥ **कोपिवादीति** ॥ अस्माभिरप्यपगयत्तत्वेनारोपाङ्गीकारादिति भावः । स्वरूपसतामपि तादात्म्यतत्सम्बन्धित्वाभ्यामारोपेणैव व्यवहारोपपत्तेरिति पूर्वमुक्तम् । तत्रतादात्म्याध्यासमङ्गीकृत्य । वस्तुतस्त्वयुक्तं चैतद्वर्णनमिति भावेनाह ॥ **तादात्म्येति** । तृतीयाध्याये भक्तिपादे 'देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित् । मम देह इति ह्येव न देहोऽहमितिप्रमे'त्यादिनेति भावः । कथं तर्हि कृष्णोऽहं कृशोऽहमित्यादि व्यवहारः । 'नैवां ममाहमिति धीः श्वसृगालभक्ष्य'इत्यादि पौराणिकव्यवहारश्चेत्यत आह ॥ **विना च तेनेति** ॥ तादात्म्यारोपेण विनैव । उपचारश्च कृष्णोऽहमित्यादिना । 'व्याप्तत्वादात्मनो देहे व्यवहारेष्वपाटवात् । भेदज्ञानेऽपि चाङ्गारवह्नित्वस्वाविविक्तवत् । भवन्ति व्यवहाराश्चे'त्यादिना चेति भावः । विवृतमेतत्सम्यग्देहात्मैक्याध्यासभङ्गे न्यायामृते ।

या०— एवं श्रुत्या बन्धमिथ्यात्वं सिध्यतीत्येतन्निरस्तम् । इदानीं मिथ्यात्वसाधकं परोपन्यस्तं प्रमाणान्तरमप्यनूद्य निराकरोति ॥ **यदपि परेणेति शरीरेन्द्रियादिष्विति** ॥ 'देहेन्द्रियादिष्वहंममाभिमानहीनस्यप्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरि'त्यादिना तथा 'ब्राह्मणोयजेतेत्यादीनि शास्त्राण्यात्मनिर्वाणाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्त' इत्यादिना ग्रन्थेनाहंममताध्यासपुरःसरत्वस्य प्रदर्शितत्वादिति भावः । एतद्ग्रन्थसङ्ग्रहायैव पूर्वमित्यादिनेन्युक्तमिति ध्येयम् । स्वरूपाध्यास एव मिथ्यात्वे प्रयोजको नाध्यासमात्रमित्याशङ्कते ॥ **चेतनस्येति** ॥ प्रपञ्चस्यापि नास्ति स्वरूपाध्यास इति न मिथ्या-

देहादेरनात्मनः स्वरूपेणैव मिथ्यात्वमङ्गीकार्यम् । श्रुत्यादिबलान्नात्मस्वरूपस्येति यत्केनचिदुक्तं तदनूद्य दूषयति ॥ **यदत्रेति** ॥ अभ्युपेत्याह ॥ **श्रुत्यादिसिद्धत्वे चेति** ॥ स्वरूपसतामपि तादात्म्यतत्संबन्धित्वाभ्यामारोपेणैव व्यवहारोपपत्तेरिति यत्पूर्वमुक्तं तत्तादात्म्याध्यासमङ्गीकृत्यैव न वस्तुत इत्याह ॥ **तादात्म्याध्यासमिति** ॥ देहादीनां तत्संबन्धित्वेनाध्यासस्यास्माभिरङ्गीकृतत्वात्तादात्म्याध्यासमित्येवोक्तम् । 'मम देह इति ह्यत्र न देहोऽहमिति भ्रमे'त्यादिनेति शेषः । देहात्मनोरैक्याध्यासाभावे देहानुकूलप्रतिकूलयो रागद्वेषासम्भवेन प्रवृत्तिनिवृत्त्यनुपपत्त्या कर्तृत्वादिव्यवहारानुपपत्तिरित्यत आह ॥ **विना चेतनेति** ॥ 'व्यासत्वादात्मनो देहे व्यवहारेष्वपाटवात् । भेदज्ञानेऽपि चाङ्गार वह्नित्वस्याविविक्तवत् । भवन्ति व्यवहाराश्चे'त्यादिना तादात्म्याध्यासंविनाऽप्यात्मनोऽत्यन्तं प्रेमास्पदतया तत्संबन्धिनो देहादेरपि प्रेमास्पदत्वात्तदनुकूलप्रतिकूलयो रागद्वेषादिसम्भवेन प्रवृत्त्याद्युपपत्तौ कर्तृत्वादिव्यवहारो युज्यत एवेति तमुपपादयिष्यतीत्यर्थः ।

श्री ० — **प्रमाणान्तरमिति** ॥ अध्याससद्भाव इति शेषः । अनेनानुमानार्थापत्तिरूपप्रमाणेन । स्वरूपसतां स्वरूपेण सत्यानामित्यर्थः ॥ **तादात्म्येत्यादि** ॥ तादात्म्यारो(संसर्ग)रोपाभ्यामित्यर्थः । ननु यथाकथञ्चिदारोपितत्वप्राप्त्या तन्मात्रेणैव मिथ्यात्वं प्राप्तमिति चेत्तत्राह ॥ **न चेति** ॥ शङ्कते ॥ **चेतनस्येति** ॥ **स्वरूपेति** ॥ स्वरूपेणैवाध्यास एव मिथ्यात्वे प्रयोजक इत्यर्थः ॥ **सममिति** ॥ अनात्मनोऽचेतनस्याप्यात्मनि संसृष्टत्वेनैवाध्यासोऽस्तु न स्वरूपेणातो न मिथ्यात्वमिति भावः । आत्मानात्मनोः स्वरूपेणैवेतरेतराध्याससाम्येऽप्यनात्मन एव मिथ्यात्वं नात्मन इत्याह ॥ **यदत्रेति** ॥ सममित्यस्माभिरुक्ते सतीत्यर्थः ननु श्रुत्यादिसिद्धमप्यध्यासं कोऽपि वादी नाङ्गीकरोतीत्यतोऽस्माभिः स उपपाद्यतेऽतस्तमेतमित्यादिभाष्यं न व्यर्थमित्यत आह ॥ **न खल्विति** ॥

च ० — इयता ग्रन्थसन्दर्भेण बन्धमिथ्यात्वस्य श्रुतिप्रमाणकतां प्रत्याख्याय संप्रति तदभिहितप्रमाणान्तरकतामपि प्रतिविधित्सुरनुवदति यद्पीत्यादिना दर्शितमित्यन्तेन । अविद्याख्यमविद्यानिमित्तम् । **इत्यादिनेति** ॥ ब्राह्मणो वाजपेयेन यजेतेत्यादीनि शास्त्राणि आत्मनि वयोवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्त इत्यादिना ग्रन्थेनाहंममाध्यासपुरःसरत्वस्य प्रदर्शितत्वादित्यर्थः । मिथ्यात्वप्रयोजकाभिमतस्वरूपाध्यासस्यात्मन्यनङ्गीकारान्न क्षतिरित्याशङ्कते ॥ **चेतनस्येति** ॥ **युक्तीनामिति** ॥ समयपादे शून्यवादापाकृतिप्रस्तावे पृथगुपदेशादिति नये प्रत्याख्यास्यमानत्वादित्यर्थः ॥ **आपाद्येतेति** ॥ श्रुति

निर्धारितेऽर्थेऽनुमानादिप्रमाणोपन्यासस्यानर्थक्यादिति भावः ॥ **न खल्विति** ॥ अनन्यार्ध
ध्यासस्योत्तरवादिनाऽप्युरीकृततया तं प्रति शरीराध्याससमर्थनमनर्थकमिति भावः ॥ **निराक**
भक्तिचरणे देहात्मत्वं यदित्यादिना न देहोऽहमिति प्रमेत्यन्तेनेति भावः । विना च तेन
विना । व्यवहारं कृष्णोऽहमित्यादिः ॥ **उपपादयिष्यतीति** ॥ व्याप्तत्वादात्मन इत्यादि
न्यायामृते देहात्मैक्याध्यासभङ्गे प्रपञ्चितमेतत् ॥

सु० — यदप्यहङ्कारस्थं कर्तृत्वादिकं तदुपरागादात्मनि चकास्तीति । अहंप्रत्ययस्यात्मविषयत्वात् । ननु तथा सति सुप्तावप्यहमुल्लेखः स्यात् । तदाऽऽत्मन तया प्रकाशमानत्वात् । न चाविद्याकार्यस्यापि तदानीं प्रतीतिप्रसङ्गः । सु समुत्खातितनिखिलपरिणामत्वेन तदभावादिति । मैवम् । सुप्तावप्यहमवभासस्येष्ट सति स्मर्येत ह्यस्तन इवाहङ्कारः । अनुभूते स्मृतिनियमाभावेऽपि स्मर्यमाणात्म चेन्न । सुखमहमस्वाप्समिति सुप्तोत्थितस्य स्वापसुखानुभवपरामर्शदर्शनात् । तत स्मर्येतेति चेत् । किं स्पष्टं स्मरणमापाद्यते । उत विषयविशेषोपरक्तम् । आद्ये त्वि न द्वितीयः । अविषयजन्यत्वात्सौषुप्तिकसुखस्य । न चायमस्ति नियमो यत्स्म संबन्धिविशेषसहितं स्मर्यत इति । अत एव मुख्यसुखतदनुभवे बाधकाभावा विषयकत्वकल्पनं परामर्शस्यापास्तम् ।

वा० — **अहंप्रत्ययस्येति** ॥ तथा च प्रमाणाभावेनात्मातिरिक्ताहमर्थस्यैवाभा
कर्तृत्वारोपः किन्त्वात्मनि स्वनिष्ठकर्तृत्वादेरेव भानमिति भावः । सुषुप्तावहमर्थावभासे पूर्वस्मि
भिमन्यमान आसमिति ह्यस्तनपरामर्शवत्सुषुप्तावहमित्यभिमन्यमान आसमित्यप्युत्थितस्य परा
शङ्कते ॥ **तथा सतीति** ॥ तर्कस्याभासतां निरस्यति ॥ **अनुभूत इति** ॥ अहंशब्दोल्ले
स्यादित्यापाद्यतेऽहमित्यर्थाभिमानविषयक इतिवोताहमर्थविषयक इत्येव वा । नाद्यः
शब्दोल्लेख्यनुभवाभावेन तदभावोपपत्तेः । न द्वितीयः । अहमर्थप्रकाशेन तदभिमानापा
करणत्वात् । अन्यथा तत्राप्यात्मेत्यभिमन्यमान आसमिति परामर्शापत्तेः । तृतीये त्विष्टा
तत्र विवादः । अहमस्वाप्समिति परामर्शस्य सर्वानुभवसिद्धत्वात् । नचाहङ्कारे परामृश
रोपादहङ्कारतज्ज्ञाने परमर्शत्वाभिमान इति वाच्यम् । अपरामर्शे परामर्शत्वारोपादर्शना
कल्पनाया अहमर्थस्यात्माऽन्यत्वसिद्ध्यधीनतयाऽन्योन्याश्रयाच्चाहमित्यतोऽन्यस्यात्मपरामर्शस्

ऽनुभूयत इति वाच्यम् । उक्तोत्तरत्वात् । तथा सति सुखमहमस्वाप्सं नकिञ्चिदवेदिषमित्यादेरपि सुखाज्ञानाद्यंशे परामर्शत्वाभावापत्तेश्च । सुखादेरन्याश्रयस्य निराश्रयस्य वाऽपरामर्शेनाहमर्थाश्रयत्वस्यैव वक्तव्यत्वात् । अन्यथा यः पूर्वं सुखी सोऽधुना दुःखी जातः इतिवत् यः पूर्वं मदन्यः सोधुनाऽहं जात इति धीः स्यादित्याशयेनाह ॥ **सुखमिति** ॥ अत्र सर्वत्र विवरणोक्तरीत्या परामर्शः स्मृतिरूपं ज्ञानमिति ज्ञायते । न च स्मृतेः संस्कारजन्यत्वनियमात्साक्षिरूपस्य सौषुप्तिकसुखाद्यनुभवस्य संस्कारा-जनकतया साक्षात्साक्षिजन्यत्वेन न परामर्शस्य स्मृतित्वं युक्तमिति वाच्यम् । तस्यैव जागरावस्थायां तत्कालोत्पन्नाहंवृत्त्यवच्छिन्नत्वेनानित्यतया संस्कारजनकत्वसम्भवेन तज्जन्यपरामर्शस्य स्मृतित्वोपपत्तेः । अस्माकं तु परामर्शस्य साक्ष्यनुभवत्वं वा मानसानुभवत्वं वा नोभयत्रापि क्षतिरिति द्रष्टव्यम् । सुखा-नुभवपरामर्शे बाधकं शङ्कते ॥ **तदेति** ॥ विषयविशेषः स्रक्चन्दनादिः ॥ **अविषयेति** ॥ सुषुप्तौ स्वरूपसुखानुभवाङ्गीकारादिति भावः । अस्त्वयं सुखस्वरूपाणां सुखानुभवपरामर्शो नान्येषाम् । तथा च तेषां सुखाश्रयतया नाहमर्थपरामर्शसिद्धिरिति चेत् । तेषामप्यज्ञानाश्रयतया तत्परामर्शसिद्धेः । सुख-परामर्शेऽपि न दोषः । तेषामपि तदा वैषयिकसुखाङ्गीकारात् । न च तदाविषयसम्बन्धाभावदोषः । प्राज्ञसम्बन्धस्यैव तत्त्वात् । न च तर्हि स्रक्चन्दनादिजन्यमेतदिति जाग्रदादाविव प्राज्ञसम्बन्धजन्यमेत-त्सुखमिति परामर्शापत्तिरिति वाच्यम् । सुखस्मरणदशायां तज्जनकविषयसम्बन्धस्मरणस्यावश्यकत्वे नियामकाभावादित्याह ॥ **न चायमिति** ॥ ननु नायं सौषुप्तिकसुखानुभवपरामर्शः किन्तु सौषुप्तिकदुःखा-भावविषयकानुमितिर्वा सौषुप्तिकदुःखाभावविषयकस्मृतिर्वा तथाचोक्तमयुक्तमिति चेन्न । सुषुप्तौ स्वरूप-भूतस्य प्राज्ञसम्बन्धजन्यस्य वा सुखस्य सम्भवेन स्मर्यमाणस्य स्वाशेषसम्बन्धिसहितस्मरणनियमाभावेन च मुख्यसुखतदनुभवे बाधकाभावेन सुखानुभवपरामर्शत्वेनानुभवसिद्धस्य तत्परित्यागेन दुःखाभावविषयका-नुभवत्वतत्स्मृतित्वकल्पनाया अयुक्तत्वात्सौषुप्तिकदुःखाभावविषयकस्मृतित्वेऽपि दुःखाभावाश्रयतयैवाहमर्थ-प्रकाशस्य स्वीकार्यत्वाच्च नोक्तमयुक्तमित्याह ॥ **अत एवेति** ॥ अत्र परामर्शस्येत्यस्यानुमितेरिति स्मृतेरिति वाऽर्थः ।

स०— सुषुप्तौ सुखाभावात् दुःखाभावविषयोऽयं परामर्श इति परोक्तं प्रसङ्गादपाकरोति ।

अत एवेति ॥

प०— सुप्तावात्मनः प्रकाशमानत्वेसत्यविद्याकार्यान्तःकरणतद्धर्माणां दुःखादीनामप्युपलब्धि-प्रसङ्ग इत्याशङ्क्य निराह ॥ **नचेति** ॥ **तदभावादिति** ॥ अविद्याकार्यस्याभावादित्यर्थः ॥ **ह्यस्तन इव** पूर्वदिवस इव । नन्वनुभूतं स्मर्तव्यमेवेति न नियम इत्यत आह ॥ **अनुभूत इति** ॥ आत्ममात्रत्वा

त्स्मर्येतेत्यन्वयः । अहङ्कारस्मरणाभावोऽसिद्ध इति परिहरति ॥ **सुखमहमित्यादिना** ॥ **सुखानुभवेति** ॥ सुखानुभवजन्यपरामर्शदर्शनादित्यर्थः ।

या०— न चाविद्याकार्यस्यापीत्यनन्तरमहंकारस्येति शेषः । सुप्तेऽप्यहमवभासाङ्गीकारे पूर्वेसिन्दिनेऽहमिति मन्यमान एवासमितिवत्सुप्तिकालेऽनुभूतस्याप्यहङ्कारस्य जागरणे स्मृतिः स्यादिति शङ्कते ॥ **तथा सतीति** ॥ अनुभूतस्य सर्वस्य स्मरणनियमाभावान्न जागरेऽहङ्कारस्मरणमित्यत आह ॥ **अनुभूत इति** ॥ अन्यथा तत्स्वरूपभूतस्यात्मनोऽप्यस्मरणं स्यादित्यर्थः । अहंकारस्य स्मरणाभावोऽसिद्ध इति परिहरति ॥ **सुखमहमित्यादिना** ॥ **सुखानुभवेति** ॥ सुखानुभवजन्यपरामर्शदर्शनादित्यर्थः । दुःखाभावविषयोऽयं परामर्श इति परोक्तं प्रसङ्गादपाकरोति ॥ **अत एवेति** ॥

श्री० — **तदात्मन इति** ॥ आत्माभिन्नत्वाच्चाहमर्थस्येत्यर्थः । सिद्धान्ती प्रतिबन्दीमाशङ्कते ॥ **न चेति** ॥ अविद्याकार्यस्येत्यनन्तरं अहङ्कारस्येति शेषः । तदानीं सुप्तौ । प्रसङ्गस्त्वन्मतेऽपीति शेषः ॥ **तदभावादिति** ॥ अविद्यापरिणामाहङ्कारस्य सुप्तावभावादित्यर्थः ॥ **अनुभवपरामर्श इति** ॥ अनुभवजन्यः परामर्शः स्मृतिरित्यर्थः । एवं सुखस्मरणकालेऽहमुल्लेखोऽप्यस्त्येवेति भावः ॥ **स्पष्टेति** ॥ सुखं यथा स्यात्तथा स्वापकर्तृतयाऽहंत्वप्रकारेण स्पष्टं सुखस्मरणमित्यर्थः ॥ **विषयविशेषेति** ॥ सुखसाधनीभूतकदलीफलादिरूपविषयविशेषसम्बन्धतया सुखस्मरणमित्यर्थः । दूषणान्तरमाह ॥ **नचायमिति** ॥ तथा च विषयविशेषरूपसम्बन्धिसहितं न स्मर्यत इति भावः । अत्र यत्केनचिदुक्तं सुखमहमस्वाप्समिति न सुखपरामर्शः सुखस्य विषयजन्यत्वेन विषयविशेषोपरक्ततया स्मर्यमाणत्वाभावाद्दुःखाभावविषयक एवेति तदप्यत एवापास्तम् ॥ सौषुप्तिकसुखस्य विषयजन्यत्वाभावादेवेत्याह ॥ **अत एवेति** ॥

सु० — **यस्त्वथातोऽहङ्कारादेशोऽथात आत्मादेश इत्यात्माऽहङ्कारयोर्भेदवचनं तद्भाष्यकृतैवान्यथा व्याख्यातम्** । **वक्ष्यति च सूत्रकारः सैव हि सत्यादय इति** । **कथमन्यथाऽहङ्कारस्य सर्वगतत्वमुपपद्येत** । **महाभूतान्यहङ्कारइत्यादिस्मृतिसिद्धस्त्वहङ्कारो यद्यप्यात्मनो भिन्नः । तथाऽपि नासावहं कर्तेत्युल्लेखविषयः । तथा सति अहंब्रह्मास्मीत्यादावपि तथात्वप्रसङ्गात् । अत्रापि यः स्थाणुः स पुरुष इतिवद्व्याख्यानमिति चेन्न । तदाऽऽत्मानमेवावेदहंब्रह्मास्मीति निरवद्यस्य ब्रह्मणोऽप्यहमुल्लेखदर्शनात् । 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते**

शब्दतोऽप्यनयोर्भेदः । यत्प्रकृतिपरिणामवाचि मकारान्तमव्ययमहंपदं न जातु तदात्मनि प्रयुज्यते । यच्चात्मवाचि दकारान्तास्मच्छब्दजं तन्न कदाचिदपि मायापरिणामे प्रयुज्यत इति । तदेवं सर्वमिथ्यात्वपरत्वे श्रुतेरेव मिथ्यात्वप्रसङ्गेनासाधकत्वापत्तौ दुःखादिबन्धमिथ्यात्वासिद्ध्या न प्रत्यक्षमतत्त्वावेदकमिति । नन्वग्रत इति कथम् । नेहनानेतिवाक्येनात्मातिरिक्तं सकलमपि मिथ्येत्येकैव बुद्धिरुत्पद्यते । न च बुद्धेर्विरम्यव्यापारोऽस्ति । यावत्स्वविषयगोचराया एव तस्याः समुत्पादात्तदतिरिक्तव्यापाराभावादिति । सत्यम् । वाक्येन सकृदेव जातायाः सकलमिथ्यात्वविषयाया बुद्धेः प्रामाण्यावधारणाय परीक्षकबुद्धय एव तद्विषयं बुद्ध्या विभज्य क्रमेणावगाहन्त इत्यदोषः । समानमेतद्यावज्जीवमहं मौनीत्यादिवाक्यप्रामाण्यचिन्तायामिति ।

वा०—'भूमा नारायणाख्यः स्यात्स एवाहङ्कृतिः स्मृतः । जीवस्थस्त्वनिरुद्धो यः सोहङ्कार इतीरितः । अणुरूपोऽपि भगवान्वासुदेवः परो विभुः । आत्मेत्युक्तः स च व्यापी'त्यादिस्मृत्युदाहरणपूर्वं छान्दोग्यभाष्यकृदन्यथाव्याख्यानेन परोदाहृतश्रुतेः सावकाशतामाह ॥ **यच्चेति** ॥ भाष्योदाहृतस्मृतौ विप्रतिपन्नं प्रति सूत्रीयज्ञापकमाह ॥ **वक्ष्यतीति** ॥ सूत्रार्थे विमतं प्रति भाष्योक्तश्रुत्यर्थानभ्युपगमे बाधकमाह ॥ **कथमिति** ॥ यः स्थाणुत्वेन भ्रमविषयः स पुरुष इतिवद्योऽहमिति भ्रमविषयस्तद्ब्रह्मेति श्रुतिर्व्याख्यायते इति शङ्कते ॥ **अत्रापीति** ॥ **निरवद्यस्येति** ॥ शुद्धस्य भ्रमासम्भवे हेतुकथनम् । ननु नेहनानेतिवाक्यस्य दुःखादिसमस्तविश्वमिथ्यात्वसाधकत्वाभावस्यैतद्वाक्यमिथ्यात्वसिद्ध्यधीनतया तत्सिद्धेश्च प्रमाणान्तराभावेनैतद्वाक्येनैव वक्तव्यतयैतेन चैतद्वाक्यस्य मिथ्यात्वसिद्धिदशायामर्धजरतीयायोगेन समस्तस्यापि मिथ्यात्वसिद्धेस्तत्साधकत्वाभावापादनासम्भवात् । अनेनैतद्वाक्यमिथ्यात्वासिद्धौ च तदधीनसिद्धिकसमस्तमिथ्यात्वासाधकत्वस्य सुतरामसम्भवान्नोपपत्तिविरोधकथनं युक्तम् । न च अत एवैतद्वाक्यमिथ्यात्वमेतद्वाक्येन प्रथमं बोद्ध्यते समस्तमिथ्यात्वं तु पश्चादिति ज्ञापयितुमग्रत इति भाष्यकारेणोक्तमिति वाच्यम् । तस्यैवानुपपत्तेरिति शङ्कते ॥ **नन्विति** ॥ वाक्यजन्यसकलविषयकबुद्धिविषयं विविच्य क्रमेणावगाहमानाः प्रामाण्यावधारणाय प्रवृत्ताः परीक्षकबुद्धीरननुसृत्योपपत्तिविरोधखण्डने 'यावज्जीवमहं मौनी'त्येतद्वाक्यस्य समस्तवाक्याभावसाधकत्वाभावसिद्धेरेतद्वाक्याभावसिद्धिनिबन्धनतयैतद्वाक्याच्चैतदभावसिद्धिदशायां समस्ताभावस्यापि सिद्धेरेतद्वाक्याभावसिद्धेः प्राथमिकत्वाभावान्न तत्रापि

स० —अन्यथा व्याख्यातमिति ॥ जीवस्थस्त्वनिरुद्धाख्यः सोऽहङ्कार इतीरितः । अणुरूपोऽपि भगवान् वासुदेवः परो विभुः । आत्मेत्युक्तः स च व्यापी न च भेदो हरौ क्वचिदित्यादिना परमेश्वर-रूपविषयतया छान्दोग्यभाष्ये व्याख्यातमित्यर्थः ॥ **वक्ष्यति चेति** ॥ सैव परदेवता सत्यादय इति सत्या-द्यहमात्मान्तानां परदेवतात्वमित्यर्थः । यदि सत्यादीनां परमात्मत्वं न स्यात्तर्हि स एवाधस्तादित्यादिनोच्य-मानव्याप्तत्वं अयुक्तं स्यादित्याह ॥ **कथमिति** ॥ यथा यः स्थाणुत्वेनावगतः स विवेके सति पुरुष इति व्याख्यायते तथा योऽहङ्काराध्यासमुपगतः स आत्मतत्त्वज्ञाने सति ब्रह्मैवेत्यहंब्रह्मास्मीत्येतद्व्याक्रियते ॥ **अत्रापीति** ॥ तर्ह्यत्राहङ्काराध्यासो नास्ति तत्र श्रुतिस्मृतिसिद्धोऽहंप्रत्ययो न स्यादित्याह ॥ **नेति** ॥ **तदतिरिक्तव्यापाराभावादिति** ॥ तथा च प्रथमत एवैतद्वाक्यमिथ्यात्वस्फूर्त्यभावेन सकलमिथ्यात्व-बोधानन्तरं च प्रमिते विरोधस्याकिंचित्करत्वान्नोपपत्तिविरोधेन तद्वाक्याप्रामाण्यमिति भावः । सकल-मिथ्यात्वविषयाया बुद्धेः प्रामाण्यावधारणाय परीक्षकबुद्धीनामेव सकलमिथ्यात्वविषयकबुद्धिविषयं विभज्यावगाहकत्वादेतद्वाक्यमिथ्यात्वस्य प्रथमं स्फूर्तिसंभवादुपपत्तिविरोधप्रसक्तिः संभवतीत्यत आह ॥ **सत्यमिति** ॥ अथैतदनङ्गीकृत्य सकलमिथ्यात्वबोधस्यैव जननान्नोपपत्तिविरोध इति ब्रूयात्तदा विरुद्धत्वेना-प्रामाण्येन च संप्रतिपन्ने यावज्जीवमहं मौनीत्यादावपि यावज्जीवं सकलवचनाभावविषयकबुद्धेरेकस्या एवोत्पादात् प्रमिते च विरोधस्याकिञ्चित्करत्वादप्रामाण्यं न स्यादित्याह ॥ **समानमेतदिति** ॥ अथ तत्र सकलवचनाभावविषयकबुद्धिप्रामाण्यावधारकपरीक्षकबुद्धीनामेव पूर्वं तद्बुद्धिविषयस्य विभागेनावगाहक-त्वादेतद्वाक्याभावस्य प्रथमोपस्थितेस्तत्र विरोधस्फूर्तिर्भविष्यतीत्यत्राप्रामाण्यमेवेति मतं तर्हि प्रकृतेऽपि तथा स्यादिति भावः ।

प०— नन्वहमर्थस्यात्मत्वे छान्दोग्ये सप्तमे 'यो वै भूमा तत्सुखमि'ति भूमशब्दितब्रह्मण आदेशोक्त्यनन्तरमथातोऽहङ्कारादेश इत्युक्त्वानन्तरं अथात आत्मादेश इत्यात्मनः पृथगुक्त्यनुपपत्तिरित्यत आह ॥ **यश्चेति** ॥ **भाष्यकृतेति** ॥ 'सैव ही'त्येतत्सूत्रभाष्यकृता । 'सत्याद्या अहमात्मान्ता यद्गु-णास्समुदीरिता इति । यथा छान्दोग्यभाष्ये च । 'भूमा नारायणाख्यः स्यात्स एवाहङ्कृतिः स्मृतः आकार्योऽहमिति ह्येष ततोऽहङ्कार उच्यते । जीवस्थस्त्वनिरुद्धो यः सोऽहङ्कार इतीरितः । अणुरूपोऽपि भगवान्वासुदेवः परो विभुः । आत्मेत्युक्तः स च व्यापी न च भेदो हरौ क्वचिदि'त्यादिना भगवद्गुण-परत्वेन रूपविशेषपरत्वेन च व्याख्यातमित्यर्थः । आत्माहङ्कारयोर्भेदे सूत्रविरोधमप्याह ॥ **वक्ष्यतिचेति** । सैव परदेवता सत्यादय इति सत्याद्यहङ्कारात्मान्तानां परदेवतात्वं च वक्ष्यतीत्यर्थः । श्रुतिगताहङ्कारपद-स्येश्वरपरत्वाभावेऽहमेवाधस्तादिति वाक्यशेषे तस्य सर्वगतत्वप्रतिपादनं न घटत इत्याह ॥ **कथमन्य-**

थेति ॥ स उपरिष्टादित्यादिना पूर्णत्वं भगवतोन्यस्याहङ्कारस्योपदिशतीति न युज्यत इत्यादि छान्दोग्यभाष्योक्तं किञ्चिदाह ॥ **कथमन्यथेति** ॥ ननु 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचरा' इति त्रयोदशे गीतायां अन्यत्राप्यहङ्कारपदप्रयोगो दृष्ट इत्यत आह ॥ **महाभूतानीति** । श्रुतिसिद्धाहङ्कारतत्वस्याहमित्युल्लेखविषयत्वे बाधकमाह ॥ **तथासतीति** ॥ ब्रह्माहङ्कारयोरैक्यमनभिमतमापतेत् । न जीवब्रह्मैक्यमभिमतमित्याशयः । नन्वहं ब्रह्मेत्यादावपि यदहन्त्वेन प्रतीतं तद्ब्रह्मेति व्याख्यानमस्तु । यः स्थाणुत्वेन प्रतीतः स पुरुष इतिवत् । एवं चाहं ब्रह्मेत्यादावप्यहमर्थस्यानात्मत्वेपि न दोष इत्याशङ्क्य निराह ॥ **अत्रापीति** ॥ **तदात्मानमिति** ॥ तत् ब्रह्म अवेत् व्यजानादित्यर्थः । तत्र जडरूपाहमर्थलेशस्याप्यभावादिति भावेनोक्तं निरवद्यस्येति । अहमित्युल्लिख्यमानस्य जडाहङ्कारभूतत्वाभावं प्रकारान्तरेण व्यनक्ति ॥ **मामेवेति** ॥ गीतायां कृष्णवाक्यमेतत् । शब्दतोपि भेद इत्युक्तं व्यनक्ति ॥ **यदिति** ॥ **अस्मच्छब्दजमिति** ॥ अस्मच्छब्दस्य त्वाहौसाविति मपर्यन्तस्याहादेशे अतो गुण इति पररूपे शेषे लोपे ङेप्रथमयोरमिति सुपोऽमादेशे अमि पूर्वरूपे अहमिति जातत्वात् । अतएव पञ्चमस्य तृतीयपादान्ते 'अहंशुभमोर्युसि'त्यत्र सूत्रे वृत्तौ अहमितिशब्दान्तरं मकारान्तमव्ययमहङ्कारे वर्तत इत्युक्तम् । मञ्जर्यामपि त्वाहौसावित्यहादेशे योऽहंशब्दः तदपेक्षया शब्दान्तरमस्तीत्युक्तमिति भावः । सम्यग्विवृतमेतत् यदप्यहङ्कारस्येत्यादिनोक्तं प्रमेयं सर्वं न्यायामृते अहमर्थस्यानात्मत्वभङ्गे । न प्रत्यक्षमतत्वावेदकमितीतिशब्दो मूलतात्पर्योक्तिसमाप्तौ ॥ **अग्रत इति** ॥ कथमित्याक्षेपं व्यनक्ति । नेहनानेत्यादिना सत्यमित्यन्तेन । नन्वग्रत इत्युक्तिः परीक्षकबुद्धिक्रमापेक्षया चेत्तर्हि वाक्यं युगपदेव स्वस्य स्वव्यतिरिक्तसर्वस्य मिथ्यात्वं प्रतिपादयतीत्यभ्युपगतम् । तथाच कुतो वाक्यस्योपपत्तिविरोधः । येन प्रतीतार्थे प्रमाणं न स्यादित्यत आह ॥ **समानमेतदिति** ॥ यथा यावज्जीवमहं मौनीतिवाक्यं स्वक्रियाविरुद्धत्वादप्रमाणम् । एवं नेहनानेत्याद्यपि वाक्यमहमन्यच्चासदितिवत्स्वक्रियाविरुद्धत्वादमानमेव । स्वस्यासत्त्वे स्वयमन्यच्चासदिति बोधजनकत्वायोगात् । बोधजनकत्वेऽसत्त्वायोगात् । नाहं कदापि क्वापि असीतिव्याहतत्वादप्रमाणमेव भवति । अन्यथा यावज्जीववाक्यमपि मानं स्यादिति भावः । इतिशब्दो वाक्यव्याख्यासमाप्तौ ॥

या० — आत्माऽहङ्कारयोर्भेदः श्रुतिसिद्ध इत्याशङ्क्याह ॥ **यत्त्विति** ॥ **अन्यथा व्याख्यातमिति** ॥ 'भूमा नारायणाख्यः स्यात्स एवाहंकृतिः स्मृत' इत्यादिनाऽऽत्माऽहङ्कारशब्दवाच्यो भगवानेवेति छान्दोग्यभाष्ये व्याख्यातमित्यर्थः । आत्माऽहङ्कारयोर्भेदे सूत्रविरोधमप्याह ॥ **वक्ष्यति चेति** ।

श्चरत्वाभावेऽहमेवाधस्तादित्यादिवाक्यशेषे तस्य सर्वगतत्वप्रतिपादनं नोपपद्यत इत्याह ॥ **कथमन्यथेति** ॥ स्मृतिसिद्धाहङ्कारतत्त्वस्याहमित्युल्लेखविषयत्वे बाधकमाह ॥ **तथा सतीति** ॥ ब्रह्माहङ्कारयोरैक्यमनभिमतमापतेत् । अभिमतं च जीवब्रह्मैक्यं न सिध्येदित्याशयः ॥ **अत्रापि यः स्थाणुरिति** ॥ यः स्थाणुत्वेन प्रतीतः स विवेके सति पुरुष इतिवद्योऽहङ्काराध्यासमुपगतः स आत्मज्ञाने सति ब्रह्मेति व्याख्यानमित्यर्थः ॥ **निरवद्यस्येति** ॥ अहङ्काराध्यासशून्यस्येत्यर्थः । यदा स्वप्रपन्नानां मायानिरसनसमर्थस्तदा स्वस्याहङ्काराध्यासो नास्तीति किं वक्तव्यमित्यभिप्रेत्य स्वप्रपन्नमायेत्याद्युक्तम् । प्रथमतो जाताया बुद्धेः प्रामाण्यावधारणाय परीक्षकबुद्धय इत्याद्युक्तम् । क्वाप्यनुपलब्धं कथमत्र कल्पनीयमित्याशङ्कायामाह ॥ **समानमेतदिति** ॥ अयमर्थः । यद्यतद्वचनबलेन स्वकर्तृकसर्ववचनाभावः स्यात् । तर्ह्येतद्वचनस्य प्रथमं तावन्मिथ्यात्वं भवेत् । अन्यथा स्वस्मिन्नेवास्य प्रामाण्यं प्रतिहतमिति न वचनान्तराभावं प्रतिपादयेत् । यदि चेदं वाक्यं मिथ्या स्यात्तथाऽपि नानेन स्वकर्तृकसर्ववचनाभावसिद्धिः । मुख्याभूतस्य वन्ध्यासुतवचसः साधकत्वादर्शनादित्युपपत्तिविरोधेऽभिहिते एतद्वाक्येन सकलवचनाभावविषयाया बुद्धेरेकस्या एवोत्पत्तेस्तावदेव तद्वाक्यस्य प्रथमं मिथ्यात्वं भवेदिति कथमुक्तमित्याशङ्कायां वाक्येन सकृदेव जाताया बुद्धेः प्रामाण्यावधारणायं परीक्षकबुद्धय एव तद्विषयं बुद्ध्या विभज्य क्रमेणावगाहन्त इत्येव वक्तव्यमिति नादृष्टकल्पनेति ॥

श्री० — **तथात्वेति** । प्रकृतिकार्याहङ्कारतत्त्वस्यैवाहंब्रह्मास्मीति श्रुतावहमुल्लेखविषयत्वप्रसङ्गेनाहङ्कारतत्त्वब्रह्मणोरैक्यापत्त्या जीवब्रह्मैक्यं त्वदभिमतमनया श्रुत्या न सिद्धेदित्यर्थः । अत्रापि अहंब्रह्मास्मीति श्रुतौ ॥ **मकारान्तमव्ययमिति** ॥ प्रकृतिपरिणामाहङ्कारतत्त्ववाचिनोऽहंपदस्याव्ययत्वे द्वितीयस्त्वहमः सर्ग इत्यत्राहम इति षष्ठीप्रयोगो न स्यात् । न चाव्ययत्वेऽपि तु नायमर्थः सूचितः । तस्यायमर्थ इत्यादिप्रयोगानुपपत्तिरिति । तत्र स्वरूपं शब्दस्येति परिभाषया तु नेत्यादेः शब्दपदार्थकत्वेनार्थपदार्थकत्वाभावात् । अहम इत्यत्र स्वार्थस्यैव विवक्षितत्वेन शब्दस्याविवक्षितत्वात्कथमेतदिति चोद्यस्य समाधानं विचार्यम् । वैदिकत्वाद्वा विभक्तिप्रतिरूपकाव्ययत्वसमाधिरित्यप्याहुः ।

च० — **व्याख्यातमिति** ॥ छान्दोग्यभाष्ये भूमा नारायणः साक्षादित्यादिनेति भावः । वक्ष्यतीति ॥ सत्याद्यात्मान्तानां परमात्मरूपतामभिधास्यतीत्यर्थः । **अत्रापि** अहंब्रह्मास्मीत्यादावपि । **यः स्थाणुरिति** ॥ यः विशेषादर्शनदशायां स्थाणुत्वप्रकारकप्रतीतिविषयः सः तद्दर्शनदशायां पुरुष इति यथा तद्वदात्मज्ञानाभावदशायामहंत्वप्रकारकप्रतीतिगोचरस्तत्समवधानदशायां ब्रह्मेति व्याख्यानमित्यर्थः

अवत् व्यजानात् । **निरवद्यस्य** अहङ्कारार्थ्यासावानमुक्तस्य ॥ **मकारान्तमव्ययमिति** ॥ अहंशुभया
र्युसितिसूत्रे अहमिति शब्दान्तरं मकारान्तमव्ययमहङ्कारे वर्तते इति वामनः काशिकायामभ्यधात्
स्वाहौसावित्यसदादेशो योऽहंशब्दस्तदपेक्षया शब्दान्तरमस्तीति रुद्रदत्तोऽपि मञ्जर्यामिति भावः
विरम्य व्यापारः । कतिपयार्थविषयीकरणोत्तरार्थान्तरविषयीकरणाख्यः ॥ **समुत्पादादिति** ॥ ज्ञानं
गुणः शब्दो गुण इत्यादिवाक्यजन्यशाब्दधीवदिति भावः ॥ **तदतिरिक्तेति** ॥ विषयीकरणातिरिक्ते
त्यर्थः ॥ **बुद्धेः प्रामाण्यावधारणायेति** ॥ बुद्धिनिष्ठविशेष्यतानिरूपितमिथ्यात्ववद्विशेष्यकत्वावच्छिन्न-
मिथ्यात्वप्रकारकत्वरूपमिथ्यात्वघटितप्रामाण्यनिष्ठप्रकारताकेत्यर्थः ॥ **तद्विषयमिति** ॥ मिथ्यात्वबुद्धि
तदिति परामृशति । तस्याः विषयं विषयान् । मिथ्यात्वधर्मिभूताः व्यक्तीस्तत्तद्व्यक्तित्वादिना तद्व्य-
क्तिविशेष्यकत्वावच्छिन्नमिथ्यात्वप्रकारकत्वैतद्व्यक्तिविशेष्यकत्वावच्छिन्नमिथ्यात्वप्रकारकत्वादिरूपतद्व्यक्ति-
घटितप्रामाण्यघटकतया क्रमेणावगाहन्त इति भावः । उक्तसकलमिथ्यात्वबुद्धौ तत्तद्व्यक्तिघटितप्रामाण्या-
वगाहिनीनां नानात्वं परीक्षकबुद्धय इति बहुवचननिर्देशेन ध्वन्यते । तेन विरम्य व्यापारायोगादिति-
दोषानवकाशः । इयांस्तु विशेषः यद्व्यक्तिविशेष्यकत्वादिघटितप्रामाण्यज्ञानजनिकादृष्टादिघटितसामग्री
प्राथमिकी तद्व्यक्तिघटितप्रामाण्यज्ञानस्य प्राथम्यं यस्यत्वानन्तरिकी तस्यानन्तर्यमिति । उक्तमर्थं निदर्शनेन
द्रढयति ॥ **समानमेतदिति** ॥ अयमभिसन्धिः । निखिलवचनान्तर्गते स्वस्मिन् यदि न मिथ्यात्वं
प्रतिपादयेत् तदा वचनान्तराणां मिथ्याभावं कथं तत्र तत्प्रतिपादकतायां च वन्ध्यासुतवचःकल्पतया
तस्य निखिलवचनान्तरधर्मिकमिथ्यात्वप्रकारकप्रतीतिजनकता कथं सङ्गच्छेतेत्युपपत्तिविरोधोद्भावने प्रकृत-
वाक्यजनितान्वयबुद्धेर्निखिलवचनाभावविषयिण्या एकस्या एव समुत्पादेन प्रकृतवाक्यस्य मिथ्यात्व-
प्रतिपत्तेः निर्वाहाय तादृशवाक्यजनितजीवनाधिकरणकालत्वव्यापकतत्कर्तृत्ववचनावच्छिन्नाभावबुद्धेः
प्रामाण्यमवगाहमानाः परीक्षकबुद्धय एव दर्शितदिशा तत्तद्वचनव्यक्तीरुक्तविधप्रामाण्यघटकतया तत्त-
द्व्यक्तित्वेन क्रमेणावगाहन्त इति समाधातव्यमिति नादृष्टपरिकल्पनावकाश इति ॥

अनु० — मिथ्यायाः साधकत्वं च न सिद्धं प्रतिवादिनः ॥

सु० — ननु श्रुत्यादेर्मिथ्यात्वेऽपि साधकत्वं संभवति । मया मिथ्याभूतस्यैव साधक-
त्वाभ्युपगमादित्यत आह ॥ **मिथ्याया इति** ॥ याः श्रुत्यादिवाचो मिथ्या तासामिति योजना ।
विभक्तिप्रतिरूपकं वा मिथ्याया इत्यव्ययम् । अयमभिसन्धिः । नेहनानेत्यादिवाक्यैः किं
पुमाभिश्रिताद्वैतो बोध्यते । उत तद्विपरीतः । नाद्यः । वैयर्थ्यात् । द्वितीयस्तु सत्यस्यैव

साधकत्वमिति मन्यमानो यदीदं वाक्यं सकलमिथ्यात्वं प्रतिपादयेत्तदा सकलान्तर्गतत्वात्स्वयमपि मिथ्या स्यात् । यथा 'शब्दोऽनित्य'इतिशब्दोऽनित्यः । यदि चैतद्वाक्यं मिथ्या स्यान्न कस्याप्यर्थस्य साधकं स्यादित्यनिष्टप्रसङ्गं पश्यन्कथं त्वदभ्युपगममात्रेण स्वतर्कस्य विरुद्धतां प्रतिपद्येतेति । ननु वाक्यस्य साधकत्वं नाम पदार्थसंसर्गप्रमितिजनकत्वम् । तत्क्वचित्पददोषेण विहन्यते । क्वचित्सङ्गत्यग्रहणात्क्वापि तद्विस्मरणात्कदाचिदाकाङ्क्षादिविरहात्कुत्रचिद्विपरीतप्रतिपादनेन । तदत्रापि नेहनानेत्यादिवाक्ये साधकत्वाभावमापादयता पददोषाद्यन्यतममेवापादकमुपादेयम् । किं मिथ्यात्वेन । तत्किमविद्यमानस्यापि वाक्यस्य निर्दोषपदावयवत्वादिकं विद्यत इति वक्तुमुद्यतो भवान् । एवं च वदता भवता कस्मिंश्चन विप्रतिपन्नेऽर्थे वन्ध्यासुतवचनं प्रमाणयन्तं प्रतिवादिनं प्रति नूनं पददोषादिकमेवोपपाद्य साधकत्वं दूषयिष्यते । स्वरूपस्यैवाभावेनासाधकत्वे सिद्धे किं तत्र चरमभाविन्या पददोषादिचिन्तया । न हि शब्देऽविद्यमानत्वेनैव चाक्षुषत्वस्यानित्यत्वसाधकत्वाभावे सिद्धे व्याप्तिचिन्ता क्रियत इति चेत् । समं प्रकृतेऽपि । ननु मा भूत्प्रतिवाद्यपेक्षया तर्कस्य विरुद्धता । वाद्यपेक्षया तु भविष्यति । मैवम् । वादिनाऽपि हि श्रुतिवाक्येनात्मातिरिक्तस्याखिलस्य मिथ्यात्वं प्रतिपद्य मिथ्याभूतस्यापि साधकत्वमिति प्रतिपत्तव्यम् । सोऽपि हि प्राक् सकलमिथ्यात्वबोधात्प्रतिवादितुल्य एव । तथाच श्रुतेः सर्वमिथ्यात्वप्रतिपादकत्वे मिथ्याभूतस्यैव साधकत्वं प्रतीत्य तद्विरोधेन तर्को निरसनीयः । तन्निरासे च श्रुतेः सर्वमिथ्यात्वप्रतिपादकत्वमित्यन्योन्याश्रयमनुत्तीर्णः कथमसावपि तर्कस्य विरुद्धतां प्रतिपद्येत ।

वा०—तर्कस्य विरुद्धतां शङ्कते ॥ नन्विति ॥ मिथ्यात्वेऽपीत्यपिशब्दो न सत्यत्वसमुच्चयार्थेऽपि तु मिथ्यात्वेऽङ्गीकृतेऽपि न साधकत्वानुपपत्तिः प्रत्युत तत्रैव तत्संभव इत्यर्थः । अत एव तथैव हेतुमाह ॥ मयेति ॥ मिथ्याशब्दस्याव्ययत्वाद्या इति विभज्य योग्यविशेष्याध्याहारेण योजनां दर्शयति या इति ॥ अत्र तद्वाक्यस्येति प्रकृतान्वयसंभवे बहुवचनान्तस्त्रीलिङ्गविशेष्याध्याहारेऽस्वारस्यमभिप्रेत्य पक्षान्तरमाह ॥ विभक्तीति ॥ विभक्त्यन्ततुल्यमित्यर्थः । मिथ्याशब्दस्य मृषेत्यादिवत्कस्याश्चिन्नामतया मिथ्याया इत्यस्य विभक्त्यन्ततया तत्प्रतिरूपकत्वाद्वाऽतिचिरायेत्यादिविभक्त्यन्तप्रतिरूपकस्य चिरायेत्यादेरिवातिमिथ्याया इत्येतत्प्रतिरूपकत्वाद्वेदमुक्तमिति द्रष्टव्यम् । ननु मया मिथ्याभूतस्यैव

मिथ्याभूतसाधकत्वस्य वादिनाऽभ्युपगतत्वादेव प्रतिवादिनं प्रति विरुद्धत्वाच्च बीजाभावेन प्रतिवादिनं प्रति तर्कस्याप्रसराच्चायुक्तश्चायं तर्कः। आत्मातिरिक्तस्य समस्तस्य मिथ्यात्वं श्रुत्यादिबलेन यदि तर्ह्येतच्छ्रुत्यादेर्मिथ्यात्वं स्यादित्यत्र दृष्टान्तानुक्त्यर्थाद्व्याप्त्यभावात्। यदि चेदं वाक्यं मिथ्या स्यात्तर्हि दुःखादेर्मिथ्यात्वं न प्रतिपादयेदित्यत्र विशेषनिषेधेऽपि सामान्यतोऽर्थप्रतिपादकत्वस्याक्षतेश्चेत्यतो वादिनं प्रति तर्कस्य विरुद्धत्वाभावेऽपि तदीयमिथ्याभूतसाधकत्वाभ्युपगमस्य मिथ्यात्वनिश्चयाधीनतया तन्निश्चयस्य च वक्ष्यमाणरीत्याऽन्योन्याश्रयेणैतद्वाक्यसाध्यत्वासम्भवात्प्रमाणान्तरेण मिथ्यात्वं निश्चित्य मिथ्याभूतस्य साधकत्वमभ्युपगच्छन्तं प्रति तर्कस्य विरुद्धतयोपपत्तिविरोधाभावेऽपि ज्ञातज्ञापकतया तं प्रति मिथ्यात्वबोधकत्वेन न परार्थवाक्यस्य प्रामाण्यम्। तद्बोध्यं निश्चितद्वैतं प्रति च पराभ्युपगममात्रस्याप्रयोजकत्वात्तर्कस्याविरुद्धत्वेनोपपत्तिविरोधान्न मिथ्यात्वबोधकत्वम्। एवं च यो वाक्यबोध्यो न तं प्रति तर्कस्य विरुद्धता यं प्रति विरुद्धता न स वाक्यबोध्य इत्युभयथापि वाक्यस्याबोधकत्वमेवेत्यभिप्रेत्य सत्यस्यैव साधकत्वाभिमानरूपं तर्कबीजं दर्शयन्नेव वाक्यबोध्यं प्रति तर्कस्वरूपतत्प्रवृत्तिप्रकारौ दर्शयति ॥ **अयमिति** ॥ अत्र सकलान्तर्गतत्वादित्यनेन सकलस्य यद्भवति तदन्तर्गतस्यापि तद्भवतीति सामान्यव्याप्तिसूचनम्। यथेति तत्रैव दृष्टान्तोक्तिः। न कस्यापीत्यनेन पूर्वं प्रकृतोपयुक्ततया विशेषोपादानेऽपि सामान्य एव तात्पर्यमिति सूचयति। ननु साधकत्वपदार्थपर्यालोचनायां पददोषादीनामेव साधकत्वाभावोपपादकत्वप्रतीत्या साधकत्वाभावमापादयतस्तेषामेवोपादेयत्वेऽपि मिथ्यात्वस्याप्रयोजकत्वेनोपपादकत्वाभावादनुपादेयत्वेन सत्यस्यैव साधकत्वं न मिथ्याभूतस्येत्यभिमानासम्भवेन तर्कबीजाभावात्तं प्रत्यपि तर्कस्याप्रसर एवेत्याशयेन शङ्कते ॥ **नन्विति पददोषेणेति** ॥ स्वरवर्णादिहीनतादिरूपेणेत्यर्थः। मिथ्यात्वस्य पददोषादेश्चासाधकताप्रयोजकत्वेऽपि मिथ्यात्वाभाव एव दोषादेर्गवेषणीयत्वेन प्रथमभावित्वान्मिथ्यात्वमेव मुख्यमसाधकताप्रयोजकमित्येतत्परमुखेनैव दृढीकर्तुं मिथ्यात्वमप्रयोजकीकृत्य पददोषादेरेवासाधकत्वे प्रयोजकत्वं वदता प्रकृतवाक्यस्य मिथ्यात्वेऽपि पददोषाद्यभावात्साधकत्वमित्युक्तं स्यादित्याह ॥ **तत्किमिति** ॥ निर्दोषः पदरूपावयवो अस्य तत्त्वमित्यत्र निर्दोषपदत्वमिति वक्तव्येऽवयवग्रहणमविद्यमानस्यावयवाः सन्तीत्येतद्व्याहतमिति सूचयितुमिति ध्येयम्। अस्तु तथा तथाऽपि को दोष इत्यत आह ॥ **एवं चेति** ॥ ननु मिथ्यात्वमप्रयोजकीकुर्वतोऽपि मम नासत्त्वमप्रयोजकमित्यभिमतम्। एवं च वन्ध्यासुतवचसोऽसत्त्वेनासाधकत्वेऽपि न प्रकृतवाक्यस्य तथा। तस्य मिथ्यात्वेऽप्यनिर्वचनीयत्वेनासत्त्वाभावादिति गूढाभिसन्धिर्वैषम्यं शङ्कते ॥ **स्वरूपस्यैवेति** ॥ अनिर्वचनीयत्वस्य वक्ष्यमाणरीत्याऽनुपपन्नत्वेनासत्त्वस्यैव वक्तव्यतया साम्यमेवेति गूढाभिसन्धिरेव परिहरति ॥ **सममिति** ॥ अनेन तर्केऽप्रयोजकत्वादिकमपि निरस्तम्। न च

ननु वाक्यस्येत्यादिग्रन्थस्तर्केऽप्रयोजकत्वान्यथासिद्धिशङ्कातत्परिहारपरत्वेनैव किं न व्याख्यायत इति वाच्यम् । विरुद्धतापरिहारकपूर्वोत्तरग्रन्थमध्यस्थस्य तत्सङ्गतस्यास्यार्थादप्रयोजकत्वादिनिरासकत्वस्यैव युक्तत्वात् । इमे च शङ्कासमाधाने मिथ्यायाः साधकत्वं चेति मूले मिथ्यात्वस्यैव साधकत्वाभावे प्रयोजकत्वोक्त्या सूचिते इति द्रष्टव्यम् । ननु मां प्रति तर्कस्य विरुद्धतायास्त्वयाप्यभ्युपगमान्मयैव मदपेक्षया तर्कस्य विरुद्धताऽन्यतरासिद्ध्यादेरिव परं प्रत्युद्भावयिष्यत इत्याशङ्क्य प्रमाणान्तरेण तवाद्वैतनिश्चयमभ्युपगम्य त्वां प्रति तर्कस्य विरुद्धता स्वीकृता । वस्तुतस्तु सकलमिथ्यात्वबोधकप्रमाणान्तरस्याप्येतत्तुल्यतया अनुपपत्तेः साम्यादनेनैव मिथ्यात्वनिश्चये वक्तव्ये तस्य चानुपपत्त्या तवापि न विरुद्धताप्रतिपत्तिरित्याशयेनाह ॥ **नन्वित्यादिना** ॥ इदं च मूलस्थप्रतिवादिशब्दस्य भूतपूर्वप्रतिवादिपरत्वमप्यभिप्रेत्येति द्रष्टव्यम् । अत्र निश्चिताद्वैतो बोध्यत इति प्रथमपक्षस्यैतद्वाक्येन विना द्वैतनिश्चयासम्भवेनैतद्वाक्यस्य च अन्योन्याश्रयतापत्त्या न तन्निश्चायकत्वमिति परिहारे वक्तव्ये तमनुक्त्वा यद्वैय्यर्थ्यादिति परिहारवचनं वाद्यपेक्षया विरुद्धता भविष्यतीत्याशङ्कायाश्च वादिनोऽप्येतद्वाक्येनैव तन्निश्चयस्यान्योन्याश्रयेणासम्भवलक्षणपरिहारवचनं तेन ज्ञायते प्रतिवादिन इत्येतत्स्वारस्यानुरोधेन पूर्वं प्रमाणान्तरेण वादिनो मिथ्यात्वनिश्चयमुपेत्य तं प्रति विरुद्धताऽङ्गीकृता । सम्प्रति प्रतिवादिशब्दस्य तत्तुल्यार्थत्वमभिप्रेत्य प्रमाणान्तरेऽप्येतदनुपपत्तेः साम्यादस्यैव तन्निश्चायकत्वस्य चासम्भवेन तं प्रत्यपि विरुद्धता नेत्युक्तमिति । अन्यथा पूर्वोत्तरविरोधापत्तेरिति द्रष्टव्यम् ।

स० —**विभक्तिप्रतिरूपकमिति** ॥ विभक्त्यन्तप्रतिरूपकं तत्सदृशमित्यर्थः । न चात्र मिथ्याया इति विभक्त्यन्तस्यैवाभावात्तत्सादृश्यकथनायोग इति वाच्यम् । मृषेत्यादिवन्मिथ्येत्यपि कस्याश्चिन्नाम संभवतीति मिथ्याया इत्यस्येति द्रष्टव्यम् ॥

प० —मिथ्यापदस्याकारान्ताव्ययत्वान्मिथ्याया इत्यस्यासाधुत्वमाशङ्क्य द्वेधा गतिमाह॥ **या इत्यादिना** ॥ **विभक्तीति** ॥ यत्किञ्चित्स्त्रीव्यक्त्यादौ सङ्केतितषष्ठ्यन्तमिथ्याशब्दस्य संभवेन तत्प्रतिरूपकमित्युक्तम् । चिरायेत्यादिवदिति भावः । **स्वतर्कस्येति** ॥ यदीदं वाक्यं मिथ्या स्यान्न कस्याप्यर्थस्य साधकं स्यादिति तर्कस्य विरुद्धत्वम् । आपाद्याभावेनापादकस्य व्याप्तत्वलक्षणविरुद्धहेत्वाभासत्वमित्यर्थः । मिथ्यायास्साधकत्वं न चेत्युक्तमयुक्तमिति शङ्कते ॥ **नन्विति** ॥ ननु वाक्यस्येत्यादिना कृतशङ्काया उत्तरमाह ॥ **तत्किमिति** ॥ उद्यतः उद्युक्त इत्यर्थः । बाढमिति वदन्तं प्रत्याह ॥ **एवं च वदतेति** ॥

तत्र तव प्रत्युत्तरमेव न स्यादिति भावः । परमुखेन समाधिं वाचयति ॥ **स्वरूपस्यैवेति** ॥ **प्रतिपद्य** ॥ विज्ञायेत्यर्थः ॥

य०— विभक्तिप्रतिरूपकमिति । न च मिथ्याया इति विभक्तिरेव नास्तीति वाच्यम् । दुःशीलायाः पूर्वं मृषेति नामवन्मिथ्येति यदि कस्याश्चिन्नाम तदैतादृशविभक्तिसम्भवात् । यद्वा चिरायेत्यव्ययस्य विभक्त्यन्तसादृश्योपपत्त्यर्थं परैरचिरायेति विभक्त्यन्तसादृश्यस्य कथितत्वात्प्रकृतेऽपि मिथ्याया इति विभक्त्यन्तसादृश्यं द्रष्टव्यम् ॥

श्री०— अनिष्टप्रसङ्गं अनिष्टापादनरूपं तर्कम् । पश्यन् निश्चिताद्वैतभिन्नः प्रतिवादी ॥ **विरुद्धतामिति** ॥ मिथ्यात्वरूपापादकस्यार्थसाधकत्वाभावरूपापाद्याभावेन व्याप्ततां साधकत्वमिति यावत् । वाक्यस्यासाधकत्वे पददोषादेरेव प्रयोजकत्वेन मिथ्यात्वस्याप्रयोजकत्वाद्यदीदं वाक्यं मिथ्या स्यादिति मिथ्यात्वं नापादकत्वेनोपादेयमित्याशङ्कते ॥ **नन्विति** ॥ पददोषेण अबोधकत्वरूपेण । कुत्रचिदग्निना सिञ्चेदित्यादौ विपरीतप्रतिपादनेन । अर्थाबाधरूपयोग्यताविरहेण ॥ **उद्यतोऽसीति** ॥ वाक्यस्यासाधकत्वे मिथ्यात्वं न प्रयोजकम् । किं नाम पददोषादिकमेवेति शङ्कमानो भवान् अविद्यमानस्य मिथ्याभूतस्यापि वाक्यस्य निर्दोषपदाद्युपेततया साधकत्वमस्ति । मिथ्यात्वस्यासाधकत्वाप्रयोजकत्वादिति वक्तुमुद्यत इत्यर्थः । ओमिति तत्राह ॥ **एवं चेति** ॥ मिथ्यात्वमसाधकत्वेऽप्रयोजकमिति वदतेत्यर्थः । तत्र वन्ध्यासुतवचसि ॥ **सममिति** ॥ अत्रापि मिथ्यात्वेन नेहनानेतिवाक्यस्वरूपस्यैवाभावेनासाधकत्वे सिद्धे किं चरमभाविन्या पददोषादिचिन्तयेत्यर्थः ॥ **तर्कस्येति** ॥ यदीदं वाक्यं मिथ्या स्यान्न तर्हि कस्याप्यर्थस्य साधकं स्यादिति तर्कस्येत्यर्थः ॥ **तन्निरासे चेति** ॥ तर्कविरोधाभावादिति भावः । असौ वादी ॥

च०— विभक्तिप्रतिरूपकमिति ॥ विभक्त्यन्तसदृशमित्यर्थः । चिरमतिक्रान्तोऽतिचिरस्तस्मा अतिचिरायेतिविभक्त्यन्तसदृशच्चिरायेत्यादिवदतिमिथ्याया इति षष्ठ्यन्तप्रतिरूपकत्वान्मिथ्याया इत्यस्यापि साधुता सेत्स्यतीति भावः । प्रतिवाद्यपेक्षया तत्ववाद्यपेक्षया । वाद्यपेक्षया अद्वैतवाद्यपेक्षया ॥

अनु०— **तच्च मिथ्या प्रमाणेन सता वा साध्यते त्वया ।**
सता चेदद्वैतसिद्धिः स्यान्न सिद्धं चान्यसाधनम् ॥

सु० — अथ मतम् । प्रत्यक्षादिकस्य साधकत्वं तावदनुभवसिद्धम् । तन्मिथ्यात्वं श्रुतिभिर्युक्तिभिश्चावगम्यते । मिथ्याभूतस्य साधकत्वमित्येषोऽर्थः कुतः सिद्ध इति मा वोचः एकज्ञानजनितसंस्कारसहकृतस्येतरप्रमाणस्यैव सुरभि चन्दनमितिवद्विशिष्टप्रत्ययजनकत्वोपपत्तेः अथवोभयप्रतिसन्धातुरात्मनो विद्यमानत्वाद्दर्शनस्पर्शनाभ्यामेकार्थग्रहणवद्विशिष्टप्रतिपत्तिर्भविष्यति । एवंच प्रमाणेनैव मिथ्याभूतस्यैव साधकत्वे सिद्धे विरुद्धस्तर्को न मदभ्युपगममात्रेणेत्येतद्दूषयितुं विकल्पेन पृच्छति ॥ तच्चेति ॥ तदिति मिथ्याभूतस्यैव साधकत्वम् । आत्मातिरिक्तस्य मिथ्यात्वमिवेति चशब्दः । सता वा प्रमाणेनेति संबन्धः । यदिदं मिथ्याभूतस्यैव साधकत्वं साधयितुं त्वया प्रमाणद्वयसमाहारात्मकं प्रमाणमुपन्यस्यते । तन्मिथ्या सद्वेति प्रश्नार्थः । सत्त्वपक्षं दूषयति ॥ सता चेदिति ॥ यद्यपि परेणाङ्गीचिकीर्षितत्वेन प्राधान्यान्मिथ्यात्वविकल्पः प्रथमं प्रश्नावसरे निर्दिष्टः । तथाऽपि मिथ्यासत्ययोः सत्यमर्थतः प्रधानमिति तत्क्रमेण दूषणम् । सता चेदित्यतः परमात्मरूपेण तदन्येन वेति विकल्पः । प्रथमपक्षे वक्ष्याम इत्याद्यपक्षदूषणप्रतिज्ञानं चाध्याहार्यम् । आत्मेतरेण सतेति द्वितीयपक्षदूषणं द्वैतसिद्धिः स्यादिति । तथा चाद्वैतप्रतिपादकश्रुतेरुपपत्तिविरोध इति हृदयम् । न पुनरपसिद्धान्तमात्रे तात्पर्यम् । प्रक्रमाननुरूपत्वात् । श्रुतेरुपपत्तिविरोधेनाद्वैतप्रतिपादकत्वाभावस्य प्रक्रान्तत्वात् । मिथ्यात्वपक्षे दोषमाह ॥ न सिद्धं चेति ॥ चशब्दोऽवधारणे तुशब्दार्थो वा । सतोऽन्यन्मिथ्याभूतं तु साधनं न सिद्धमेव । मिथ्याभूतस्य प्रमासाधनत्वं न सिद्धमेवेति यावत् । इदमुक्तं भवति । यो हि यन्मिथ्या न तत्साधकमिति व्याप्तिमङ्गीकृत्य श्रुतेर्मिथ्यात्वे असाधकत्वं प्रसञ्जयति स मिथ्याभूतस्यैव साधकत्वमित्यर्थसाधनायोपन्यस्तप्रमाणस्यापि मिथ्यात्वेऽसाधकत्वमापादयिष्यत्येव । तथाच अस्य प्रमाणस्य साधकत्वे सिद्धे मिथ्याभूतस्यैव साधकत्वमित्यर्थसिद्धिः । ततश्च तर्कस्य विरुद्धतासिद्धिः । ततश्चास्य प्रमाणस्य साधकत्वसिद्धिरिति चक्रकप्रसङ्गेन नैकस्यापि सिद्धिरिति ।

वा० — ननु तच्च मिथ्याप्रमाणेनेत्युत्तरग्रन्थेन मिथ्याभूतस्य साधकत्वसाधकप्रमाणे मिथ्यात्वसत्त्वादि विकल्प्य दूषणाभिधानमनुपपन्नम् । तादृशप्रमाणस्वरूपस्यैवासम्भाविततया न सिद्धमित्येतावतैव तद्दूषणे सिद्धे धर्मदूषणमुखेन तद्दूषणस्यानुचितत्वात्तद्दूषणस्य प्रकृतासङ्गतेश्चेत्यतस्तादृशप्रमाणसम्भावनां दर्शयन्नेव तद्दूषणं प्रकृतेन सङ्गमयति ॥ **अथ मतमिति** ॥ **एकेति** ॥ प्रत्यक्षादिसाधकत्वानुभवनाशेऽपि तत्संस्कारसहकृतश्रुतियुक्त्यादेर्वा तन्मिथ्यात्वसाधकश्रुत्यादिज्ञाननाशेऽपि तत्संस्कारसहकृतप्रत्यक्षादिसाधक-

त्वानुभवजनकस्य वा विशिष्टज्ञानजनकत्वं तथाऽन्यत्र दृष्टेरुपपद्यत इत्यर्थः । यद्वाऽनुभवेन प्रत्यक्षादेः साधकत्वे सिद्धे तत्स्मृतौ सत्यां श्रुतियुक्त्यादिना तन्मिथ्यात्वज्ञानानन्तरमेव यदिदं साधकत्वेनान्वभवं तदेव श्रुत्यादिना मिथ्यात्वेन प्रत्येमीति वा श्रुत्यादिना प्रत्यक्षादेर्मिथ्यात्वे सिद्धे तत्स्मृतौ सत्यां तत्साधकत्वानुभवानन्तरमेव यच्छ्रुत्यादिना मिथ्यात्वेन व्यज्ञासिषं तत्साधकत्वेनानुभवामीति वा प्रतिसन्धानेन विशिष्टार्थसिद्धिरुपपद्यते । न च पौर्वापर्येण प्रवृत्तप्रमाणद्वयजन्यज्ञानप्रतिसन्धानं कथमात्मन इति वाच्यम् । आत्मक्षणिकतावादे चक्षुरादिचैतन्यवादे वैतदनुपपत्तावप्युभयप्रतिसन्धातुरात्मनः स्थिरतावादे प्रतिसन्धानानुपपत्तेः शङ्कितुमशक्यत्वात् । न च प्रतिसन्धातुरात्मनः स्थिरत्वमात्रेण विजातीयकरणजन्यज्ञानद्वयप्रतिसन्धानं न दृष्टचरमिति वाच्यम् । चक्षुषा घटे गृहीते त्वचा ज्ञानान्तरमेव । त्वचा घटे गृहीते चाक्षुषज्ञानान्तरमेव । यं चक्षुषा अद्राक्षं तमेव घटं त्वचा स्पृशामीति वा । यमस्पृशं तमेव घटं चक्षुषा पश्यामीति वा विजातीयकरणजन्यज्ञानद्वयप्रतिसन्धानस्य दर्शनात् । न च प्रागुपस्थिततज्ज्ञानद्वयप्रतिसन्धानसद्भावेऽपि कथं विशिष्टार्थविषयकं तदिति वाच्यम् । पूर्वानुभूतितत्कार्यस्मृतितत्कार्यानुभवानामेकेनानुव्यवसायेनैकविषयकतयैककर्तृकतया च सङ्कलनरूपप्रतिसन्धानस्यैकविषयकस्मृतिपूर्वापरप्रत्ययानां सति सामानाधिकरण्ये सङ्कलयितुरेकत्वेनोपपत्तेः । न चैकार्थक्यप्रतिसन्धानदृष्टान्तेन विभिन्नार्थप्रतिसन्धानोपपादनं कथमिति वाच्यम् । प्रत्यक्षादिरूपं धर्मिणमादायार्थैक्यस्य प्रकृतेऽपि सत्त्वाद्विशिष्टार्थविषयकप्रत्ययानां सति सामानाधिकरण्ये सङ्कलयितुरेकत्वेन सङ्कलनस्य सामग्रीतौल्येनोपपत्तेः । तद्वद्विशेष्यकत्वादिवज्ज्ञानद्वयनिष्ठैकार्थविषयकत्वस्य विशिष्टैकार्थविषयकत्वस्य वा ग्रहणे समानसंवित्संवेद्यतयाऽर्थैक्यस्य विशिष्टार्थैक्यस्य वा सिद्ध्युपपत्तेश्च । अत्र दृष्टान्तस्वरूपविवरणं दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति गौतमीयतृतीयाध्यायाद्यसूत्रादौ स्पष्टमतो न विशिष्टार्थसिद्धावनुपपत्तिरित्याशयेन पक्षान्तरमाह ॥ **अथवेति** ॥ दर्शनस्पर्शनोभयजन्यज्ञानद्वयप्रतिसन्धानवदित्यर्थः । उक्ताक्षेपसमाधानतयोत्तरग्रन्थसङ्गमनमेवं चेति । आत्मातिरिक्तमिथ्यात्वसाधकत्वेन परोक्तं श्रुत्यादिकं मिथ्येति सिद्धवत्कृत्य मिथ्यायाः साधकत्वं च न सिद्धमित्यादिना दूषणमभिधाय संप्रति पुनस्तच्चेत्यात्मातिरिक्तमिथ्यात्वं परामृश्य तत्साधकप्रमाणस्य मिथ्यात्वादिविकल्पेन दूषणाभिधानमनुचितमित्यतः प्राधान्येन प्रकृतस्याप्यात्मातिरिक्तमिथ्यात्वस्य नायं परामर्शो येनोक्तदोषः स्यादपि तु तादर्थ्येन प्रकृतस्यापि मिथ्याभूतसाधकत्वस्यैवेत्याह ॥ **तदितीति** ॥ तर्हि चशब्दो व्यर्थः । आत्मातिरिक्तमिथ्यात्वसमुच्चायकत्वे च

निवेशेन प्रकृतपरामर्शकतच्छब्दबलाच्च प्रमाणविशेषस्य मूलारूढतालाभः । सत्त्वमिथ्यात्वयोरेव कोटित्वमतो नानुपपत्तिरित्याशयेन प्रश्नपर्यवसानं दर्शयति ॥ **यदिदमिति** ॥ निर्देशदूषणयोर्वैषम्ये निमित्तमाह ॥ **यद्यपीति** ॥ सता चेदित्यात्मतदितरपक्षयोः प्राप्त्याऽऽत्मपक्षे च द्वैतसिद्धिः स्यादित्यस्यालम्भकत्वादाह ॥ **सता चेदित्यतःपरमिति** ॥ **इति हृदयमिति** ॥ आत्मातिरिक्तस्यास्यैव सत्यत्वेऽत्रैव प्रतिहतप्रामाण्यतयाऽऽत्मातिरिक्तसमस्तमिथ्यात्वसाधकत्वाभिमता श्रुतिर्न किञ्चिदपि साधयेदित्युपपत्तिविरोध इत्यर्थः । ननु मिथ्यात्वपक्षे पूर्वं दूषणानुक्तेस्तत्समुच्चायकचशब्दानुपपत्तिरित्यतः प्रकारान्तरेण द्वेधा तदर्थमाह ॥ **चशब्द इति** ॥ सर्वस्यापि किञ्चिदपेक्षयाऽन्यत्वाद्विवक्षितमर्थमाह ॥ **सत इति** ॥ मिथ्याभूतसाधनस्य धर्मिणोऽसिद्धत्वोक्तेः प्रकृतानुपयोगात्प्रकृतोपयुक्तं विशेषणबललब्धं तात्पर्यमाह ॥ **मिथ्येति** ॥ ननु मिथ्याभूतस्यापि प्रमाणस्य साधनत्वमित्येतत्प्रमेयसाधनायोपन्यस्तप्रमाणस्य मिथ्यात्वरूपकल्पनिरासावसरे प्रमेयासिद्धिकथनं न सङ्गतम् । न चैतत्प्रमेयं न मिथ्याभूतप्रमाणेन साधयितुं शक्यं तर्कविरोधादिति प्रमाणनिराकरणमेवैतदिति वाच्यम् । श्रुतेर्मिथ्यात्वे साधकत्वं न स्यादिति तर्कविरोधस्यात्राप्रसरादित्यतस्तदप्रसरेऽपि तत्समानन्यायलब्धतर्कविरोधः प्रसरत्येवेत्यभिप्रेत्य तत्प्रकारमुपपादयन् किमनेन दूषणमुक्तं भवतीत्यतस्तत्फलं चक्रकापत्तिरूपं चाह ॥ **इदमुक्तं भवतीति** ॥

स०—**अथवेति** ॥ पूर्वं प्रत्यक्षादिविशेष्यकसाधकत्वप्रकारकज्ञाने तन्मिथ्यात्वं मानान्तरोपनीतं भासते तथा च मिथ्याभूतं प्रत्यक्षादिकं साधकमिति तद्ज्ञानोल्लेख इत्युक्तम् । अत्र तु प्रत्यक्षादिकं मिथ्याभूतमित्येकं ज्ञानं साधकमित्यपरं तज्ज्ञानद्वयविशेषणकं आत्मविशेष्यकं विशिष्टज्ञानं विवक्षितं योऽहं प्रत्यक्षादिकं मिथ्येत्यमंसिषं सोऽहं साधकमिति जानामीति तदाकारो बोध्यः ॥ **दर्शनस्पर्शनाभ्यामिति** ॥ दर्शनं चक्षुः स्पर्शनं त्वक् ताभ्यां जातयोर्घटरूपैकार्थविशेष्यकयोर्भिन्नप्रकारकयोर्ग्रहणयोरिवेत्यर्थः । तथाच योऽहं घटं चक्षुषा नीलमद्राक्षं सोऽहं त्वचा स्पर्शवन्तं जानामीति यथा ज्ञानद्वयविशिष्टात्मप्रतिपत्तिस्तथा प्रकृतेऽपीति भावः । केचित्तु नेहनानेति श्रुत्या प्रत्यक्षस्य मिथ्यात्वे प्रतीते प्रमाणान्तरेण साधकत्वे च प्रतीते उभयानुसन्धानवत आत्मनो मनसैव मिथ्यात्वविशिष्टप्रत्यक्षसाधकत्ववैशिष्ट्यबोधः सम्भवति । यथा चक्षुषा दृष्टे घटे स्पर्शनेन च ज्ञाते योऽहं चक्षुषा घटमद्राक्षं सोऽहं त्वचा जानामीति मनसा विशिष्टानुभवस्तथेति भाव इत्याहुः ॥ **प्रथमपक्षे वक्ष्याम इति** ॥ इत्यनवस्थितिरित्यस्य व्याख्यावसरे । एतेन प्राश्निककल्पितः सतात्मभूतेनेति पक्षोऽपि निरस्तो वेदितव्य इत्यादिना वक्ष्याम इत्यर्थः ॥ **उपपत्तिविरोध इति हृदयमिति** ॥ यदि नेहनानेतिवाक्यमात्मातिरिक्तस्य सर्वस्यापि मिथ्यात्वप्रतिपादकं स्यात् तर्हि मिथ्याभूतस्यैव साधकत्वमित्येतदर्थसाधकप्रमाणस्यापि मिथ्यात्वप्रतिपादकं स्यात् न च तस्य मिथ्यात्वमङ्गीकर्तुं शक्यं तस्य सत्यत्वाङ्गीकारादित्युपपत्तिविरोध इति भावः ॥

प० — **अनुभवसिद्धमिति** ॥ प्रमितिरूपकार्यलिङ्गजन्यानुमितिसिद्धमिति वा अनुमितिप्रामाण्यग्राहकसाक्षिसिद्धमिति वाऽर्थः ॥ **श्रुतिभिर्युक्तिभिरिति** ॥ नेहनानेत्यादिश्रुतिभिर्दृश्यत्वादियुक्तिभिरित्यर्थः ॥ **इतरप्रमाकरणस्यैवेति** ॥ मिथ्यात्वप्रमाकरणस्य वा साधकत्वप्रमाकरणस्य वेत्यर्थः क्वचित्प्रमाणस्यैवेति पाठः ॥ **सुरभीति** ॥ यथा घ्राणजन्यगन्धज्ञानजनितसंस्कारसहकृतचक्षुष एव चन्दनकाष्ठे सुरभि चन्दनमिति विशिष्टज्ञानजनकत्वं तथेत्यर्थः ॥ **दर्शनस्पर्शनाभ्यामिति** ॥ यथा चक्षुरिन्द्रियत्वगिन्द्रिययोरेकत्र घटादौ समावेशे रूपवान्स्पर्शवांश्चेति रूपस्पर्शरूपविशेषणद्वयविशिष्टवस्तुविषयकज्ञानं जायते तथा मिथ्यात्वप्रमाणसाधकत्वप्रमाणयोः समावेशे मिथ्यात्वसाधकत्वोभयविशिष्टैकवस्तुविषयकं ज्ञानं भविष्यतीत्यर्थः ॥ **इवेतीति** ॥ तद्यथा मिथ्याभूतवाक्येन साध्यते तथा मिथ्याभूतस्य साधकत्वमपि मिथ्याभूतप्रमाणेन साध्यते किमित्यर्थः ॥ **वक्ष्यामइति** ॥ अविशेषस्य साध्या साधकतेत्यत्रेति भावः ॥ **अद्वैतप्रतिपादकेति** ॥ 'नेहनानेत्यादिश्रुतेः सर्वमिथ्यात्वबोधनांशे बाधितविषयत्वरूपोपपत्तिविरोध इत्यर्थः ॥ **अद्वैतेति** ॥ आत्मान्यसर्वमिथ्यात्वप्रतिपादकत्वाभावस्य 'मिथ्यात्वं यदि दुःखादेः' इत्यत्र प्रकान्तत्वादित्यर्थः । अन्यसाधनमित्यत्र कर्मधारय इत्युपेत्याह ॥ **सतोन्यदिति** ॥ चशब्दस्यार्थद्वयमपि योजयति ॥ **मिथ्याभूतस्त्विति** ॥ न सिद्धमेवेति च ॥ **तर्कस्येति** ॥ यदीदं वाक्यं मिथ्या स्यान्न किञ्चिद्बोधयेदिति तर्कस्य विरुद्धहेत्वाभासतेत्यर्थः ॥

या० — **अथवोभयप्रतिसन्धातुरिति** । पूर्वं प्रत्यक्षादिविशेष्यकसाधकत्वप्रकारकज्ञाने तन्मिथ्यात्वं मानान्तरोपनीतं भासते तथाच मिथ्याभूतं प्रत्यक्षादिकं साधकमिति विशिष्टज्ञानं विशिष्टसाधकमित्युक्तम् । अत्र तु प्रत्यक्षादिकं मिथ्येत्येकंज्ञानम् । साधकमित्यपरम् । ततश्च क्रमेण तज्ज्ञानयोरुत्पत्त्यनन्तरं श्रुत्यादिभिर्यत्प्रत्यक्षादिकं मिथ्येत्यमनिपि तदेवानुभवेन साधकमिति जानामीत्यात्मैवोभयमेकत्र प्रतिसन्धत्ते तेन साक्षित एवोभयविशिष्टप्रतिपत्तिरित्युच्यत इति भेदः ॥ **दर्शनस्पर्शनाभ्यामिति** ॥ दर्शनं चक्षुः । स्पर्शनं त्वगिन्द्रियम् । ताभ्यामेकार्थग्रहणमिवेत्यर्थः । अयमाशयः । यथा दर्शनस्पर्शनाभ्यामेकस्यार्थस्य घटादे रूपवत्तया स्पर्शवत्तया च क्रमेण ग्रहणे जाते यमहं रूपिणं चक्षुषाऽद्राक्षं तमेव स्पर्शवन्तं त्वचा प्रत्यभिजानामीति एकत्रोभयप्रतिसन्धातुरात्मनो विद्यमानत्वाद्रूपस्पर्शविशिष्टप्रतिपत्तिः साक्षिणा भवति तथेत्यर्थः ॥ **प्रथमपक्षे वक्ष्याम इति** ॥ 'अविशेषस्य साध्या साधकता पुनरि'त्यादाविति शेषः ॥ **उपपत्तिविरोध इति** ॥ यदि ब्रह्मातिरिक्तमुक्तप्रमाणं सत्यं स्यात्तर्ह्यत्रैव प्रतिहतप्रामाण्यमेकमेवेत्यादिवाक्यं कथमितरमिथ्यात्वं प्रतिपादयेदविश्वासप्रसङ्गादित्युपपत्तिविरोधः । यद्वा यदि प्रागुक्तं प्रमाणं सत्स्यात्तदा तदंशे श्रुतेर्योग्यता न स्यादित्येवोपपत्तिविरोध उह्यः । नन्वेतत्प्रमाणविरोधात्तर्क एव न स्वार्थसाधक इत्यत आह ॥ **तथा चास्येति** ॥

श्री० — **सुरभिचन्दनमितीति** ॥ आदौ चन्दनखण्डे सौरभ्यं घ्राणेन गृहीतमभूत् । पश्चाच्चन्दनखण्डे प्रत्यक्षेण दृष्टे सति चन्दनमिदं सुरभीति चाक्षुषं ज्ञानमुत्पद्यते । इदं चोपनीतभानम् । घ्राणजन्यसौरभ्यानुभवजनितसंस्कारसहकृतस्य प्रत्यक्षादिकं साधकमित्यनुभवरूपप्रमाणस्यैव मिथ्याभूतं साधकमिति विशिष्टप्रत्ययजनकत्वमुपपद्यते । तथाच प्रत्यक्षादिकं साधनमित्यनुभवे मिथ्यात्वं मानान्तरोपनीतं भासते । तथाच मिथ्याभूतं प्रत्यक्षादिकं साधकमित्युपनीतभानरूपं विशिष्टज्ञानमेव मिथ्याभूतस्य साधकत्वरूपविशिष्टार्थसाधकमित्यर्थः ॥ **अथत्रेति** ॥ चक्षुषा त्वगिन्द्रियेण चैकस्यैवार्थस्य घटादेः रूपवत्त्वेन स्पर्शवत्त्वेन च क्रमेण ज्ञानद्वयोत्पत्त्यनन्तरं योऽहं घटं चक्षुषा रूपवन्तमद्राक्षं तमेव त्वचा स्पर्शवन्तं प्रत्यभिजानामीत्येवंरूपस्पर्शविशिष्टार्थप्रतिपत्तिरेकैव साक्षिणैव भवति । एकत्रैव घटे उभयप्रतिसन्धातुरात्मनो विद्यमानत्वात् । एवमत्रापि प्रत्यक्षादिकं मिथ्येत्येकं ज्ञानं प्रत्यक्षादिकं साधकमित्यपरं ज्ञानम् । तथाच क्रमेण ज्ञानद्वयोत्पत्त्यनन्तरं श्रुत्यादिभिर्यत्प्रत्यक्षादिकं मिथ्येत्यमनिषं तदेवानुभवेन साधकमिति जानामीत्यात्मैव मिथ्यात्वं साधकत्वं चेत्युभयमेकत्र प्रत्यक्षादिप्रमाणेऽनुसन्धत्ते । तथाच मिथ्यात्वसाधकत्वरूपोभयविशिष्टं यत्प्रत्यक्षादिप्रमाणं तत्प्रतिपत्तिर्मिथ्याभूतं प्रत्यक्षादिकं साधकमिति विशिष्टार्थप्रतिपत्तिरिति यावत् साक्षिणैव भवतीत्यर्थः । पूर्वमुपनीतभानं साक्षिभिन्नं विवक्षितमत्र तु प्रत्यभिज्ञारूपं साक्षिरूपं प्रमाणं विवक्षितमिति भेदः । उभयत्रापि प्रमाणद्वयसमाहारात्मकमेव प्रमाणं विवक्षितमिति ध्येयम् । अत एवोत्तरत्र तथैव व्यवहारः ॥ **तर्कस्येति** ॥ मिथ्यात्वे साधकत्वं न स्यात् इति तर्कस्य ॥ **ततश्चेति** ॥ तर्कस्य विरुद्धतया दुष्टत्वेन तद्विरोधाभावादिति भावः ॥

च० — **अनुभवसिद्धमिति** ॥ प्रत्यक्षादित्वावच्छिन्नधर्मिकानुभवविषयीकृतमित्यर्थः ॥ **कुतः सिद्ध इति** ॥ मिथ्याभूतत्वावच्छिन्नधर्मिकसाधकत्वप्रकारकानुभवजनकसामग्रीविरहादिति भावः । **सहकृतस्येत्यादि** ॥ प्रत्यक्षादित्वावच्छिन्नधर्मिकानुभवजनितसंस्कारसहकृतस्य मिथ्यात्वबोधकश्रुतियुक्तिरूपप्रमाणस्येत्यर्थः ॥ **सुरभिचन्दनमितिवदिति** ॥ घ्राणादिजनितसौरभगोचरोपनायकज्ञानलक्षणलौकिकप्रत्यासत्तिचन्दनचक्षुःसन्निकर्षादिघटितसामग्र्योपनीतं विशेषणतयैव भासते । 'मानसे त्वनियम' इति न्यायेन सौरभनिष्ठप्रकारतानिरूपितचन्दननिष्ठविशेष्यताशालिज्ञानजननादिति भावः ॥ **विशिष्टप्रत्ययेति** ॥ मिथ्याभूतत्वविशेषितप्रत्यक्षादित्वावच्छिन्नधर्मिकसाधकत्वप्रकारकोदीच्यमानसज्ञानजनकत्वोपपत्तेरित्यर्थः ॥ **उभयप्रतिसन्धातुरिति** ॥ प्रत्यक्षादित्वरूपैकधर्मावच्छिन्ने साधकत्वमिथ्यात्वोभयकर्मकप्रतिसन्धानकर्तुरित्यर्थः । दर्शनस्पर्शनाभ्यामिति करणसाधनल्युडन्तौ चक्षुस्त्वगिन्द्रिये अभिदधाते । तादृशेन्द्रियद्वयाधीनघटधर्मिकरूपस्पर्शोभयप्रकारकचाक्षुषस्पर्शनोभयगोचरयो रूपिणं यं चक्षुषाऽद्राक्षं तमेव

इति ॥ 'अविशेषस्य साध्या साधकता पुनरि'त्यादाविति पूरणीयम् ॥ **उपपत्तिविरोध इति** ॥ आत्मातिरिक्तस्य तादृशप्रमाणस्य सत्यतायां तत्रैवैकमेवेत्यादिवाक्यस्य प्रामाण्यमभांक्षीदिति कथमितरमिथ्यात्वं निश्चिन्वीतानाश्वासापत्तेरित्युपपत्तिविरोध इत्यर्थः ॥

सु० — ननु च श्रुतिः स्वव्यतिरिक्तस्य दुःखादेर्मिथ्यात्व प्रतिपादयन्ती कथमुपपत्तिविरुद्धेति चेत् । कुतोऽयं श्रुत्यर्थसङ्कोचः । साधकत्वानुपपत्तिप्रमाणबलादिति चेत् । तर्हि प्रमितं विहाय मिथ्यात्ववादिनी कथं दुःखादिमिथ्यात्वमपि प्रतिपादयेत् तस्यापि प्रत्यक्षसिद्धत्वात् । ननु च श्रुतिविरोधेन प्रत्यक्षमाभासीकर्तुं मयोपक्रान्तम् । तेनैव श्रुतिविरोधाभिधाने कथमितरेतराश्रयत्वं न स्यात् । श्रुतेरप्रामाण्ये बाधकाभावात्प्रत्यक्षप्रामाण्यम् । ततश्च तद्विरुद्धत्वेन श्रुतेरप्रामाण्यमिति । हन्त तवापि कथमितरेतराश्रयत्वं न स्यात् । श्रुतिप्रामाण्ये तद्विरोधेन प्रत्यक्षाप्रामाण्यम् । ततश्च बाधकाभावेन श्रुतिप्रामाण्यसिद्धिरिति । श्रुतेः प्रबलत्वान्नैवमिति चेन्न । तस्य दूष्यत्वात् । साधयिष्यते च प्रत्यक्षप्राबल्यम् । ननु चात्र श्रुतेः प्रत्यक्षविरोधमेवोपन्यस्य तत्प्राबल्यव्युत्पादनं कुतो न कृतम् । किमुपपत्तिविरोधव्युत्पादनेन । उच्यते । परेण ह्यत्राद्वैतपरत्वे तात्पर्यलिङ्गानुगुणत्वं महता प्रबन्धेनोपपादितम् । अतस्तद्विरोध एव परस्य विचारकौशलप्रकटनाय व्युत्पादितः । उपक्रमादिविरोधस्य चैतदुपलक्षणम् । तं च व्युत्पादयिष्यामः ।

वा० — ननु माऽस्तु तर्कस्य विरुद्धतयोपपत्तिविरोधानुपपत्तिस्तथाऽपि मिथ्याभूतस्य साधकत्वानुपपत्तिप्रमाणबलेन श्रुतेरेतच्छ्रुतिव्यतिरिक्तमिथ्यात्वप्रतिपादकतया सङ्कोचे सति तर्कप्रसर एव नेत्युपपत्तिविरोधोद्भावनं न युक्तमेव । न च माऽस्तु तदुपपत्तिविरोधः प्रमाणबलादेतच्छ्रुतिमिथ्यात्वप्रतिपादकत्ववत्प्रत्यक्षादिप्रमाणबलादविशेषेण दुःखादिमिथ्यात्वाप्रतिपादकत्वमपि श्रुतेः प्राप्तमिति मदिष्टसिद्धिरिति वाच्यम् । श्रुतिविरोधेन प्रत्यक्षमाभासीकर्तुमुपक्रान्ततया प्रत्यक्षादेस्तत्प्रमाणवैलक्षण्यात् । अन्यथाऽन्योन्याश्रयापातात् । न च तर्हि तनाप्यन्योन्याश्रय इति वाच्यम् । श्रुतेः प्रबलत्वेन मां प्रति तदप्रसरादित्यभिप्रेत्य गूढाभिसन्धिः शङ्कते ॥ **नन्विति** ॥ अपसिद्धान्ते वक्तुं शक्येऽपि विरोधकथनप्रसङ्गात्तमेव वक्तुमभिसन्धिमजानान इव पृच्छति ॥ **कुत इति** ॥ शङ्किता स्वाभिसन्ध्येकदेशमुद्घाटयति ॥ **साधकत्वेति** ॥ असङ्कोचे ह्युपपत्तिविरोध उद्भावितः । सङ्कोचे तु तन्न्यायेन प्रत्यक्षादिविरोधमेवोद्भावयामी-

त्याह ॥ [illegible] ॥ [illegible] शङ्कते ॥ ननु चेति ॥ [illegible] परिहरति ॥ हन्तेति ॥ शङ्किता स्वनिष्कर्षमुद्घाटयति ॥ **श्रुतेरिति** ॥ **दूष्यत्वादिति** ॥ सङ्कोचासङ्कोचयोः प्रत्यक्षोपपत्तिविरोधाभ्यामिति शेषः । अङ्गीकृत्य च साम्यमिदमुक्तम् । वस्तुतस्तु प्रत्यक्षस्यैव प्राबल्यात्तुस्थस्तद्बाध इत्याह ॥ **साधयिष्यते चेति** ॥ प्रत्यक्षस्याविशेषत इत्यादिनेति शेषः । अनेनान्यसाधनं मिथ्यात्वसाधकश्रुतिर्न सिद्धं प्रबलत्वेनेति शेष इति भाष्यं व्याख्यातं भवति । अनेन तर्के आपादकासिद्धिश्च परिहृता भवतीति द्रष्टव्यम् । ननु श्रुतेरर्थसङ्कोचे उपपत्तिविरोधासम्भवात्प्राबल्यमुपपाद्य प्रत्यक्षविरोधेऽवश्यं वक्तव्ये स एवादितोऽपि वक्तव्यः किमन्तर्गडुनोपपत्तिविरोधेनेत्याशयेन शिष्यो भाष्यकारीयामचातुरीं शङ्कते ॥ **ननु चेति** ॥ सप्रयोजनत्वान्नैवमुक्तिर्दोष इत्याह ॥ **उच्यत इति** ॥

स०—**साधयिष्यते चेति** ॥ सत्यत्वात् तेन दुःखादेरित्यादिना व्युत्पादयिष्यत इति ॥

प०— **तवापीति** ॥ मिथ्यात्ववादिनोऽपीत्यर्थः ॥ **दूष्यत्वादिति** ॥ उपपत्तिविरोधादिनेति भावः ॥ **साधयिष्यते चेति** ॥ 'ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषत' इत्यादावुपजीव्यत्वेन प्राबल्यं साधयिष्यत इत्यर्थः ॥ **व्युत्पादयिष्याम इति** ॥ पृथगुपदेशादित्यादाविति भावः ॥

या०— **तस्य दूष्यत्वादिति** ॥ 'क च प्रत्यक्षतः प्राप्तमनुमागमबाधितमि'त्यादाविति शेषः । साधयिष्यत इत्यत्रापि स एव शेषोऽनुवर्तते ॥

श्री०— **साधकत्वानुपपत्तिरिति** ॥ नेहनानेतिश्रुतिः स्वव्यतिरिक्तस्यैव मिथ्यात्वं बोधयति न स्वात्मनः । तथात्वे स्वस्यापि मिथ्यात्वप्राप्त्या साधकत्वं न स्यात् । मिथ्याभूतस्य साधकत्वानुपपत्तिप्रमाणबलादित्यर्थः । प्रमितं साधकत्वेन प्रमितं स्वात्मानम् ॥ **प्रत्यक्षसिद्धत्वादिति** ॥ तथाच श्रुतेः प्रत्यक्षविरोध इति भावः । सिद्धान्ती उत्तरमाह ॥ **हन्त तवापीति** ॥ शङ्कते ॥ **श्रुतेरिति** ॥ तथाच तद्विरुद्धत्वेन श्रुतेरप्रामाण्यमिति प्रत्यक्षविरोधेन श्रुतेरप्रामाण्यमित्युक्तमयुक्तम् । श्रुतेः प्रबलत्वेन प्रत्यक्षस्य दुर्बलत्वेन श्रुतिप्रामाण्यस्य दुर्बलप्रत्यक्षविरोधानपेक्षत्वेन नान्योन्याश्रय इति भावः । तस्य प्रत्यक्षापेक्षया श्रुतिप्राबल्यस्य । श्रुतेः सर्वमिथ्यात्वप्रतिपादिकायाः ॥ **तदिति** ॥ प्रत्यक्षेत्यर्थः ॥ **किमुपपत्तीति** ॥ तद्वाक्यस्याग्रतो भवेदित्यनेनेत्यर्थः अनुगुणपदोपरिभागः ॥ **तद्विरोध एवेति** ॥ यदनुगुणत्वं त्वयोपपादितं तद्विरोध एव । प्रबलोपपत्तिविरोध इति यावदित्यर्थः ॥ **अकौशलेति** ॥ तात्पर्यलिङ्गानुगुणत्वं

व्युत्पादयन् भवान् प्रबलोपपत्तिरूपतात्पर्यलिङ्गविरोधं न पश्यति । तथा प्रबलोपपत्तिविरुद्धार्थं महाप्रबन्धेनोपपादयतस्तवाकौशलं प्रकटितं भवतीत्यर्थः ॥

च० — दूष्यत्वादिति ॥ 'क च प्रत्यक्षतः प्राप्तमनुमागमबाधितमि'त्यादिनेति पूरणीयम् ॥

सु० — ननु मा भूत्तर्कस्य विरुद्धता । तथाऽपि मिथ्याभूतोऽपि स्वाप्नोऽर्थः शुभाशुभयो रेखारोपितो वर्णोऽर्थस्य प्रतिबिम्बं च बिम्बस्य स्फटिकलौहित्यं चोपधानसन्निधानस्य वर्णदैर्घ्यादिकं चार्थभेदस्य सवितृसुषिरप्रभृतिचारिष्टस्य साधकमुपलब्धमिति प्रशिथिलमूलत्वेनाभासत्वम् । मैवम् । यतोऽत्र, यत्साधकं न तन्मिथ्या, यच्च मिथ्या न तत्साधकम् । तथा हि । स्वप्नस्य तावज्ज्ञानार्थरूपस्य सत्यतां वक्ष्यति । रेखाऽपि वर्णं पदमिवार्थे सङ्केतिता तं स्मारयतीति न किञ्चिदत्र मिथ्याऽस्ति । अत एव रेखामुपलभ्य वर्णमुच्चारयन्ति । प्रतिबिम्बस्य तु सत्यता परेणाप्यङ्गीकृता । विच्छेदस्यापि सत्यतामुपपादयिष्यामः । स्फटिकलौहित्यमप्येतेनैव व्याख्यातम् । दैर्घ्यादयोऽपि ध्वनिष्विव वर्णेष्वपि स्वाभाविका एव । अन्यथा स्वरेष्विव व्यञ्जनेष्वपि ध्वानोपधानवशेन दीर्घादिप्रतिभासप्रसङ्गात् । न तथाविधध्वनिव्यङ्ग्यं व्यञ्जनमिति चेन्न । तथात्वे वर्णेष्वेव विशेषोऽङ्गीकार्यः स्यात् । स एव दैर्घ्यादिपदाभिधेयो भविष्यति । सवितृसुषिरप्रभृतिज्ञानमेवारिष्टसूचकम् । वक्ष्यते चैतत् । एवमन्यदप्यूहनीयमिति । तस्मात्पदवाक्यप्रमाणविदामग्रेसरेण परमास्तिकेन भगवता भाष्यकारेणोक्तो भगवति स्वरूपभेदाभाव एव श्रुत्यर्थोऽवधेयः ।

वा० — एवं विरुद्धतानिरासकत्वेन मिथ्यायाः साधकत्वं चेति भाष्यं योजयित्वा यन्मिथ्या सवितृसुषिरादि तस्य साधकत्वं न प्रतिवादिनः सिद्धम् । यस्य च स्वाप्नार्थादेः साधकत्वं प्रतिवादिनः सिद्धं तन्मिथ्यायाः साधकत्वं न, तत्साधकं मिथ्या नेति यावदिति भाष्ययोजनया; न सिद्धं चान्यसाधकमिति भाष्यस्य वा यत्सतोऽन्यत्तस्य साधकत्वं न सिद्धं, यच्च साधकं तस्य सतोऽन्यत्वं न सिद्धमिति योजनया; तर्कस्य प्रशिथिलमूलत्वनिराकरणपरत्वमस्येत्यभिप्रेत्य प्रशिथिलमूलतामाशङ्क्य निराकरोति ॥ नन्विति ॥ ननु विरुद्धतामभिदधतो व्यभिचारशङ्कनं नोपपद्यते । विरुद्धे उभयकोट्युपस्थापकतावच्छेदकरूपत्वलक्षणव्यभिचारकत्वबीजासम्भवादितो विरुद्धत्वाभावस्योपपादितत्वात्तदभ्युपगमेन प्रत्य-

मिव वर्णे सङ्केतितरेखाया वर्णस्मारकत्वमेव नार्थस्मारकत्वम् । अर्थप्रतीतिस्तु वर्णात्मकपदानामर्थे गृहीत-सङ्गतिकानां पुंसां वर्णबुद्धिजन्येत्यर्थः ॥ **न किञ्चिदत्रेति** ॥ रेखासङ्केतवर्णबुद्धीनामेवात्र सत्त्वात्तेषु न मिथ्याभूतं किञ्चिदस्तीत्यर्थः । पूर्वत्र, जाग्रत्त्वस्य मिथ्यात्वेऽपि न साधकत्वं, साधकस्य चार्थज्ञानरूपस्य न मिथ्यात्वमिति विभागवत्प्रकृते न स इति भावः । अत एव वर्णात्मकपदानामर्थे सङ्गतिग्रहाभावे रेखादर्शनेऽपि नार्थबुद्धिः किन्तु वर्णस्मरणाधीनं वर्णोच्चारणमात्रमित्याह ॥ **अत एवेति** ॥ रेखादर्शनस्य वर्णस्मारकत्वादेवेत्यर्थः । अत एव तत्तद्देशभेदेन लिपिभेदेऽपि वर्णस्मरणं सर्वेषामविशिष्टमिति भावः । प्रतिबिम्बस्वरूपस्य मिथ्यात्वं न तावत्परमतेन नापि स्वमतेनेति तदुपन्यास एवानुचित इत्याह । **प्रतिबिम्बस्येति** ॥ ननु नानुचितः तदुपन्यासः प्रतिबिम्बस्य स्वरूपेण सत्यत्वेऽपि तस्य बिम्बैक्येन साध्यावैशिष्ट्येन बिम्बसाधकत्वानुपपत्त्या विच्छेदोपेतस्य साधकत्वे दक्तव्ये विच्छेदस्य च मिथ्यात्वात्तदु-दाहरणं युक्तमेवेत्यत आह ॥ **विच्छेदस्यापीति** ॥ यद्वा प्रतिबिम्बशब्देन तद्विच्छेद उच्यते बिम्ब शब्देन च तद्व्यवस्थाविशेषः । एवं च 'नेक्षेतोद्यन्तमादित्यमि'त्युद्यदादित्यदर्शननिषेधेऽपि तत्प्रतिबिम्ब दर्शनानिषेधः, वारिस्थसूर्यदर्शननिषेधेऽपि गगनस्थतद्दर्शनानिषेधः, प्रतिबिम्बदर्शनेऽपि दृष्ट्वा स्नायादिति शास्त्रार्थाननुष्ठानं, बिम्बस्यावदातत्वेऽपि प्रतिबिम्बस्य श्यामत्वमित्यादिव्यवस्थाया विच्छेदसाध्यत्वात्तस्य च मिथ्यात्वात्तदुपन्यास इत्यत आह ॥ **विच्छेदस्यापीति** ॥ बिम्बप्रतिबिम्बयोरैक्ये प्रमाणनिराकरणेन भेदे 'यथैषा पुरुषे छाये'त्यागमोदाहरणेन च 'अत एव चोपमे'त्यधिकरणे व्युत्पादयिष्याम इत्यर्थः ॥**स्फटिकेति**॥ स्फटिकलौहित्यस्यापि प्रतिबिम्बत्वादिति भावः । ननु ध्वानोपाधिवशेनैव दीर्घादिप्रतिभासोपपत्तेर्न वर्णे तत्कल्पकमित्यत आह ॥ **अन्यथेति** ॥ **तथाविधेति** ॥ दीर्घेत्यर्थः ॥ **तथात्व इति** ॥ ध्वनावेव दीर्घत्वमिति वदतः स्वरेष्विव व्यञ्जनेष्वपि दीर्घादिप्रतिभास आपाद्यत एवाविशेषादतस्तत्प्रयोजकविशेषं वर्णेष्वङ्गीकृत्य तत्परिहारेऽर्थस्याङ्गीकारान्नाममात्रे च विवादाभावेन तस्यैव विशेषस्य दीर्घादिपदाभिधेय-त्वात् ध्वनावेव दीर्घत्वमिति न युक्तमिति भावः । एतच्च वस्तुगतिमनुरुध्योक्तम् । दैर्घ्यादिज्ञानस्यैव नगो नाग इत्यादावर्थविशेषप्रतीतिजनकत्वाद्दैर्घ्यादेरसत्त्वेऽपि तस्य सत्यत्वात्सवितृखुषिरज्ञानस्येव वक्ष्य-माणरीत्योपपत्तिरित्यपि द्रष्टव्यम् ॥ **ज्ञानमेवेति** ॥ तच्च सत्यमेवेति भावः । नन्वर्थानवच्छिन्नज्ञानस्याति-तिप्रसङ्गेनाहेतुत्वात्तदवच्छिन्नज्ञानस्य हेतुत्वेऽर्थस्यापि हेतुत्वं प्राप्तमेवेत्यतो ज्ञाने विषयानुपाधिकस्वसामग्र्या-सादितस्वतोवैलक्षण्यस्य 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृश'मित्यादौ वक्ष्यमाणत्वान्नार्थानवच्छिन्नस्य हेतुत्वेऽप्यतिप्रसङ्ग इत्याशयेनाह ॥ **वक्ष्यति चेति** ॥ **एवमन्यदपीति** ॥ शङ्काविषेऽपि शङ्का-निमित्तभयजन्यधातुव्याकुलतैव मरणहेतुर्न विषम् । भारतयुद्धे शक्तिविशेषाद्घटोत्कचादिसृष्टं गजादि च सत्यमेवार्थक्रियाकारीत्याद्यूह्यमिति भावः । ननु श्रुतेरपौरुषेयत्वेन सर्वथाऽप्रामाण्यासम्भवादर्थान्तरस्

चोपपन्नस्याभावात्केनचिदुपायेनोपपत्तिविरोधं परिहृत्यैतदर्थकत्वमेवाङ्गीकार्यमित्यत आह ॥ **तस्मादिति ॥** परोक्तार्थवन्नात्राविश्वसनीयमिति भावेनोपात्तं यद्भगवानिति भाष्यकारीयविशेषणं तदुपपादनं पदेत्यादि । सम्भावकहेतुकथनं परमेति ।

स०—वक्ष्यति स्वप्नाधिकरणे ॥ **रेखापीति** ॥ अर्थे पदमिव रेखा वर्णे सङ्केतितेति योजना ॥ **अत एवेति** ॥ रेखायाः वर्णे सङ्केतितत्वादेव रेखामुपलभ्य वर्णमुच्चारयन्ति । वर्णस्य तत्रारोपितत्वेनोपलम्भो न युक्तः रजतारोपदशायां शुक्तित्वप्रकारकज्ञानाभावदर्शनादिति भावः ॥ **प्रतिबिम्बस्येति ॥** दर्पणादिसन्निकृष्टा नायनरश्मयो दर्पणेनोपहता मुखादिकमेव विषयीकुर्वन्तीति परैरङ्गीकारादिति भावः । ननु बिम्बाभिन्नत्वेन प्रतिबिम्बस्य सत्यत्वेपि बिम्बप्रतिबिम्बविभागो न सत्य इत्यत आह ॥ **विच्छेदस्यापीति** ॥ 'अत एव चोपमे'त्यत्र ॥ **व्याख्यातमिति ॥ स्फटिकलौहित्यमप्येतेनेति** ॥ एतस्यापि प्रतिबिम्बसमानयोगक्षेमत्वादिति भावः । ध्वानोपधानं ध्वनिरूप उपाधिः ॥ **वक्ष्यति चैतदिति ॥** 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशमि'त्यादिना ॥ **एवमन्यदपीति** ॥ शङ्काविषादिकमित्यर्थः ।

प०— यदीदं वाक्यं मिथ्या स्यान्न किञ्चिद्बोधयेदिति तर्कस्य व्यभिचारोक्त्या व्याप्तिवैकल्यमाशङ्कते ॥ **ननु मा भूदित्यादिना** ॥ **उपधानसन्निधानस्य** उपाधिसन्निधानस्येत्यर्थः । **प्रशिथिलमूलत्वेन** व्याप्तिविकलत्वेनेत्यर्थः ॥ **यतोऽत्रेति** ॥ उदाहृतस्वप्नादिपदार्थेषु । अतो मैवमित्यन्वयः ॥ **वक्ष्यतीति** ॥ तृतीये भक्तिपादे 'सन्ध्ये सृष्टिराह हि' इत्यत्र ॥ **प्रतिबिम्बस्य त्विति** ॥ अन्यथा बिम्बस्य प्रतिबिम्बेनाभेदोक्त्ययोग इति भावः । भेदविशिष्टस्यास्ति मिथ्यात्वमित्यत आह ॥ **विच्छेदस्येति** ॥ बिम्बप्रतिबिम्बभेदस्यापीत्यर्थः ॥ **उपपादयिष्याम इति** ॥ 'पृथगुपदेशात्' 'अत एव चोपमा सूर्यकादिवत्' इत्यादाविति भावः ॥ **एतेनैवेति** ॥ प्रतिबिम्बतद्भेदयोः सत्त्वकथनेनेत्यर्थः । लौहित्यस्यापि प्रतिबिम्बत्वादिति भावः ॥ **स्वरेष्विवेति** ॥ अकारादिवर्णेष्विवेत्यर्थः ॥ 'अचः स्वरा' इत्युक्तेः ॥ व्यञ्जनेषु ककारादिष्वित्यर्थः ॥ **वक्ष्यते चैतदिति** ॥ आनुमानिकपादे 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम्' इत्यादाविति भावः ॥ **एवमन्यदप्यूहनीयमिति** ॥ शङ्काविषं च मरणस्येत्याद्यपि विषत्वशङ्काया एव मृतिहेतुत्वमित्येवंरूपेणेत्यर्थः । प्रपञ्चितमेतन्न्यायामृते 'असतः साधकत्वाभावे बाधकोद्धार'वादे । नन्वेवं श्रुतेः सर्वमिथ्यात्वार्थकत्वाभावे निरर्थकत्वेनाप्रामाण्यं स्यादित्यत आह ॥ **तस्मादिति** ॥

या०— प्रतिबिम्बं चेति ॥ अयं प्रदेशो बिम्बवान् प्रतिबिम्बवत्त्वादित्यनुमानादित्यर्थः । अत्रोदाहरणसमुदाये ॥ **यच्चेति** ॥ सवितृसुषिरप्रभृतीत्यर्थः ॥ **वर्णदैर्घ्यादिकं चेति** ॥ नगो नाग

इत्यादावित्यर्थः । सवितृसुपिरप्रभृतीत्यत्र प्रभृतिग्रहणेन 'छिद्रां छायां वा पश्येदि'त्यादिवाक्योक्तस्य ग्रहणम् ॥ **वक्ष्यतीति** ॥ भक्तिपाद इति शेषः ॥ **प्रतिबिम्बमत्यतेति** ॥ बिम्बाभिन्नत्वाङ्गीकारादिति भावः । उक्तं हि पञ्चपादिकायाम् 'अहंकर्तुरनिदमंशो बिम्बादिवत्प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरं किन्तु तदेव तदि'ति । एवंच सत्यस्यैव साधकत्वमित्याशयः । नन्वथाऽपि तद्विच्छेदस्यैव मिथ्याभूतस्यैव कार्यसाधकता दृष्टेत्यत आह ॥ **विच्छेदस्यापीति** ॥ **उपपादयिष्याम इति** ॥ 'किञ्चित्सादृश्यमपीश्वरे नासुरानृत' इत्यत्रेति शेषः ॥ **स्फटिकलौहित्यमपीति** ॥ तस्यापि प्रतिबिम्बरूपत्वादिति भावः ॥ **अन्यथेति** ॥ वर्णेषु स्वाभाविकदैर्घ्याद्यभावेन ध्वन्युपाधिकदैर्घ्याङ्गीकार इत्यर्थः ॥ **स्वरेष्विति** ॥ अकारादिष्वित्यर्थः ॥ **तथात्व इति** ॥ स्वराक्षरेष्वकारादिषु दीर्घादिध्वनिव्यङ्ग्यतावच्छेदकत्वेन कश्चन धर्मोऽङ्गीकार्यः । अन्यथा प्रागुक्तातिप्रसक्तेरिति भावः ॥ **वक्ष्यतीति** ॥ 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम् । तदेवार्थक्रियाकारि तत्सदेवार्थकारकमि'त्यत्रेति शेषः । ननु तथाऽपि मिथ्याभूते स्वाप्नकामिनीसम्भोगादौ चरमधातूत्सर्गसाधकत्वं, शङ्कितविषे च मरणसाधकत्वं, दृष्टमिति व्यभिचार इत्यत आह ॥ **एवमिति** ॥ स्वाप्नकामिनीसम्भोगज्ञानस्यैव चरमधातूत्सर्गसाधकत्वं, विषशङ्काजनितधातुव्याकुलताया एव मरणसाधकत्वमित्यूहनीयमित्यर्थः ।

श्री० — **प्रशिथिलमूलत्वेनेति** ॥ मिथ्यात्वे साधकत्वं न स्यादिति तर्कस्य स्वाप्नार्थेषु व्यभिचारेण व्याप्तिरूपाङ्गवैकल्येन प्रशिथिलमूलत्वादाभासत्वमित्यर्थः । तर्के व्यतिरेकान्वयव्याप्त्योरुभयोरपि नोक्तस्थलेषु व्यभिचार इत्याशयेनाह ॥ **योऽत्रेति** ॥ स्वाप्नादिष्वित्यर्थः ॥ **सङ्केतितेति** ॥ अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा सङ्केत इति उच्यते । इदं च तार्किकरीत्यैव । स्वमते पदानामर्थैः सम्बन्धस्य स्वाभाविकताया 'नित्ययोगोऽपि शब्दानामर्थैर्नैव निषिध्यत' इति वक्ष्यमाणत्वादित्यवधेयम् । ननु प्रत्यक्पराग्भावादिना विच्छेदो भेदस्तावद्बिम्बप्रतिबिम्बयोरुपलक्ष्यते ॥ स च मिथ्या । तथाच मिथ्याभूतस्यापि विच्छेदस्य स्वोचितार्थक्रियासाधकत्वमुपलब्धमित्यत आह ॥ **विच्छेदस्यापीति** ॥ बिम्बप्रतिबिम्बयोरैक्यखण्डनेन तद्विच्छेदस्य सत्यतोपपादयिष्यत इत्यर्थः ॥ **अन्यथेति** ॥ वर्णेषु स्वाभाविकदैर्घ्याद्यनङ्गीकार इत्यर्थः ॥ **स्वरेष्विति** ॥ दीर्घध्वनिसंबन्धेनाकारादिषु यथा दैर्घ्यादिप्रतिभासस्तथा य् व् इत्यादिव्यञ्जनेष्वपि तादृशदीर्घध्वनिसन्निधानवशेन दैर्घ्यं प्रतिभासेत । स चानुभवविरुद्धः । तथाच वर्णगताः स्वाभाविका एव दैर्घ्यादयो दीर्घध्वनिभिर्व्यज्यन्त इति भावः । शङ्कते ॥ **न तथाविधेति** ॥ यादृशदीर्घध्वनिभिः स्वराक्षराणामभिव्यञ्जनं भवति तादृशध्वनिव्यङ्ग्यं व्यञ्जनं न भवतीति न तत्र दैर्घ्यादिप्रतिभास इत्यर्थः ॥ **वर्णेष्वेवेति** ॥ तथाच स्वराक्षरादिष्वकारादिषु दीर्घध्वनिव्यङ्ग्यता-

वच्छेदकत्वेन कश्चन धर्मोऽङ्गीकार्यः । स एव दैश्यादिपदवाच्यो भविष्यतीत्यर्थः ॥ **परमास्तिकेनेति** ॥ श्रुतिसिद्धार्थस्य मिथ्यात्वं वक्तुः परकीयभाष्यकारस्य नास्तिकत्वादिति भावः । **श्रुत्यर्थो** नेहनानेति श्रुत्यर्थः ॥

च०— **प्रतिबिम्बस्य सत्यतेति** ॥ बिम्बप्रतिबिम्बयोरैक्योपगतेरिति भावः ॥ **विच्छेदस्यापीति** ॥ नेक्षेतोद्यन्तमित्यादिनोद्यदादित्यदर्शननिषेधेऽपि तत्प्रतिबिम्बदर्शनानिषेधः । वारिस्थमितिप्रतिबिम्बदर्शननिषेधेऽपि बिम्बदर्शनानिषेधः । बिम्बस्यावदातत्वेऽपि प्रतिबिम्बस्य श्यामत्वादीतिव्यवस्थानिर्वाहकस्य भेदस्येत्यर्थः ॥ **उपपादयिष्यत इति** ॥ भक्तिपाद इति पूरणीयम् ॥ **व्याख्यातमिति** ॥ तस्यापि बिम्बरूपत्वादिति भावः ॥ **स्वाभाविका एवेति** ॥ नगो नाग इत्यादाविति भावः । स्वरेषु अज्वर्णेषु । व्यञ्जनेषु हल्वर्णेषु ॥ **वक्ष्यतीति** ॥ 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशमि'त्यादिनेत्युपस्कर्तव्यम् ॥ **अन्यदिति** ॥ स्वाप्नकामिनीज्ञानादिकमेव चरमधातूत्सर्गजनकमित्यादिकमित्यर्थः ।

सु०— नन्वत्राप्यनुपपत्तिरेव । यतो नानेति नानाभूतः प्रपञ्चोऽभिधीयते । नतु भेदः। तथात्वे नानात्वमिति स्यात् । नैवम् । मुक्तोपसृप्यव्यपदेशादित्यादाविव भावप्रधाननिर्देशोपपत्तेः । भवितृप्राधान्येऽपि ब्रह्मणि नानाभूतावयवगुणकर्मादिनिषेधे नानात्वमेव निषिद्धं भवति । 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रमत' इति न्यायात् । उभयनिषेधे गौरवात् । विशेषणस्य प्रथमप्राप्तत्वात् । अन्यथा तदुपादानवैयर्थ्यात् । 'न जीर्णमलवद्वासाः स्नातकः स्यादि'त्यादौ दर्शनाच्च । अत एवोक्तम् । 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति । यत्क्वचिद्विशिष्टविधिनिषेधाङ्गीकरणं तद्गतिकतयैव । सविशेषत्वं च ब्रह्मणो वक्ष्यामः । नन्वेवं सत्यप्राप्तप्रतिषेध इति चेन्न । आभासप्राप्तत्वात् । तथाच 'न स्थानतोऽपी'त्याद्यधिकरणपूर्वपक्षे दर्शयिष्यामः । परस्यैव स्वर्गापूर्वादिनिषेधोऽप्राकृतत्वादनुपपन्नः । 'एकमेवाद्वितीय'मित्यादौ सजातीयविजातीयस्वगतनानात्वनिषेधं व्याकुर्वता भवताऽपि समाधातव्यमेतत् ।

वा०— स्वपक्षे नेयमनुपपत्तिरित्याशयेन नानाभूतः प्रपञ्च इत्युक्तमिति ध्येयम् । अत्र नाना शब्दोपस्थापितनानात्वरूपधर्मस्य नास्तीति क्रियान्वयित्वरूपप्राधान्यमभिप्रेत्यायं प्रयोगः । न चैवं नाना शब्दाद्विशेषणतयोपस्थापितनानात्वस्याप्राधान्येन, प्राधान्येनोपस्थित्यर्थं लक्षणाया आश्रयणीत्वात्प्रयोजनाभावेनासम्भवाच्चानुपपत्तिरेवेति वाच्यम् । रूढलक्षणात्वेन प्रयोजनानपेक्षणादित्याशयेनाह ॥ **मुक्तेति** ।

अत एव पक्षान्तरमाह ॥ **भविनिति** ॥ न चैवं नानाभूतप्रपञ्चनिषेध एव प्राप्यते, न तु भगवति स्वरूपभेदाभाव इत्युक्तमिति वाच्यम् । बृहदारण्यके काठके च 'तस्मिन् शुक्लमुत नीलमाहुर्गुहां प्रविश्य तिष्ठन्तं महान्तं विभुमात्मानमि'त्येतद्वाक्यात्पूर्ववाक्येषु भगवदवयवगुणादीनां प्रकृततया किञ्चनशब्दस्य सर्वनामतयोद्देश्यसमर्पकतया चैवंधर्मानिति विशेषशब्दसन्निहितसामान्यशब्दत्वाच प्रकृतवाक्यशेषस्थ-गुणादिपरत्वस्यैव न्याय्यत्वात् । न चैवं गुणादिनिषेधपरत्वाङ्गीकारेऽप्यपसिद्धान्त इति वाच्यम् । नानाभूतगुणादिनिषेधस्य नानात्वरूपविशेषणे पर्यवसानाङ्गीकारेणादोषादिति भावः । अत्र मूलभूतन्याय-माह ॥ **सविशेषण इति** ॥ ननु नायं न्यायो युक्तस्तथा सति 'यदाग्नेयोऽष्टाकपालो' 'न कलञ्जं भक्षयेदि'-त्यादौ विशिष्टविधिनिषेधाभावप्रसङ्गादित्यत 'एकदेशापवादेन कल्प्यमाने तु बाधके । न सर्वबाधनं युक्तमिति न्यायविदःस्थिता' इत्युक्तानुसारेण युक्त्यन्तरं तावदाह ॥ **उभयेति** ॥ सर्वेषामपि वाक्याना-मुत्सर्गतो लाघवानुसारेणैव प्रवृत्तिरत एव 'दध्ना जुहोती'त्यादौ गुणविधित्व एव पर्यवसानं स्वीकृतमिति भावः । तर्ह्यस्तु विशेष्यमात्रविषयकत्वेन पर्यवसानं लाघवस्यैवमपि सम्भवादित्यतो लाघवाविशेषेऽपि विशेषणविषयकत्वे विशेषनियामकमाह ॥ **विशेषणस्येति** ॥ विशेष्यस्वरूपमात्रोपस्थितेर्विधिनिषेधानु-पयोगादितरव्यावृत्ततया तत्स्वरूपोपस्थितेश्च स्वत एवेतरव्यावृत्तविशेषणोपस्थितिं विनाऽयोगेन निष्कृष्ट विशेष्योपस्थितिपूर्वभावित्वं विशेषणोपस्थितेरिति भावः । यद्वाऽऽवश्यकत्वं प्रथमप्राप्तत्वादित्यनेनोच्यते-ऽतो न बुद्धेर्विरम्यव्यापारानुपपत्तिप्रसङ्ग इति द्रष्टव्यम् । एवं विशेषणविषयत्वे साधकमुक्त्वा तदविषयत्वे विशेष्यमात्रविषयकत्वे किञ्चनेत्यादिनैव पूर्णत्वान्नानेति पृथगित्यादिविशेषणवैयर्थ्यं स्यादिति बाधकं चाह ॥ **अन्यथेति** ॥ तर्हि विशेष्योपादानं तवापि न स्यादित्यतो निषेध्यधर्मिसमर्पकतया सार्थक्य-सम्भवान्न तुल्यतेत्याशयेन विशेषणविषयकत्वेन पर्यवसाने दृष्टान्तमाह ॥ **न जीर्णेति** ॥ विशेषणस्य प्रथमप्राप्तावभियुक्तसम्मतिमाह ॥ **अत एवोक्तमिति** ॥ एवं युक्त्यन्तरमुपपाद्य यत्सविशेषणे हीति न्यायेन यदाग्नेय इत्यादावपि विशिष्टविषयत्वं न स्यादिति दूषणमभिहितं तन्निराकरोति ॥ **यत्क्वचि-दिति** ॥ यदाग्नेय इत्यत्र विशेषणवद्विशेष्यस्याप्यप्राप्तत्वेन तदुद्देशेन विशेषणमात्रविधानायोगान्न कल-ञ्जमित्यादौ च विशेष्यमङ्गीकृत्य विशेषणमात्रनिषेधासम्भवेनागत्या विधिनिषेधयोर्विशिष्टविषयत्वाङ्गी-करणमिति भावः । यद्वा सविशेषणे हीति न्यायमूलभूतां युक्तिमाह ॥ **उभयनिषेध इत्यादिना** ॥ अत्र प्रतीतितो विधिनिषेधयोर्विशिष्टविषयकत्वेऽपि परीक्षकैः प्रथमप्राप्त्यादि पर्यालोच्य विशेषणविषय-कत्वमवधार्यत इति फलतो विशेषणविषयत्वम् । यथा दध्ना जुहोतीत्यादेः प्रतीतितो विशिष्ट-विधित्वेऽपि फलतो गुणविधित्वं तद्वत् । एवं च पर्यवसितप्रतीतेर्विशेषणविषयकत्वेऽपि शाब्दप्रतीते-र्विशिष्टविषयकत्वान्न विशेषणस्य प्राधान्योपस्थित्यर्थं लक्षणादीति द्रष्टव्यम् । नन्वेवं निर्विशेषत्वस्य

श्रुत्यादिसङ्कोचेन श्रुतावपि गुणादिरूपविशेष्याङ्गीकारेण नानात्वरूपविशेषणमात्रविषयकत्वं निषेधस्य युक्तमित्यत आह ॥ **सविशेषत्वं चेति** ॥ केचित्त्वस्तु युक्तः सविशेषण हीति न्यायस्तथाऽपि सति विशेष्ये बाधे विशेषणमात्रविषयकत्वस्य तन्न्यायसिद्धतया प्रकृते च नेह नानेति निषेधस्य विशेष्यविषयकत्वेऽपि बाधकाभावान्न तन्न्यायप्रसरोऽत्रेत्याशङ्क्याह ॥ **सविशेषत्वं चेति** ॥ जन्मादिसूत्रादाविति शेष इत्याहुः । ननु परमेश्वरस्य प्रमाणान्तरागोचरतया तद्गुणादिनानात्वस्याप्राप्तत्वात्तन्निषेधानुपपत्तिरिति शङ्कते ॥ **नन्विति** ॥ यद्युगपद्भिन्नस्थानं, तद्भिन्नं दृष्टं, यथा घटादि, भिन्नस्थानश्चायमित्यादियुक्त्याभासेन प्रत्यक्षाभासेन च भगवद्रूपाणां तार्किकाद्युत्प्रेक्षितयुक्त्याभासेन च तद्गुणादीनां च नानात्वस्य प्राप्त्या तन्निषेधो युक्त एवेत्याशयेनाह ॥ **आभासेति** ॥ **अप्राप्तत्वादिति** ॥ स्वर्गादीनां प्रमाणान्तराप्राप्तत्वाच्छ्रुतिप्राप्तस्य च निषेधे श्रुतेरुन्मत्तवाक्यत्वापातादिति भावः । एकमेवेति श्रुतावेकशब्दं स्वगतभेदनिषेधकत्वेन व्याकुर्वता त्वयाऽप्यवश्यसमाधातव्यानुपपत्तिं मां प्रत्येवं प्रसञ्जयतः स्वव्याहतिरित्याह ॥ **एकमिति** ॥

स० — गौरवादेकविषयत्वे वक्तव्ये प्रथमातिक्रमे कारणाभावान्नागृहीतविशेषणान्यायाच्च विशेषणनिषेध इत्याह ॥ **विशेषणस्येति** ॥ विशेष्यविषयत्वे विशेषणवैयर्थ्यं चेत्याह ॥ **अन्यथेति** ॥ विशेषणविषयत्वेऽपि विशेष्याभिधानस्य निषेध्याधिकरणसमर्पकत्वेनानुवादत्वान्नानर्थक्यमिति भावः । अत्र दृष्टान्तमाह ॥ **न जीर्णेति** । इदं विशिष्टविषयकनिषेधस्य विशेषणे पर्यवसानोदाहरणम् । विशिष्टविषयकविधेर्विशेषणपर्यवसानोदाहरणस्य 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'त्यादेः ग्रहणायादिपदम् । तर्हि गौरवाद्विशिष्टविधिनिषेधौ क्वापि न स्यातामित्यत आह ॥ **यत्क्वचिदिति** ॥ 'सोमेन यजेत' 'अपरपक्षे श्राद्धं कुर्वीत' 'न हिंस्यात् सर्वा भूतानि' इत्यादीत्यर्थः । नन्वत्राप्यगतिका गतिरस्ति निर्विशेषश्रुतेरित्यत आह ॥ **सविशेषत्वं चेति** ॥ जन्माधिकरणे ॥ **एकमेवाद्वितीयमित्यादौ सजातीयेति** ॥ अत्रैकपदेन स्वगतनानात्वनिषेधः । अवधारणेन सजातीयभेदनिषेधः । अद्वितीयमित्यनेन विजातीयनानात्वप्रतिषेध इति ज्ञातव्यम् । यथाऽऽह, 'वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः । वृक्षान्तरात् सजातीयो विजातीयः शिलादितः । तथा सद्वस्तुनो भेदत्रयं प्राप्तं निषिध्यते । ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमादि'ति ॥

प० विशिष्टस्य विशेष्यस्य वा कुतो न निषेध इत्यत आह ॥ **उभयेति** ॥ **तदुपादानवैयर्थ्येति** ॥ नानेतिपदोपादानवैयर्थ्यात् । किञ्चनेत्यनेनैव सर्वनिषेधप्राप्तेरिति भावः ॥ **न जीर्णेति** ॥

जीर्णत्वमलिनत्वरूपविशेषणनिषेधस्यैव तत्र दर्शनादित्यर्थः । **उक्तं** प्राभाकरैरित्यर्थः ॥ **यत्कञ्चिदिति** । दण्डी नास्तीत्यादाविति भावः । ननु सविशेषणे हीतिन्यायो विशेष्यबाधे सत्येवेति वदन्तं प्रत्याह । **सविशेषत्वं हीति** ॥ जन्माधिकरणे पराभिमताखण्डत्वनिरासपूर्वमनन्तगुणवत्वलक्षणं सविशेषत्वं वक्ष्याम इत्यर्थः । तथाच किञ्चनेतिपदोक्तधर्मनिषेधायोगाद्भेदस्यैव निषेध इति भावः । प्रपञ्चितश्चैतच्छ्रुत्यर्थो न्यायामृते । 'न स्थानतोऽपी'ति भक्तिपादे ॥ **समाधातव्यमेतदिति** ॥ अप्राप्तनिषेधचोद्यं श्रुतितात्पर्याभासयुक्त्याभासप्राप्तत्वात्सजातीयादिभेदस्येति समाधातव्यमित्यर्थः ॥

या० — नागृहीतविशेषणन्यायेनापि विशेषणनिषेध एवार्थ इत्याह ॥ **विशेषणस्येति** ॥ **तदुपादानेति** ॥ विशेषणोपादानेत्यर्थः । धर्मिनिषेधे धर्मनिषेधस्यापि लाभादिति भावः । नन्वेवं भवत्पक्षेऽपि किञ्चनेतिविशेष्योपादानं व्यर्थमापन्नमित्याशङ्कां परिहरन्सविशेषणे हीति न्यायस्योदाहरणमाह । **न जीर्णेति** ॥ अत्र यथा स्नातकनिषेधाभावेऽपि विशेषणनिषेधाश्रयसमर्पकत्वेनानुवादकत्वान्न स्नातकपदवैयर्थ्यं तथा प्रकृतेऽपि किञ्चनपदावैयर्थ्यमिति भावः । नागृहीतविशेषणन्यायस्यापि स्वोत्प्रेक्षितत्वशङ्कापरिहाराय परीक्षकसम्मतमुदाहरणं दर्शयति ॥ **अत एवेति** ॥ नागृहीतविशेषणन्यायादेवेत्यर्थः । एवं चाभिधान्यायेनात्रापि निषेधो विशेषणेनैवान्विततया क्षीणशक्तिर्विशेष्यान्वितो न भवतीति भावः । तर्हि क्वापि विशिष्टविषयौ विधिनिषेधौ न स्यातामित्यत आह ॥ **यत्कञ्चिद्विशिष्टेति** ॥ 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती'त्यादौ विशिष्टकर्मविधानादनेकेषामपि गुणानां विधिः सिध्यतीत्युक्तं भेदलक्षणे । अन्यथाऽनेकगुणविधाने वाक्यभेदप्रसङ्गेनागतेः । वैदिकं विशिष्टनिषेधोदाहरणं चिन्त्यम् । नन्वत्राप्यगतिरेव निर्विशेषत्वश्रुतेरित्यत आह ॥ **सविशेषत्वमिति** ॥ **वक्ष्याम इति** ॥ जन्माधिकरणादाविति शेषः ॥ **अप्राप्तेति** ॥ भगवदवयवगुणकर्मादिनानात्वस्याप्राप्तत्वादिति भावः ॥ **दर्शयिष्याम इति** ॥ तत्र हि यद्युगपद्भिन्नस्थानं तद्भिन्नं दृष्टम यथा घटादि, भिन्नस्थानश्चायमित्यतो भिन्न एवेति भवेत् । भिन्नानां च तारतम्यमनुग्राह्यानुग्राहकभावश्चोपलब्ध इति तत्प्रसङ्गोऽपीति युक्त्याभासप्राप्तिं तथा 'कार्यकारणबद्धौ ता'वित्यादिश्रुत्याऽऽपातप्रतीतभिन्नत्वादिप्राप्तिं च दर्शयिष्याम इत्यर्थः । इत्याद्यधिकरणेष्वत्रादिपदेनाहिकुण्डलाधिकरणसङ्ग्रहः । तत्रापि क्रियाणां ज्ञानादिगुणानां चासाक्षीत् सृजति स्रक्ष्यति व्यज्ञासीत् जानाति ज्ञास्यतीत्यादिश्रौतव्यवहारैरनित्यतयाऽवगतानां भगवता नाभेदो युज्यत इत्यादिरूपां प्राप्तिं दर्शयिष्याम इत्यर्थः ॥ **एकमेवाद्वितीयमित्यादाविति** ॥ अत्रैकपदेन स्वगतनानात्वप्रतिषेध इत्यवगन्तव्यम् । यथाऽऽह । 'वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः । वृक्षान्तरात्सजातीयो विजातीयः शिलादितः । तथा सद्वस्तुनो भेदत्रयं प्राप्तं निषिध्यते । ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमादि'ति ।

श्री०—**विशेष्यं नाभिधा गच्छेदिति** ॥ अभिधा शक्तिः । अयमर्थः । जातिविशिष्टव्यक्तौ पदानां शक्तिरिति तार्किकैरुच्यते । तत्र मीमांसको वदति । अगृहीतविशेषणा बुद्धिर्विशेष्ये न प्रवर्तत इत्यादौ गवादिपदानां वाच्यतया जातिं गृहीत्वा पश्चात्तद्विशिष्टव्यक्तौ शक्तिर्वाच्या । तथाच गोत्वादि- जातावेव गवादिपदानां शक्त्या सर्वस्योपपत्त्या विशेषण एव क्षीणशक्तित्वादभिधा विशेष्यं न गच्छतीति । ननु तर्हि गामानयेत्युक्ते व्यक्तिलाभः कथमिति चेत् । आक्षेपात् व्यक्तिं विना केवलगोत्वजातेरानेतुम- शक्यत्वात्तदन्यथाऽनुपपत्त्या व्यक्तिलाभ इति द्रष्टव्यम् । ननु तत्र सति विशेष्यबाध इत्युक्तत्वान्नात्र विशेष्यबाधोस्ति । ब्रह्मणि गुणादेरप्रामाणिकत्वादित्यत आह ॥ **सविशेषत्वं चेति** ॥ अवयवगुण- कर्मादिविशेषसाहित्यमित्यर्थः ॥ **एवं सतीति** ॥ नेहनानेतिवाक्यस्य भगवति स्वगतभेदनिषेधकत्व व्याख्यान इत्यर्थः ॥ **अप्राप्तेति** ॥ भगवति स्वगतभेदस्याप्राप्तत्वादित्यर्थः ॥ **स्वर्गापूर्वेति** ॥ श्रुत्या प्राप्त- स्यैव श्रुत्या प्रतिषेधे श्रुतेरुन्मत्तवाक्यत्वं स्यादिति भावः ॥

च०— **नानाभूतः** नानात्वं प्राप्तः । भूप्राप्तावात्मनेपदी । आधृषाद्वेति विभाषितो णिच् ॥ **भावप्रधानेति**॥ प्रकृतिजन्यबोधीयप्रकृत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारतोपन्नो हि भावस्तन्मुख्यविशेष्यक- शाब्दधीजनक इत्यर्थः । 'एकदेशापवादेन कल्प्यमाने तु बाधके । न सर्वबाधनं युक्तमिति न्यायविदः स्थिता' इत्यभियुक्तवचनमनुसन्धान आह ॥ **उभयेति** ॥ विशेष्यमात्रविषयकत्वपर्यवसानेन लाघव- सम्भवेऽपि विशेषणविषयकतयैव निर्देशोपपत्तेरित्यर्थः ॥ **भवितृप्रधान्येऽपीति** ॥ नानापदस्य लक्षणा- नुपगमेनाश्रयमुख्यविशेष्यकान्वयधीजनकत्वोपगमेऽपीत्यर्थः ॥ **न्यायादिति** ॥ स्वर्गी ध्वस्त इत्यादिव- दिति भावः । लाक्षणिके 'नागृहीतविशेषणबुद्धिर्विशिष्टमवगाहत' इति न्यायेन पर्यवमानमुपेयमित्याह ॥ **विशेषणस्येति** ॥ **तदुपादानेति** ॥ विशेषणोपादानेत्यर्थः । विशेषणविषयकतयैव पर्यवसानं निदर्शन- प्रदर्शनेन द्रढयति ॥ **न जीर्णेति** ॥ विशेषणनिषेधाश्रयसमर्पकतयानुवादकत्वेन स्नातकपदं सार्थकमिति भावः । उक्तार्थेऽभियुक्तवचनं प्रमाणयति ॥ **उक्तमिति** ॥ यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीत्यादौ विशिष्टकर्मविधानादनेकेषां गुणानां विधिः सिध्यतीति भेदलक्षणीयसिद्धान्तो भज्येतेत्यत आह ॥ **यत्कश्चिदिति** ॥ **अगतिकतया** ॥ अनेकगुणविधाननियन्त्रितवाक्यभेदप्रसङ्गेन । दण्डदेवदत्तरूपविशेषणविशेष्यवृत्तिप्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकाभावद्वयसमवधानदशायां दण्डी नास्तीत्यादिकमेव विशिष्टनिषेधस्योदाहरणम् । ननु ब्रह्मण एव निर्विशेषतया तद्गतविशेषेषु नानात्व- निषेधन एव तात्पर्यमित्युक्तिः कथं सङ्गच्छत इत्यत आह ॥ **सविशेषत्वमिति** ॥ जन्मादिनय इति

कत्ववद्घटपटादिवदिति युक्त्याभासप्रत्यक्षाभासश्रुतितात्पर्यभ्रमादीत्यर्थः । इत्यादीत्यादिपदेनाहिकुण्डलनयः परिगृह्यते । तत्रापि भागवतगुणक्रियादीनामंशात् भेद एवोपेतव्य इति पूर्ववादिमतं दर्शयिष्याम इत्यर्थः ॥ **स्वगतनानात्वेति** ॥ एकमेवेत्यादावेकपदेन स्वाश्रितगुणक्रियादिप्रतियोगिकस्यैवकारेण जीवप्रतियोगिकस्याद्वितीयपदेन जडप्रतियोगिकस्य च नानात्वस्य निषेधमित्यर्थः ।

अनु० — साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता ॥
स्वीकृतं ह्यविशेषस्य साध्या साधकता पुनः ॥
तच्चाविशेषमानेन साध्यमित्यनवस्थितिः ॥

सु० — ननु यथा भवतो मिथ्याभूतस्य साधकत्वं न सम्मतम् । तथा मम सत्यस्य साधकत्वं न सम्मतम् । चैतन्यातिरिक्तस्य सत्यताऽनभ्युपगमात् । चैतन्यस्य च क्रियावेशशून्यस्य साधकत्वायोगात् । तत्र यथा मिथ्याभूतस्य साधकत्वानभ्युपगमेन श्रुतेर्मिथ्यात्वेऽसाधकत्वप्रसङ्गान्न बन्धमिथ्यात्वसाधकतेत्युक्तं भवता । एवं मयाऽपि सत्यस्य साधकत्वमनभ्युपगच्छता वक्तुं शक्यत एव । प्रत्यक्षस्य सत्यत्वे साधकत्वं न स्यात् । मिथ्यात्वं तु त्वयैव नोपेयते । ततश्च प्रत्यक्षस्यापि बन्धसत्यत्वसाधकत्वाभावा'न्मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधत' इत्यनुपपन्नमिति । एवं च प्रथममेव मतिकर्दमे कथारम्भणमशक्यमापद्येत । तेनाविचार्यैव तावत्प्रमाणसदसत्त्वं विचार आरब्धव्य इति । मैवम् । दुःखादिसत्यताग्राहिणः प्रत्यक्षस्य सत्यत्वेऽप्यविरोधात् । सतः साधकत्वं मया न स्वीकृतमित्युक्तमिति चेत्तत्राह ॥ साधकत्वमिति ॥ तेन मायावादिना । भावरूपाज्ञानस्येति शेषः । हिशब्दो हेतौ प्रसिद्धिद्योतको वा । मायावादिना खलु भावरूपाज्ञानं सिषाधयिषता 'प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासदर्शनादि'त्यादिना तत्साधनाय साक्षिप्रत्यक्षं प्रमाणमङ्गीकृतम् । आश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यमित्याद्युत्तरवाक्येन प्रत्यक्षस्य साक्षित्वावगमात् । एवं च साक्षिणाऽज्ञानसिद्धिमिच्छता परेण सतः साधकत्वं स्वीकृतमेव । साक्षिचैतन्यस्य सत्त्वात् । अतो मया सतः साधकत्वं नाङ्गीकृतमिति न शक्यते वक्तुम् । अस्माभिरपि दुःखादिबन्धसत्यतायां साक्षिप्रत्यक्षमेवोपन्यस्तमिति हृदयम् । अज्ञानवशादेव साक्षिणः साधकत्वं मयाऽङ्गीक्रियते । न स्वत इति चेन्न । इतरेतराश्रयत्वप्रसङ्गात् । न खलु साक्ष्यवभासादन्याऽज्ञानसत्ता तवास्ति । ततोऽज्ञाने सति साक्षिणः साधकत्वसिद्धिस्तस्यां चाज्ञान

सिद्धिरिति कथं नेतरेतराश्रयत्वम् । द्वयोरनादित्वान्नैवमिति चेत् । तर्ह्यज्ञानवशादिति रिक्तं वचः । न हि सर्वथा यद्यन्नापेक्षते तत्तदधीनमिति युज्यते । अपेक्षायां तु परस्पराश्रयानुसारः ।

वा० — ननु 'साधकत्वं सतस्तेने'त्यादिभाष्ये मायावादिसम्बन्धिसत्साधकत्वाङ्गीकारव्युत्पादनमसङ्गतं फलाभावात् । न चासतः साधकत्वाभावे सतोऽपि तन्न स्यादिति प्रतिबन्दीमोचनं तत्फलमिति वाच्यम् । मूलाभावेन परस्य सतः साधकत्वाङ्गीकारायोगात् । योगे वा प्रत्यक्षादेः साधकत्वेनास्माभिरनुपन्यस्तत्वेन मां प्रति प्रतिबन्द्याऽनुत्थानात् । न च प्रत्यक्षादेः साधकत्वेनानुपन्यासेऽपि बाधकत्वेन ह्ययोन्यासात्स्वपक्षासाधकस्य च परपक्षबाधकत्वासम्भवात्तत्खण्डयितुं युक्ता प्रतिबन्दीति वाच्यम् । मदुक्तविरोधोपन्यासस्य परोक्तसाधकनिरासार्थत्वेन प्रतिबन्दीग्रहणेन प्रत्यक्षादेर्बाधकत्वासम्भवेऽपि प्रतिपक्षत्वसम्भवेन परोक्तस्य साधकत्वानिर्वाहेन व्यर्थत्वादित्यत आस्तामियं प्रमाणसदसत्त्वचिन्ता प्रमाणेनैव प्रमेयसिद्धेः । अन्यथा त्वयाऽपि मिथ्यात्वनिराकरणे सत्यतासाधने च प्रत्यक्षादिप्रमाणोपन्यासस्य, सत्साधकत्वस्य प्रतिवाद्यनङ्गीकारेणासत्साधकत्वस्य च स्वानङ्गीकारेणाशक्यतयाऽऽवयोः साधकबाधकोपन्यासस्याशक्यतया वा कथाभावप्रसङ्गात्सत्त्वासत्त्वौदासीन्येन प्रमाणेनैव कथाप्रवृत्तेरुभाभ्यामपि स्वीकार्यतया मिथ्यात्वसाधकतया श्रुत्याद्युपन्यासो ममाप्युपपन्न एवेति परेण शङ्किते मदुपन्यस्तप्रमाणस्योभयसिद्धसाधकभावतया प्रमाणसदसत्त्वविचारपूर्वककथाप्रवृत्तावपि मम न काऽपि क्षतिरित्याशयेन भाष्यकृता स्वप्रमाणस्योभयसिद्धसाधकभावः प्रदर्श्यत इति नासङ्गतिरित्यभिप्रेत्योत्तरभाष्यं योजयति ॥ **नन्विति** ॥ भाष्ये साध्यानुक्तेः साध्यमध्याहृत्य तत्र प्राप्तप्रतिबन्दीमोचनाय हेतुकथनपरं भाष्यमवतारयति ॥ **दुःखादीति** ॥ प्रतिवादिन इति प्रकृतस्य परामर्शे मायावादिनः सत्साधकत्वस्वीकारानुपन्यासेन प्रकृतानुपयोगापत्तिस्त्वयेति सन्निहितप्रकृतस्यापि मायावादिन आपरोक्ष्येण निर्दिष्टस्य तेनेति पारोक्ष्येण परामर्शानुपपत्तिरित्यतः प्रकृतत्वमात्रविवक्षया मायावादिपरामर्शोऽयमित्याह ॥ **तेनेति** ॥ दुःखादेः प्रकृतत्वात्तस्य साधकत्वमित्यनेन सम्बन्धे साक्षिणो दुःखादिसाधकत्वस्य स्पष्टं परेणानुपन्यासादाह ॥ **भावेति** ॥ स्वीकार्यत्वाभिप्रायेण स्वीकृतत्वोक्तिरौपचारिकीति भावेनाह ॥ **प्रसिद्धीति** ॥ इत्याद्युत्तरवाक्येनेत्यत्रादिपदेन 'भावान्तरस्याज्ञानस्य न निवर्तकं तस्याज्ञानविषयप्रतिभासत्वादि'त्यादेः सङ्ग्रहः । नन्वेतावताऽपि सत्साधकमित्युक्तिस्तदीया नास्तीति न तत्सिद्धिरित्यत आह ॥ **एवं चेति** ॥ नन्वज्ञानसाधकस्य साक्षिणः सत्यत्वेऽपि दुःखादिसत्यतासाधकप्रत्यक्षादिसत्यतायां किमागतम् । न च यत्सत्यं तन्न साधकमिति

[illegible] एवमप्युभयसिद्धप्रमाणाभावेन [illegible]
प्रसङ्गस्तदवस्थ एवेत्यतोऽज्ञानसाधकसत्यसाक्षिण एव दुःखादिसत्यतासाधकतयोपन्यासान्न क्षतिरित्याह । **अस्माभिरपीति** ॥ अज्ञानवशात्साक्षिणः साधकत्वं वदता कूटस्थचैतन्यरूपसाक्षिण एव साधकत्वमज्ञानं तु तत्र सहकारीति वा वक्तव्यम् । अविद्यावृत्तिप्रतिबिम्बितचैतन्यमेव साक्षी स एवाज्ञानसाधक इति वा वक्तव्यम् । तत्र प्रथमेऽज्ञानस्य सहकारिमात्रत्वेऽपि साधककूटस्थचैतन्यस्य सत्त्वात्सतः साधकत्वमक्षतमेवेति सतः साधकत्वं पराभ्युपगतमिति मदिष्टसिद्धिरेव । पक्षद्वयेऽपि साक्षिसाधकत्वसिद्धेरज्ञानसापेक्षत्वादितरेतराश्रयश्च स्यादित्याह ॥ **इतरेति** ॥ ननु साक्षिणः साधकत्वसिद्धेरज्ञानाधीनत्वेऽपि नाज्ञानस्य साक्षिसाधकत्वसिद्ध्यधीनत्वम् । तदसिद्धावपि व्यावहारिकाज्ञानादेः सत्त्वसम्भवादित्यतः कालान्तरीयब्रह्मज्ञानबाध्यत्वेन व्यावहारिकत्वमङ्गीकुर्वताऽपि त्वयाऽज्ञानादौ पारमार्थिकार्थगतसत्त्वानङ्गीकारात् सत्त्वेन प्रतीतिमात्रमेव सत्त्वेत्येव वक्तव्यतया सत्त्वेन साक्ष्यवभासरूपाज्ञानसत्तायाः साक्षिसाधकत्वसिद्ध्यधीनता अस्त्येव । वियदादेः सद्भावे प्रतीतिनियमाभावेन तत्रार्थगतमायिकसत्त्वाङ्गीकारेऽप्यविद्यादिसद्भावे तत्प्रतीत्यभावाभावेन तत्र तत्प्रतीतेरेव तत्सत्तारूपत्वस्याविद्यादिप्रातिभासिकत्वं वदता त्वयाऽप्यभ्युपगमाच्च तत्सत्तायाः साक्षिसाधकत्वसिद्ध्यधीनत्वाद्युक्तमितरेतराश्रयत्वमित्याह ॥ **न खल्विति** ॥ तवेत्यस्य आत्मातिरिक्तसर्वापारमार्थिकत्ववादिन इति विशिष्याविद्याविद्यकादेः प्रातिभासिकत्ववादिन इति चार्थः । अनादित्वं वदता किं सर्वथाऽनपेक्षाऽभिमतोतान्यत्रापेक्षायामुत्पत्तौ तदभावः । नाद्य इत्याह ॥ **तर्हीति** ॥ न द्वितीय इत्याह ॥ **अपेक्षायामिति** ॥

स०— **मतिकर्दमे** मतिकालुष्ये अतिकर्दम इति वा । सिसाधयिषतेत्यस्य साक्षिप्रत्यक्षमिति वक्ष्यमाणेन संबन्धः । प्रत्यक्षं तावदित्यादिपरकीयं वाक्यमिति विवेकः । परेण साक्षिप्रत्यक्षं प्रमाणीकृतमित्यत्र ज्ञापकमाह ॥ **आश्रयप्रतियोगीति** ॥ ननु साक्षिचैतन्यस्य सत्त्वाभ्युपगमेऽपि चक्षुरादिप्रत्यक्षस्य साक्ष्यतिरिक्तस्य सत्यत्वे साधकत्वं न स्यादिति मयोच्यत इत्यत आह ॥ **अस्माभिरिति** ॥ **इतरेतराश्रयप्रसङ्गादिति** ॥ घटादौ प्रतीतिविषयत्वातिरिक्तस्यैव प्रतीतिविषयत्वरूपसत्यत्वमात्रवत्यज्ञानादौ अतिरिक्तस्वरूपसत्यत्वस्याभावेन तादृशस्वरूपसत्त्वस्य च साक्षिसाधकत्वसिद्ध्यधीनत्वादिति भावः ॥ अनादित्वादिति वदता किं सर्वथा परस्य परापेक्षाभावोऽभिप्रेत उतोत्पत्त्यादौ । नाद्य इत्याह ॥ **तर्ह्यज्ञानवशादितीति** ॥ नान्त्य इत्याह ॥ **अपेक्षायामिति** ॥

प०— **क्रियावेशेति** ॥ औदासीन्यप्रच्युतिहीनस्येत्यर्थः ॥ **मतिकर्दम इति** ॥ बुद्धिकालुष्य इत्यर्थः । प्रसिद्धिद्योतक इत्युक्तं व्यनक्ति ॥ **मायावादिना खल्विति** ॥ **आश्रयेति** ॥ अज्ञानाश्रय-

प्रतियोगिनाज्ञानित्यर्थः । प्रतियोगिपदेनात्राज्ञानविषयो ध्येयः । इतीत्युक्तम् । तद्व्यनक्ति ॥ **अत मयेति** ॥ यस्मात्सतः साधकत्वं तेनापि स्वीकृतमत इत्यर्थः । अस्त्वज्ञानादिसाधकं साक्षिरूपं सत्यं दुःखादिसाधकं प्रत्यक्षं कथं सत्यमित्यत आह ॥ **अस्माभिरपीति** ॥ साक्षिणः साधकत्वं नेति भावेन आशङ्कते ॥ **अज्ञानवशादेवेति** ॥ इतरेतराश्रयत्वं व्यक्तीकर्तुमाह ॥ **न खल्विति** ॥ **द्वयोरिति** । अज्ञानसाक्षिणोरित्यर्थः ॥

या० — **मतिकर्दमे** बुद्धिकालुष्ये । ननु सतः साक्षिणः साधकत्वेऽपि तदतिरिक्तस्य चाक्षुषादिप्रत्यक्षस्य न सतः साधकत्वं मया स्वीक्रियत इत्यत आह ॥ **अस्माभिरपीति** ॥ परस्परसत्तायां परस्परापेक्षितत्वेन खल्वत्रेतरेतराश्रयत्वं परस्याभिप्रेतं न ज्ञप्तौ । तथा चाज्ञानज्ञप्तेः साक्षिसाधकत्वसिद्ध्यधीनत्वेऽपि नाज्ञानसत्तायास्तदधीनत्वमतो नेतरेतराश्रयत्वमित्यत आह ॥ **न खलु साक्ष्यवभासादिति** ॥ अज्ञानस्य प्रातिभासिकत्वाङ्गीकारादिति भावः ॥

श्री० — **साधकत्वायोगादिति** ॥ सिद्धिकर्तृत्वरूपसाधकत्वायोगादित्यर्थः । तत्प्रत्यक्षं चक्षुरादिकं किं न स्यादित्यत आह ॥ **आश्रयेति** ॥ ननु दुःखादिबन्धस्य सत्यतायां प्रत्यक्षविरोधत इति भवद्भिश्चक्षुरादिप्रत्यक्षस्यैव प्रमाणतया भवदभिप्रेतत्वात्तस्य च मया सत्त्वानङ्गीकारात्कथं सतः साधकत्वं तेन स्वीकृतमित्युच्यत इत्यत आह ॥ **अस्माभिरपीति ॥ न खल्विति** ॥ अज्ञानस्य प्रातिभासिकत्वेन प्रतिभासमात्रशरीरत्वादिति भावः । द्वयोरज्ञानसाक्षिणोः ॥ **न हीति** ॥ किञ्चिदुपकाराभावे तदधीनताया एव मृषात्वादिति भावः ।

च० — साधकाभिमतानां साक्षीतरेषां सत्यता मया नोरीक्रियत इत्यत आह ॥ **अस्माभिरपीति** ॥ **साक्ष्यवभासादिति** ॥ अज्ञानस्य प्रातिभासिकत्वोपगतेरिति भावः ॥

सु० — एवमुभयवादिसम्प्रतिपन्नं प्रमाणं स्वमतेऽस्तीति दर्शयितुं सत्यस्य साक्षिणोऽज्ञानसाधकत्वं पराभ्युपगतमुपन्यस्तम् । साम्प्रतं प्रसङ्गात्तदपि नोपपद्यत इत्याह ॥ **अविशेषस्येति** ॥ भावरूपमज्ञानमनिच्छन्तं प्रति हि तत्र साक्षिप्रत्यक्षं प्रमाणमुपन्यस्तम् । न च तदुचितम् । साक्षिणोऽशेषविशेषविधुरत्वाङ्गीकारात् । अविशेषस्य साधकता तु परं प्रति त्वया साध्यैव । न तु सिद्धा । यत्साधकं करणं वा फलं वा नित्यं वा ज्ञानं तत्सर्वं जात्यादि-

विशेषवत् । यच्च निर्विशेषं शशविषाणादि न तत्साधकमिति परेण नियमस्याङ्गीकृतत्वात् न ह्यसम्प्रतिपन्नसाधकभावं कस्याप्यर्थस्य साधनायोपन्यासमर्हति । अतिप्रसङ्गात् । ननु प्रमाण वस्तुसिद्धावुपयुज्यते । तत्सविशेषत्वं तु किमर्थमिति चेत्सत्यम् । निर्विशेषस्य प्रामाण्यमेव नोपपद्यत इति तदर्थमेव विशेषानुसरणम् । न हि साधकतमत्वादिविशेषाभावे प्रामाण्यं शक्य निर्वाहम् । साक्षिण्यारोपिततयैवाज्ञानं सिध्यति । न ततोऽतिरिक्तं साधकत्वं तस्येति चेत् न तर्हि सुतरां साक्षिणाऽज्ञानसिद्धिः । प्रकाशाश्रयं तमः प्रकाशेनैव सिध्यतीत्यस्यार्थस्या विशेषवादिना भवता परं प्रत्युपपादयितुमशक्यत्वात् । किञ्चाज्ञानमारोपितमपि साक्षिणो विषयो न वा । आद्ये विषयित्वं साक्षिण्यापतितम् । द्वितीये साक्षित्वमेवानुपपन्नम् । 'साक्षाद्द्रष्टरि संज्ञायामि'ति निर्वचनासम्भवात् । अतद्विषयेण तत्सिद्धिरलौकिकी । निर्विशेषस्याप्यज्ञानवशात्साक्षित्वमिति च निरस्तम् । यस्तु वैय्यात्याद्ब्रवीति । सिद्धप्रामाण्यमिव साध्यप्रामाण्यमपि प्रमाणं प्रयोगार्हमेव । अन्यथा शब्दानित्यत्वे कृतकत्वमुपन्यस्य परेणान्यतरासिद्धावुद्भावितायां तत्साधनस्फूर्तिमताऽपि तूष्णीं भवितव्यम् । अहं चाविशेषस्य साक्षिणः साधकत्वं विप्रतिपत्तौ साधयिष्यामीति । स प्रष्टव्यः । किं सविशेषेण प्रमाणेनैतत्साध्यते उताविशेषेणेति । नाद्यः । तस्य तव मिथ्यात्वात् । परेण चोक्तन्यायेन तस्य साधकत्वानभ्युपगमात् । अतो द्वितीय एवाङ्गीकर्तव्य इत्याह ॥ तच्चेति ॥ किमतः । इदं ततः । तदविशेषप्रमाणं किं साक्ष्युतान्यत् । आद्ये अन्योन्याश्रयत्वम् । साक्षिणः साधकत्वसिद्धावविशेषस्यापि साधकत्वमित्येषोऽर्थः सिध्यति । तत्सिद्धौ च साक्षिणः साधकत्वसिद्धिरिति । न द्वितीयः । तदभावात् । अविशेषान्तराङ्गीकारे दूषणमाह ॥ इत्यनवस्थितिरिति ॥ तस्यापि अविशेषस्य साधकत्वमविशेषप्रमाणेनैव साध्यमित्युपपादनमितिशब्देन सूचयति । ननु चाविशेषस्य साध्या साधकतेति प्रकृतमतः सा चेति परामर्शो युक्तः । सत्यम् । तथाऽपि प्राग्यन्मिथ्याभूतस्यापि साधकत्वं प्रमाणविकल्पनिराकरणेन निरस्तं तत्सविशेषत्वादिविकल्पनिराकरणेनापि निराकरणीयमिति सूचनाय सामान्येन नपुंसकनिर्देशः । एतेन प्राग्विकल्पितः सताऽऽत्मभूतेनेति पक्षोऽपि निरस्तो वेदितव्यः ।

वा० — नन्वविशेषस्येत्यादिभाष्येऽविशेषस्य साधकत्वनिराकरणेऽसङ्गतिः प्रकृतसाक्षिसाधकत्वनिराकरणे च पूर्ववाक्ये तदनुपन्यासानुपपत्तिर्निराकर्तव्यत्वे च पराभ्युपगततयाऽप्युपन्यासो व्यर्थ एव । सार्थक्ये वा तावताऽपि प्रकृतस्येष्टसिद्ध्या तन्निरासोऽसङ्गत एवेत्यत आह ॥ तदेवमिति ॥ नन्वविशेष-

स्वाविशेषस्य साधकताया अप्रस्तुतत्वात्तदसिद्धिकथनमसङ्गतम् । न च साक्षिणोऽविशेषस्य साधकत्वं प्रस्तुतमेवेति वाच्यम् । तथाऽपि साक्षिणोऽविशेषस्याज्ञानसाधकत्वं वदतो ममाविशेषसाधकताया अपि सिद्धतया तदसिद्धिकथनायोगात् । न च प्रतिवादिना स्वापेक्षया तदसिद्धिकथनमिति वाच्यम् । भावरूपाज्ञानवादिना स्वेनापि प्रमाणान्तराभावेन साक्षिण एव तत्साधकत्वेन तस्य च निर्विशेषतया तत्साधकतायाश्च स्वीकार्यत्वेन स्वापेक्षतयाऽपि तदसिद्धिकथनानुपपत्तेरित्यतो भावरूपाज्ञानं येन प्रतिवादिना स्वीकृतं तेनापि साक्षिणः सविशेषत्वमुपपाद्य स्वमते साक्षिणाऽज्ञानसिद्धेर्वक्तुं शक्यतया त्वया च साक्षिणो निर्विशेषत्वाङ्गीकारात्तस्य चाज्ञानसिद्धौ साधकत्वेनोपन्यासे प्रतिवादिना स्वापेक्षया निर्विशेषस्य साधकत्वासिद्धेर्वक्तुं शक्यत्वात् । अस्तु वा भावरूपाज्ञानवादिनः स्वापेक्षया निर्विशेषस्य साधकत्वासिद्धेरशक्यकथनीयत्वम् । तथाऽपि न तं प्रति तव भावरूपाज्ञानसाधनं वैयर्थ्यप्रसङ्गात् । किन्तु भावरूपाज्ञानमनङ्गीकुर्वाणं प्रत्येव । तेन च निर्विशेषस्य साधकताया अनङ्गीकार्यत्वात्तेन स्वापेक्षया तदसिद्धिरुद्भावयितुं शक्यैवेत्याशयेन मूलं योजयितुं ततः पूर्ववक्तव्यं तावदाह ॥ **भावरूपमिति** ॥ इदानीं मूलं योजयति ॥ **अविशेषस्येति** ॥ असिद्धौ वक्तव्यायां साध्यत्वोक्तिर्न श्लिष्टेत्यतः साध्येत्यस्य सावधारणतयाऽनया वाचोभङ्ग्या सैवोक्ता भवतीत्याशयेनाह ॥ **न त्विति** ॥ ननु परं प्रत्यविशेषसाधकताया असिद्धिमात्रेण न तदसाधकत्वं भवतीत्यत आह ॥ **न हीति** ॥ अनित्यतासाधकत्वेनासंमतचाक्षुषत्वस्य, आगमादेः प्रामाण्यमनङ्गीकुर्वन्तं प्रति तस्य, शशविषाणादेश्च साधनायोपन्यासापत्तेरित्यर्थः । पराभिप्रेतनियमेऽप्रयोजकत्वं शङ्कते ॥ **नन्विति** ॥ ननु साक्षिणोऽज्ञानसाधकत्वं नाम यदि परमार्थसदज्ञानप्रमितिजनकत्वमङ्गीक्रियते तदा स्यादयं दोषः । न चैवम् । साक्षिण्यज्ञानस्याध्यस्तत्वमेवाज्ञानसिद्धिः साक्षिणस्तदध्यासाधिष्ठानत्वमेव साधकत्वमिति नानुपपत्तिरिति शङ्कते ॥ **साक्षिणीति** ॥ तर्हि पूर्वं साधकत्वप्रयोजकविशेषाभावात्साधकत्वानुपपत्तिरभिहिता । इदानीं त्वयैव साक्षिणोऽज्ञानाधिष्ठानत्वमात्रमङ्गीकृत्य साधकत्वस्वरूपस्यैवापलापे साक्षिणाऽज्ञानसिद्धिरित्येतद्भ्रममेव । न हि रजतारोपाधिष्ठानं शुक्तिस्तत्साधिकेत्याह ॥ **न तर्हीति** ॥ ननु साक्षिणोऽज्ञानाधिष्ठानमात्रत्वं न मयोच्यते किन्तु तस्यैव तत्सिद्धिकरणत्वं चेति नोक्तदोष इति चेत्तर्हि न केवलं करणत्वप्रयोजकविशेषाभावेन करणत्वानुपपत्तिः किन्त्वधिष्ठानस्यैव करणताया अलौकिकत्वेनाधिष्ठानत्वेनापि । न च त्वयाऽपि मामहं जानामीत्यादौ ज्ञानरूपस्य साक्षिणस्तदेव ज्ञानं प्रति कर्तृत्वकर्मत्वयोः कल्पनात्तद्वदेवाधिष्ठानस्यैव करणत्वकल्पनायामपि न दोष इति वाच्यम् । विशेषबलान्मत्कल्पनोपपत्तावप्यविशेषवादित्वेन त्वत्कल्पनानुपपत्तेरित्याह ॥ **प्रकाशाश्रयमिति** ॥ अत्र साक्ष्यज्ञानशब्दाभ्यां प्रस्तावेऽपि प्रकाशतमःशब्दौ प्रयुञ्जानेनेदं सूचितम् । प्रकाशतमसोरिव साक्ष्यज्ञानयोर्निवर्त्यनिवर्तकभावस्यैवोचिततयाऽधिष्ठानाधिष्ठेयभावस्य साध्यसाधकभावस्य वाऽनु-

वाच्यम् । भावरूपाज्ञानानङ्गीकारेण प्रवृत्तं प्रत्येतत्पर्यनुयोगानुपपत्तेः । मम विशेषबलेन सर्वोपपत्तावप्यविशेषवादिनस्तवानुपपत्तिरेवेति । अस्तु वाऽधिष्ठानस्यैव कारणत्वं तथाऽप्यज्ञानस्य साक्षिविषयत्वाविषयत्वाभ्यां निर्विशेषत्वसाक्षित्वाभावप्राप्त्या साक्षित्वनिर्विशेषत्वयोर्विरोध इत्याह ॥ **किञ्चेति** । **साक्षादिति** ॥ साक्षाच्छब्दोऽव्ययं संज्ञाग्रहणं च धनिकाधमर्णाऽन्योपद्रष्टृरूपाभिधेयनियमार्थम् । तथा च साक्षाच्छब्दाद्द्रष्टरि वाच्ये संज्ञायामिनिप्रत्ययेऽव्ययानां भमात्रेति टिलोप इति टिलोपे च साक्षीति निष्पन्नमिति भावः । द्वितीये दोषान्तरमाह ॥ **तदिति** ॥ **निरस्तमिति** ॥ अन्योन्याश्रयेणेति शेषः । ननु साधकत्वप्रयोजकविशेषाभावेन व्याहत्यादिना चाविशेषस्य साधकत्वे निरस्ते पुनस्तच्छङ्काऽप्रसरात्तत्साधकसविशेषत्वादिविकल्पनिरासेन तन्निरसनं तच्चेत्याद्युत्तरभाष्येऽनुपपन्नमित्यतः प्रमाणसिद्धे न व्याहत्यादिकमिति वैयात्याद् ब्रुवाणं प्रत्युत्तरग्रन्थस्तदहङ्कारखण्डनायैवेत्याशयेनाह । **यस्त्विति** ॥ अत्र पूर्वत्र नेहनानेतिवाक्यातिरिक्तोभयसम्प्रतिपन्नसाधकभावस्य प्रत्यक्षादेरिवात्रान्यस्याभावात्साक्षिण एव साधकत्वे विवादात्तत्र साधकत्वानुभवस्याशक्यशङ्कत्वात्पूर्ववत्प्रमाणसमाहारात्मकप्रमाणस्य वक्तुमशक्यत्वाद्वैयात्यपर्यन्तधावनमिति द्रष्टव्यम् । अत्र निर्विशेषपक्षपर्यवसानेन तत्र दूषणमभिदधता भाष्यकारेण पक्षान्तरप्रसक्तेरुक्तन्यायेन दूषणसौलभ्यस्य च सूचितत्वात्तदाह ॥ **स प्रष्टव्य इति** ॥ नन्वस्मिन्पक्षे भाष्येऽनवस्थित्यभिधानमसङ्गतम् । साक्षिणोऽन्यस्य वैतदर्थसाधकत्वेनाश्रयणेऽपि परम्परानाश्रयणादित्यतस्तत्पक्षद्वयस्य सुलभदूषणत्वाद्भाष्यकारीयं तत्पक्षोपेक्षणेन परम्पराश्रयण एव दूषणाभिधानं युक्तमेवेत्याशयेन स्वयमेव दूषणाशङ्कोत्तरत्वेन तत्पक्षं विकल्प्य प्रतिक्षिप्य परम्परापक्षे भाष्यं योजयति ॥ **किमत इति** ॥ प्रकारानुक्तेरितिशब्दस्य प्रकारसमर्पकत्वासम्भवादाह ॥ **तस्यापीति** ॥ **सामान्येनेति** ॥ भिन्नलिङ्गतयोपस्थितानेकसाधारणपरामर्शे नपुंसकमित्याशयः । वस्त्रेण शुक्लेन कम्बलेन शुक्लेन तेनानेन शुक्लेनेत्यत्र तल्लक्षणमात्रविशेषाभावान्नपुंसकमनपुंसकेनेत्यस्याप्राप्तौ [नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् । अक्लीबेन सहोक्तौ क्लीबं शिष्यते । तच्च वैकवत्स्यात्तल्लक्षण एव शेषश्चेत् । शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रम् । तदिदं शुक्लम् । तानीमानि शुक्लानि ।] सामान्यविवक्षायां नपुंसकत्वैकवद्भावयोर्वक्तव्यत्वाद्बहुविषयेण तेनैव तदिति नपुंसकनिर्देशस्याप्युपपत्तेर्नपुंसकमनपुंसकेनेत्यनुक्त्वा सामान्येनेत्युक्तमत एव भाष्यकारेण नपुंसकस्य व्यापित्वात्प्राधान्यमुपादाय प्रधाने कार्यसम्प्रत्ययाच्छेष इत्यादिना तदिदं शुक्लमित्याद्युपपाद्य सूत्रं प्रत्याख्यातम् । अत एव च सामान्ये नपुंसकमित्यनेनैव (सामान्ये नपुंसकम् । दृढं भक्तिर्यस्य दृढभक्तिः । स्त्रीत्वविवक्षायां तु दृढा भक्तिः ।) तदिदं शुक्लमित्यादेरुपपत्तेर्नपुंसकमनपुंसकेनेति सूत्रवैयर्थ्यमाशङ्क्य द्वन्द्वापवादायेति तदभियुक्तैः समभिहितम् । अथा-

सामान्यनत्यस्य सो च तच्चात स्त्रीनपुंसकसाधारण्येनकशेषणत्यर्थः । तदुपपादकसूत्रं च नपुंसकमनपुंसकेनेत्येतदेव द्रष्टव्यम् ।

स० — **सत्यस्यापि साक्षिणोऽज्ञानसाधकत्वमिति** ॥ यथोक्तं सङ्क्षेपशारीरके 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला । पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचर इति ॥ **न हि साधकतमत्वादिविशेषाभाव इति** ॥ करणरूपप्रमाणे साधकतमत्वं फलरूपे निर्दोषकरणजन्यत्वम्. साक्षिरूपे नित्यज्ञाने निदुष्टस्वरूपेन्द्रियाभिव्यक्तत्वमिति विशेषाः द्रष्टव्याः । शङ्कते ॥ **साक्षिण्यारोपिततथैवेति** ॥ **अशक्यत्वादिति** ॥ यथा दिवाभीतान्धकारः सौरालोकारोपितः सौरालोकेनैवावभासते, एवमज्ञानं चैतन्यारोपितं चैतन्येनैव भासत इत्यर्थः ॥ **न तर्हीति** ॥ तर्हि न सिद्धिरिति भावः ॥ **प्रकाशेनैव सिद्ध्यतीत्यस्यार्थस्येति** ॥ न हि दिवाभीतान्धकारः सौरालोकेन सिद्ध्यति ॥ किं तु दिवाभीतदुष्टेन्द्रियादेव । तथा च अधिष्ठानस्यैवारोपितज्ञप्तिकरणत्वमन्यत्र काप्यदृष्टमत्रैव तन्निर्वाहकविशेषाभावे कल्पयितुमशक्यमिति भावः ॥ **साक्षाद्द्रष्टरीति** ॥ साक्षाद्द्रष्टर्यभिधेये संज्ञायां गम्यमानायां साक्षीति निपात्यत इत्यर्थः ॥ **निर्वचनासंभवादिति** ॥ साक्षिणः कर्तृत्वेन कारकत्वात् कारकमात्रस्याप्यतद्विषयकज्ञानजनकत्वापत्त्या तद्विषयत्वस्यावश्यकत्वादिति वा कर्तृत्वेऽप्यज्ञानादिप्रतीतौ तस्यैव करणत्वात् करणस्य सविषयकत्वनियमादज्ञानविषयत्वाभावे साक्षित्वमेव न स्यादिति वाऽभिप्रायः । न च अज्ञानविषयत्वाभावेऽपि दुःखादिविषयत्वेन तदुपपत्तिरिति वाच्यम् । तथात्वे सविषयत्वापत्त्या निर्विशेषत्वभङ्ग इत्याद्यपक्षोक्तदोषापत्तेरिति द्रष्टव्यम् ॥ **अलौकिकेति** ॥ रूपविषयेणापि रसनेन रूपसिद्धिप्रसङ्गादित्यर्थः ॥ **निरस्तमिति** ॥ अन्योन्याश्रयेणेति शेषः ॥

प० — **फलं वेति** ॥ जन्यज्ञानादिरूपं फलं वेत्यर्थः । तस्यापि व्यवहारादिसाधकत्वादिति भावः ॥ **नित्यं वा ज्ञानमिति** ॥ ईश्वरसंबन्धिनित्यज्ञानं वेत्यर्थः ॥ तस्य कार्यमात्रे हेतुत्वादिति भावः ॥ **परेणेति** ॥ भावरूपमज्ञानमनिच्छता तार्किकादिना त्वत्प्रतिवादिनेत्यर्थः । यदुक्तं पूर्वत्राज्ञानवशादेव साक्षिणः साधकत्वमित्युक्ते इतरेतराश्रयत्वप्रसङ्गादिति । तन्न । अधिष्ठानतया ज्ञानावभासत्वमेव साक्षित्वम् । तथाच साक्षित्वमज्ञानसत्त्वं चैकमेव । साक्ष्यवभासादन्यस्याज्ञानसत्त्वस्याभावादज्ञानावभासत्वादन्यस्य साक्षिणः साधकत्वस्याभावात् कुतोऽन्योन्याश्रय इति शङ्कते ॥ **साक्षिणीति** ॥ ततः अज्ञानारोपादित्यर्थः । तमोऽज्ञानम् ॥ **अशक्यत्वादिति** ॥ प्रकाशाश्रयमित्यनेनाश्रयत्वस्य प्रकाशेनेति तृतीयया साधकत्वस्य च विशेषस्य चाभावे परं प्रति त्वया वक्तुमशक्यत्वादित्यर्थः । ननु प्रकाशेनैव सिद्ध्यतीत्यस्य प्रकाशजन्यज्ञानेन विषयीक्रियत इति नार्थः । येन साधकत्वं स्यादित्यत आह ॥ **किञ्चेति** ॥ **इति निर्वचनेति** ॥ व्याकरणसूत्रे हि साक्षिपदस्य साक्षादितिपदात् द्रष्टर्थे

च साक्षात्पश्यतीति साक्षीति यद्व्युत्पादनं तस्यासम्भवादित्यर्थः । दोषान्तरं चाह ॥ **अतदिति** ॥ तदविषयकेणेत्यर्थः । तद्विषयमानेनैव तत्सिद्धेर्घटादौ दृष्टेरिति भावः ॥ **निरस्तमिति** ॥ इतरेतराश्रयप्रसङ्गादित्यनेनेति भावः ॥ **परेणेति** ॥ शब्दनित्यत्ववादिनेत्यर्थः ॥ **तत्साधनेति** ॥ शब्दः कृतकः व्यञ्जकप्रयत्नानन्तरभावित्वादिति कृतकत्वसाधकलिङ्गोपस्थितिमता तार्किकेणेत्यर्थः ॥ साधयिष्यामीतीति शब्दस्येति ब्रवीतीति पूर्वेणान्वयः ॥ **किमत इति** ॥ अविशेषस्य साधकत्वं चाविशेषप्रमाणान्तरसाध्यमित्युक्तितः किमनिष्टमिति प्रश्नार्थः । इदं वक्ष्यमाणमन्योन्याश्रयादिकमिति परिहारार्थः ॥ तच्चेति । निर्देशायोगमाशङ्कते ॥ **ननु चाविशेषस्येति** ॥ **तत्सविशेषत्वादीति** ॥ मिथ्याभूतस्य साक्षिणः साधकत्वम् । 'तच्च मिथ्याप्रमाणेन सता वा साध्यते त्वये'ति साधकप्रमाणविकल्पेन यथा निरस्तं, एवं मिथ्याभूतस्य साधकत्वं सविशेषप्रमाणेन साध्यते, अथाविशेषमानेन । आद्ये तस्यापि तव मिथ्यात्वात् । परेण च तस्य साधकत्वानङ्गीकारात् । न द्वितीयः । प्रतिवादिनस्तस्य साधकत्वासंमतेरिति निराकरणीयमिति सूचनायेत्यर्थः ॥ **प्राग्विकल्पित इति** ॥ 'सता चेदद्वैतसिद्धिः स्यादि'त्यत्र सतेत्यात्मभूतेन वा आत्मातिरिक्तेन वेति विकल्पितात्मभूतेनेति पक्षोऽप्यविशेषस्य साधकत्वखण्डनेन निरस्त इत्यर्थः ।

या० — **न हि साधकतमत्वादिविशेषाभाव इति** । करणरूपप्रमाणे प्रमासाधकतमत्वं, फलरूपे निर्दोषकरणजन्यत्वं, साक्षिरूपे नित्यज्ञाने निर्दुष्टस्वरूपेन्द्रियाभिव्यक्तत्वमित्याद्या विशेषा द्रष्टव्याः । शङ्कते ॥ **साक्षिण्यारोपिततयैवेति** ॥ **न ततोऽतिरिक्तमिति** ॥ येन विशेषापेक्षा स्यादिति शेषः । यथा दिवाभीतान्धकारः सौरालोकारोपितः सौरालोकेनावभासते । एवमज्ञानं चैतन्यारोपितं चैतन्येनैव भासत इत्यर्थः ॥ **प्रकाशेनैवेति** ॥ न हि दिवाभीतान्धकारः सौरालोकेनैव सिध्यति किन्तु दिवाभीतदुष्टेन्द्रियादेव । तथा चाधिष्ठानस्यैवारोपितज्ञप्तिकारणत्वम् अन्यत्र क्वाप्यदृष्टमत्रैव तन्निर्वाहकविशेषाभावे कल्पयितुमशक्यमिति भावः ॥ **आद्ये विषयित्वमिति** ॥ तथा च सविशेषत्वापत्तिरिति भावः ॥ **साक्षाद्द्रष्टरीति** ॥ साक्षाद्द्रष्टर्यभिधेये साक्षाच्छब्दादिनिप्रत्ययो विहित इत्यर्थः ॥

श्री० — फलप्रामाण्याभिप्रायेण फलं वेत्युक्तम् । ईश्वरज्ञानाभिप्रायेण नित्यं वा ज्ञानमित्युक्तम् ॥ **न ततोऽतिरिक्तमिति** ॥ तथा चाज्ञानारोपाधिष्ठानत्वमेवाज्ञानसाधकत्वमिति भावः ॥ **प्रका-**

शेति ॥ साक्षिणः प्रकाशरूपत्वेन तदाश्रितं तमोऽज्ञानमधिष्ठानभूतप्रकाशेनैव सिध्यतीति परं सिद्धान्तिना प्रत्युपपादयितुं त्वया न शक्यते, अधिष्ठानस्यैवारोपितज्ञप्तिकारणतायाः कुत्राप्यदर्शनादिति भावः । अन्यत्र कुत्राप्यदृष्टमत्रैव कल्प्यत इत्याशङ्कापरिहारायोक्तम् ॥ **अविशेषवादिनेति** ॥ कुत्राप्यदृष्टमत्रैव साक्षिणि कल्पयितुं तदा शक्यते, यदीतरापेक्षया तन्निर्वाहकः कश्चन विशेषः स्यात् । स तु नास्ति । त्वया साक्षिणि विशेषानङ्गीकारादिति भावः । ननु साक्षिणोऽज्ञानविषयकत्वाभावेऽपि तेन तत्सिद्धिः किं न स्यादित्यत आह ॥ **अतद्विषयेणेति** ॥ अतद्विषयकेनेत्यर्थः ॥ **निरस्तमिति** ॥ इतरेतराश्रय-प्रसङ्गेनेत्यर्थः । तच्चाविशेषमानेन साध्यमित्युक्तत्वात्सविशेषप्रमाणेन साधनपक्षे दूषणं वक्तुमाह ॥ **यस्त्विति** ॥ ननु सविशेषस्य मिथ्यात्वेऽपि तस्य साधकत्वमङ्गीकृतमिति चेत्तत्राह ॥ **परेणेति** ॥ सिद्धान्तिनेत्यर्थः । उक्तन्यायेन 'न सिद्धं चान्यसाधनमि'त्युक्तन्यायेन । तस्य मिथ्याभूतप्रमाणस्य ॥ **तत्सविशेषत्वादीति** ॥ मिथ्याभूतस्य साधकत्वम् । 'तच्च मिथ्याप्रमाणेन सता वा साध्यते त्वये'ति साधकप्रमाणविकल्पेन यथा निरस्तम् । एवं मिथ्याभूतस्य साधकत्वं सविशेषप्रमाणेन साध्यते । अथा-विशेषप्रमाणेन । आद्ये तस्यापि तव मिथ्यात्वात् । परेण च तस्य साधकत्वानङ्गीकारात् । न द्वितीयः । प्रतिवादिनस्तस्य साधकत्वासम्मतेरिति निराकरणीयमिति सूचनायेत्यर्थः ॥ **एतेनेति** ॥ साक्षिणः साधकत्वनिराकरणेनेत्यर्थः ॥ **आत्मभूतेनेति** ॥ तस्यैव साक्षित्वादिति भावः ।

च० — **तत्सर्वमिति** ॥ करणं साधकतमत्ववत् फलं निर्दोषतज्जन्यत्ववत् नित्यज्ञानं तादृश-स्वरूपेन्द्रियाभिव्यक्तत्ववत् ॥ **साक्षादिति** ॥ साक्षादित्यव्ययं, तस्मात्प्रकृतिभूताद्दृष्टौ गम्यमानायां द्रष्टरि वाच्ये इनिप्रत्ययेऽव्ययानां भमात्रे टिलोपे च साक्षीति निष्पद्यत इति भावः ।

अनु० — अनङ्गीकुर्वतां विश्वसत्यतां तन्न वादिता ॥
तस्माद्व्यवहृतिः सर्वा सत्येत्येव व्यवस्थिता ॥

सु० — **मिथ्यात्वं यदीत्यादिनोक्तं प्रसङ्गमुपसंहरति** ॥ **अनङ्गीकुर्वतामिति** ॥ **यस्मादेवं न मिथ्याभूतस्य साधकत्वं तत्तस्माद्विश्वसत्यतामनङ्गीकुर्वतामात्मातिरिक्तस्य सर्वस्यापि मिथ्यात्वं प्रतिपादयतां नेहनानेत्यादिवाक्यानामपि मिथ्यात्वप्रसक्त्या न वादिता न साधकता स्यात् ।** तद्वाक्यस्येति प्रकृतमेकवचनं समूहविषयमिति ज्ञापयितुमुपसंहारे बहुवचनम् । अथवाऽति-

न्तर्गत कथाव्यवहाराङ्गभूत प्रमाणादिकमपि मिथ्या स्यात् । तथाच विश्वसत्यतामनङ्गीकुर्वत-स्तन्मिथ्यात्वमङ्गीकुर्वतो मायावादिनो निरुपायस्य कथकता न स्यात् । कुतः । तत्तस्मा-दुक्तरीत्या मिथ्याभूतस्य साधनबाधनाङ्गताऽयोगादिति । विश्वमिथ्यात्वमङ्गीकुर्वतामपि चार्वा-काणां बौद्धानां च वादित्वोपलम्भाद्व्यभिचार इति चेन्न । तेषामप्यापादनविषयत्वात् । तदिद-मुक्तमनङ्गीकुर्वतां चार्वाकबौद्धमायावादिनामिति । अन्यथा त्वया तेनेत्येकवचनस्य प्रस्तुतत्वा-दनङ्गीकुर्वत इत्यवक्ष्यत् । तथाऽपि प्रमाणबाधः । चार्वाकादीनां वादित्वस्य प्रत्यक्षादिसिद्ध-त्वात् । मैवम् । वादित्वाभावस्यात्रापाद्यमानत्वात् । साधनस्य हि प्रमाणबाधो दूषणम् । न त्वापादानस्य । अनिष्टस्य च प्रामाणिकपरित्यागाप्रामाणिकस्वीकाररूपत्वात् । अन्यथा-ऽतिप्रसङ्गमात्रोच्छेदप्रसङ्गादित्याशयवानुक्तस्य प्रसङ्गत्वं स्फुटीकर्तुं विपर्ययपर्यवसानमाह ॥ तस्मादिति ॥ यस्मादस्ति परस्य वादित्वाभिमानस्तस्मात् । अन्यथा युष्मदस्मदित्यादिपूर्वोत्तर-पक्षबलाबलचिन्ता न स्यात् । व्यवह्रियतेऽनयेति व्यवहृतिः । कथाङ्गभूतप्रमाणादीति यावत् । प्रमाणादीनां कथाव्यवहारकारणत्वात्कारणाभावे च कार्याभावस्य सुलभत्वात्सुस्थो-ऽतिप्रसङ्गमूलभूतः प्रतिबन्ध इति ज्ञापयितुं प्रमाणादीति रूढपदपरित्यागेन व्यवहृतिरिति यौगिकपदोपादानम् ।

वा० — ननूत्तरभाष्ये उक्तमेवोच्यते । न चोपसंहारोऽयमविशेषस्येत्युक्तोपसंहाररूपत्वाप्रतीतेरि-त्यत आह ॥ मिथ्यात्वमिति ॥ ननु सत्यताऽनङ्गीकारिणां वादित्वाभावस्य पूर्वमनभिहितत्वान्नायमुप-संहार इत्याशङ्कामुपसंहारत्वज्ञापकतच्छब्दपरामृष्टव्यं दर्शयन्नेव निराकरोति ॥ यस्मादिति ॥ अस्मि-न्पक्षेऽनङ्गीकुर्वतां वादितेति पदयोः, बहुवचनस्य, तस्माद्व्यवहृतिः सर्वेत्युत्तरवाक्यस्य च स्वारस्याभावात्प्रका-रान्तरेण तद्भाष्यं व्याख्याति ॥ अथवेति ॥ अत्र विश्वसत्यतामनङ्गीकुर्वतामिति बीजकथनेनापादकं लब्धम् । यद्वाऽनेन विश्वशब्दस्यात्मातिरिक्तसर्वपरत्वम् । कथाव्यवहाराङ्गप्रमाणादिसर्वपरत्वं च । अनङ्गीकुर्वतां विश्वसत्यतामिति सम्पूर्णस्य चावृत्तिः । एवं चात्मातिरिक्तं सर्वं सत्यं यदि नाङ्गीक्रियेत मिथ्या स्यादिति यावत् । तर्हि कथाङ्गभूतं प्रमाणादिकमपि सत्यं नाङ्गीकर्तव्यं स्यात् । तदपि मिथ्या स्यादिति यावत् । यदि चैवं तर्हि कथकता न स्यादिति भाष्यं व्याख्यातं भवति । नन्वस्मिन्नपि पक्षे उपसंहारत्वज्ञापकतच्छब्दानुपपत्तिरित्यतो मिथ्याभूतस्यापि प्रमाणादेरेवोपायत्वान्न तदभाव इत्याशङ्का-निवर्तकपूर्वोक्तरीतिलब्धन्यायसमर्पकत्वान्न तच्छब्दानुपपत्तिरित्याशयेनाह ॥ कुत इत्यादिना ॥ अनेन यदि प्रमाणादीन्यसन्ति स्युस्तर्हि साधकानि न स्युस्तथाच तत्कार्यव्यवहारानुपपत्तिरिति मध्ये तर्कस्वरूप-

मभिप्रायमिति सूचयति । अस्मिन्पक्षे बहुवचनस्वारस्यं दर्शयितुं तन्निवर्त्यशङ्कापूर्वकं तद्विषयमाह ॥ **विश्वेति** ॥ बौद्धानां केषाञ्चिद्विश्वमिथ्यात्वाभ्युपगमः प्रसिद्ध एव । चार्वाकाणां चानुमानादेः प्रामाण्याभावेनातीन्द्रियस्यासत्त्वाद्गोलकमात्रस्य वस्तुतोऽप्रत्यक्षत्वेन तदतिरिक्तप्रत्यक्षस्य च साधकाभावेनाभावात्तत्सिद्धविश्वस्याप्यभाव इति विशेषद्योतनाय चार्वाकाणां बौद्धादीनामिति द्वन्द्वनिर्देशाभाव इति द्रष्टव्यम् । ननु तस्मादित्युत्तरवाक्येऽस्यापादनत्वस्पष्टनमयुक्तं साधनत्वस्याप्युपपत्तेः । न च साधनत्वे प्रमाणबाधात्तत्परित्याग इति वाच्यम् । प्रमाणबाधस्य विशेषाभावेन साधन इवापादनेऽपि साम्येन वृथा पक्षपातस्यायुक्तत्वादित्यतो विशेषमुपपादयन्भाष्यमवतारयति ॥ **तथापीति** ॥ वस्तुतः साधनशून्ये मायिनि वादित्वस्य ममाप्यसम्मतेः । परेणापि स्वस्मिन्वास्तववादित्वानभ्युपगमाद्विपर्ययपर्यवसानेऽसिद्धिं परिहर्तुं वादित्वाभिमान इत्युक्तम् ।

स० — **चार्वाकाणामिति** ॥ प्रात्यक्षिकविश्वसत्यत्वाभ्युपगमेऽपि अतीन्द्रियविश्वमिथ्यात्वाङ्गीकाराद्वा अनुमानादिना प्रामाण्यस्य ग्राह्यत्वात्तस्याप्रामाण्ये प्रत्यक्षप्रामाण्यग्राहकाभावेन तदसिद्ध्या ऐन्द्रियकविश्वसत्यत्वमपि न सिद्ध्येदित्यभिप्रायेण वा इदं बोध्यम् ॥

प० — 'सता वा साध्यते त्वये'ति 'साधकत्वं सतस्तेने'ति चैकवचनेन प्रस्तावात्पुरुषपरत्वे बहुवचनायोगं मत्वा श्रुत्यादिवाक्यपरतया योजयति ॥ **यस्मादिति** ॥ बहुवचनं वाद्यन्तराभिप्रायं मत्वा शब्दशक्तिस्वारस्यमनुरुध्य पुरुषपरतया योजयति ॥ **अथवेति** ॥ **अतिप्रसङ्गान्तराभिधानमिति** ॥ सर्वमिथ्यात्वपक्षे नेहनानेत्यादेर्मिथ्यात्वापातेनासाधकत्वापत्तिरूपातिप्रसङ्गापेक्षया वादिनः कथाधिकाराभावरूपातिप्रसङ्गान्तराभिधानमित्यर्थः । 'मिथ्यात्वं यदि दुःखादेरि'त्याद्यर्धश्लोकं तावदनूद्यार्थमाह ॥ **यदीति** ॥ तद्वाक्यस्येत्येतत् प्रमाणादिकथाङ्गमात्रपरं मत्वा व्याचष्टे ॥ **कथाव्यवहाराङ्गभूतं प्रमाणादिकमिति** ॥ आदिपदेन व्याप्तिदृष्टान्तादिप्रमाणाङ्गस्य हेत्वाभासादिनिग्रहस्थानादेश्च ग्रहः । तत्श्च किमित्यतो'ऽनङ्गीकुर्वतामि'त्यर्धं योजयति ॥ **तथाचेति** ॥ बहुवचनकृत्यमग्रे विवरिष्यन्नेकवचनान्तत्वमुपेत्य फलितार्थमाह ॥ **तन्मिथ्यात्वमङ्गीकुर्वत इति** ॥ वादितेत्यस्यार्थः कथकतेति । कथाधिकारितेत्यर्थः । इतिशब्दस्यातिप्रसङ्गान्तराभिधानमेतदिति पूर्वेणान्वयः । बहुवचनकृत्यं व्यनक्ति ॥ **विश्वेत्यादिना** ॥ **नत्वापादनस्येति** ॥ 'प्रसङ्गार्थतया प्रोक्ता न सिद्धान्तस्य दूषका' इति सन्ध्येसृष्टिरित्यधिकरणव्याख्याने तथा विवरिष्यमाणत्वादिति भावः । युष्मदस्मदित्यादि परभाष्योपक्रमानुवादः ॥

दीनामिति ॥ प्रतिबन्धः व्याप्तिः । पूर्वार्धोक्तातिप्रसङ्गमूलभूतेत्यर्थः ॥ **व्यवहारेति** ॥ प्रमाणादि-विषय इत्यर्थः ॥

या० — **कथाव्यवहाराङ्गभूतं प्रमाणादिकमपीति** ॥ अत्रादिपदेन प्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां संग्रहः । एवमग्रेऽपि ।

श्री० — बहुवचनाभिप्रायं वक्तुमाह ॥ **विश्वमिथ्यात्वमिति** ॥ **आपादनविषयत्वादिति** ॥ न हि पक्षे पक्षतुल्ये वा व्यभिचार इति भावः । **अन्यथेति** ॥ आपादनेऽपि प्रमाणबाधनस्य दूषणत्व इत्यर्थः ॥ **अतिप्रसङ्गेनेति** ॥ यद्यग्निर्न स्यात्तर्हि धूमोऽपि न स्यादित्यादितर्केऽपि प्रमाणबाधसद्भावादिति भावः ॥ **प्रमाणादीति** ॥ रूढपदपरित्यागेन व्यवहृतिरिति व्यवहारकारणत्वार्थकयौगिकपदेन प्रमाणा-द्युपादाने निमित्तमाह ॥ **प्रमाणादीनामिति** ॥ अस्तु प्रमाणादीनां सत्त्वं तद्विषयस्य सत्त्वं मास्त्विति शङ्कापरिहाराय दुःखादीतिरूढपदपरित्यागेन व्यावहारिकमिति व्यवहारविषयत्वार्थकयौगिकपदोपादानं कृतमित्यर्थः ॥

च० — **प्रमाणादिकमपीति** ॥ आदिपदेन गौतमसूत्रोक्तनिग्रहस्थानानां ग्रहः ।

अनु० — व्यावहारिकमेतस्मात्सत्यमित्येव चागतम् ।

सु० — अस्तु कथाङ्गभूतप्रमाणादिव्यवहारस्य सत्यता दुःखादिबन्धस्य तु किमायात-मित्यत आह ॥ व्यावहारिकमिति ॥ एतस्मात्प्रमाणादिव्यवहारस्य सत्यत्वाद्व्यावहारिकं व्यव-हारविषयो दुःखादि । चशब्दो न केवलं व्यवहारो व्यावहारिकं चेति संबध्यते । न हि प्रमेयं नास्त्यस्ति च प्रमाणमिति संभवति । व्याघातादित्यर्थप्रतिपादनाय व्यावहारिकमित्यु-क्तम् । यदत्रोक्तम् । प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन तत्कस्य हेतोः । किं वाग्व्यव-हारस्य प्रमाणादिसत्ताऽभ्युपगमव्याप्तत्वेन तदभावे प्रवर्तयितुमशक्यत्वादथ कथकप्रवर्तनीय-वाग्व्यवहारं प्रति हेतुभावादुत लोकसिद्धत्वादथवा तदनभ्युपगमस्य तत्त्वनिर्णयविजयातिप्रस-ञ्जकत्वात् । आद्येऽपि किं व्यवहारमात्रं प्रमाणादिसत्ताऽभ्युपगमव्याप्तमुत साधनबाधनक्षमो

व्यवहारः । न प्रथमः । तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेर्वाग्विस्तराणां प्रतीयमानत्वेन व्यभिचारात् । तस्यैव निष्पत्तौ भवतस्तन्निरासप्रयासानुपपत्तेः । तस्यापि पक्षत्वे बाधः । द्वितीये बाधतादवस्थ्यम् । मम सत्तानभ्युपगमस्यानुभवसिद्धत्वात् । हेतुश्च तवासिद्धः । सिद्धत्वे वा सिद्धं मम समीहितम् । व्यतिरेके च सद्वचनाभासलक्षणयोगित्वमुपाधिः । यतोऽभ्युपगम्यापि प्रमाणसत्तां प्रवर्तिता मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरानुसारिभिरपरैः साधनाद्यक्षमा इति कथ्यन्ते । तेन ज्ञायते व्यवहारस्य साधनाद्यक्षमतायां सद्वचनाभासलक्षणयोगित्वमेव प्रयोजकम् । न तु सत्ताऽनभ्युपगम इति । ननु यदि प्रमाणादीनि न सन्ति । तदा व्यवहार एव धर्मी कथं सिद्ध्येत् । दूषणादिव्यवस्था वा कथं स्यात् । सर्वविधिनिषेधानां प्रमाणाधीनत्वात् । मैवम् । न ब्रूमो वयं न सन्ति प्रमाणादीनीति स्वीकृत्य कथारभ्येति । किं नाम सन्ति न सन्ति प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैर्यथा स्वीकृत्य तानि भवता व्यवह्रियन्ते । तथा व्यवहारिभिरेव कथा प्रवर्त्यतामिति । किञ्च कीदृशीं मर्यादामवलम्ब्य प्रवृत्तायां कथायामिदं दूषणमुक्तं भवता । किं प्रमाणादीनां सत्त्वमुपगम्योभाभ्यां वादिप्रतिवादिभ्यां प्रवर्तितायामुतासत्त्वमभ्युपेत्याथैकेन सत्त्वमपरेण चासत्त्वमङ्गीकृत्य । नाद्यः । अभ्युपगतप्रमाणादिसत्त्वं प्रत्येतादृक्पर्यनुयोगानवकाशात् । न द्वितीयः । स्वस्याप्यापत्तेः । न तृतीयः । तथैव कथान्तरप्रसक्तेः । तस्मात्प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन, व्यवहारनियमे समयं बद्ध्वा, प्रवर्तितायां कथायां, भवतेदं दूषणमुक्तमिति वाच्यम् । तथा च व्याघातः । न च वाच्यं नेदं दूषणं प्रतिवादिनं प्रत्युच्यते । किं नाम शिष्यादयः प्रमाणादिसत्ताऽनभ्युपगन्तुः कथाऽनधिकारं ज्ञाप्यन्त इति । यतः शिष्यादीन्प्रत्यपि चार्वाकादेर्दोषोऽयमित्येवाभिधातव्यम् । कथं च तथा स्यात् । तस्य कथाप्रवेशाप्रवेशयोस्तद्बोधाक्षमत्वात् । कथायामेव हि निग्रहः । न द्वितीयः । स्यादप्येवं यदि कथकप्रवर्तनीयवाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्तानभ्युपगमे निवर्तेत । नत्वेवं संभवति । तथा सति तत्सत्तानभ्युपगन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत । हेत्वनुपपत्तेः । अथ मन्यसे । कथकवाग्व्यवहारं प्रति हेतुत्वात्प्रमाणादीनां सत्त्वम् । सत्त्वाच्चाभ्युपगमो यत्सत्तदभ्युपगम्यत इति स्थितेरिति । मैवम् । कयाऽपि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात्प्रमाणादीनां सत्त्वं सत्त्वाच्चाभ्युपगमो भवता प्रसाध्यः । कथातः पूर्वं तु तत्त्वावधारणं परपराजयं वाऽभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्यवस्यति तावदनुरोद्ध-

बध्नातः । स च प्रमाणेन तर्केण च व्यवहर्तव्यमित्यादिरूपः । न च प्रमाणादिनां सत्ताऽप्य-
र्थमेव ताभ्यामङ्गीकर्तुमुचिता । तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः । प्रमाणादि-
सत्तामभ्युपेत्यापि तथाविधव्यवहारनियमव्यतिरेकेण कथाप्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य
वाऽभिलषितस्य कथकयोरपर्यवसानात् । नापि तृतीयः । लोकव्यवहारोऽपि प्रमाणव्यवहारो
वा स्यात् पामरादिसाधारणव्यवहारो वा । नाद्यः । विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वात् ।
तदर्थमेव च पूर्वं नियमस्य गवेषणात् । नापि द्वितीयः । शरीरात्मत्वादीनामपि तथा सति
भवता स्वीकर्तव्यतापातात् । पश्चात्तद्विचारबाध्यतया नाभ्युपेयत इति चेत् । तर्हि प्रमाणादि-
सत्ताऽपि यदि विचारबाध्या भविष्यति तदा नाभ्युपेयैव अन्यथा तूपगन्तव्येति लोकव्यवहार-
सिद्धतया सत्त्वमभ्युपगम्यत इति तावन्न भवति । न चतुर्थः । यादृशो भवता प्रमाणादि-
सत्तामभ्युपगम्य व्यवहारनियमः कथायामवलम्ब्यते । तस्यैव प्रमाणादिसत्त्वासत्त्वानुसरणौदा-
सीन्येनास्माभिरप्यवलम्बनात् । तस्य यदि मां प्रति फलातिप्रसञ्जकत्वम् । तदा त्वां प्रत्यपि
समानः प्रसङ्गः । तस्मात्प्रमाणादिसत्ताऽभ्युपगमस्य कथोपयोगाभावादनङ्गीकुर्वतां प्रमाणादि-
सत्तां न वादित्वेत्यनुपपन्नमिति ।

वा०—अत्र भाष्यकारेण प्रसङ्गत्वसूचनेन सूचितपरिहारं खण्डनोक्तदूषणाभासं निराकर्तुमनुवदति॥
यदत्रेति ॥ तत्सत्ताऽभ्युपगमस्य कथाङ्गत्वे मानाभावात्प्रमाणाद्याकार एव प्रयोजकोऽतोऽसद्वादिनोऽपि
कथाधिकारः किमुतानिर्वचनीयवादिन इत्याशयः । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति
कात्यायनस्मरणात्कस्येति षष्ठी । प्रवर्तयितुमशक्यत्वादनुपपन्नत्वादित्यादीनामनुपपत्त्येनाभ्युपेयमित्यनेन
सम्बन्धः । कार्यस्याप्यविनाभावेन गमकत्वेऽपि स्वभावानुपलब्धिकार्यलिङ्गकमनुमानं त्रिविधमिति पराभ्यु-
पगमाद्रूपरसादिवत्स्वभावलिङ्गकमनुमानं विकल्प्य कार्यलिङ्गकं विकल्पयति ॥ अथेति ॥ 'लोकावगत-
सामर्थ्यः शब्दो वेदेऽपि बोधक' इत्यादौ लोकशब्दस्य तद्व्यवहारे प्रयोगाल्लोकसिद्धत्वं प्राणिनिकायेन
व्यवह्रियमाणत्वमिति तृतीयं विकल्पयति ॥ उनेति ॥ प्रमाणादिसत्तामनभ्युपगम्य व्यवहरतो वाद-
जल्पादिफलतत्वनिर्णयजयाद्युपपत्तवुन्मत्तादेरपि तत्स्यादिति तत्सत्ताऽनभ्युपगमस्य तत्त्वनिर्णयविजयाति-
प्रसञ्जकत्वादिति चतुर्थं विकल्पयति ॥ अथवेति ॥ व्यभिचारादिति ॥ विमतो व्यवहारः प्रमाणादि-
सत्ताऽभ्युपगमपुरःसरो वाग्व्यवहारत्वात्सम्मतवदित्यत्र चार्वाकादिव्यवहारे व्यभिचार इत्यर्थः । ननु
प्रत्यक्षप्रामाण्यवादित्वेन चार्वाकव्यवहारे साध्यस्यापि सत्त्वात्सर्वशून्यतया माध्यमिकव्यवहारस्यैवाभावेन
तत्र हेतोरेवागमनान्न व्यभिचार इत्यतोऽनुमानादिसत्तामनङ्गीकृत्यापि चार्वाकेण क्रियमाणेऽनुमानादि-

साध्यव्यवहारेऽथवा प्रत्यक्षप्रामाण्यस्यानुमानैकगम्यत्वात्तदप्रामाण्ये प्रत्यक्षस्याप्यप्रामाण्यमेवेति प्रत्यक्षादिसाध्ये सर्वस्मिंश्चार्वाकव्यवहारे, सांवृतव्यवहारमङ्गीकुर्वतो माध्यमिकस्य व्यवहारे च व्यभिचारः स्यादेव । अन्यथा प्रसक्त्यभावात्तत्प्रतिषेधायोग इत्याशयेनाह ॥ **तस्यैवेति** ॥ **बाध इति** ॥ तदीयप्रमाणादिसत्ताऽनभ्युपगमस्य सुप्रसिद्धत्वादिति भावः । आद्यद्वितीयमुक्तदूषणातिदेशेन दूषयति ॥ **द्वितीय इति** ॥ अत्र बाधासिद्ध्योः परेणानुक्तावपि सम्भावितत्वादुक्तिः परोक्तोपाधेश्च दूषणान्तरतयोक्तिरिति द्रष्टव्यम् । किञ्च विमतो वाग्व्यवहारः प्रमाणादिसत्ताऽभ्युपगमपुरःसरः साधनबाधनक्षमवाग्व्यवहारत्वाद्वाद्यादिसम्प्रतिपन्नव्यवहारवत् अन्यथा चार्वाकादिव्यवहारवत्साधनबाधनक्षमता न स्यादिति द्वितीयकल्पे पर्यवसितेऽनुमानेऽसमव्याप्तिकयोरन्वयव्याप्तिवैपरीत्येन व्यतिरेकव्याप्तिनियमात्साधनबाधनक्षमव्यवहारत्वाभावं प्रति प्रमाणादिसत्ताभ्युपगमपूर्वकत्वाभावस्य व्याप्ततायाश्च, साधनबाधनक्षमव्यवहारत्वाभावसद्वचनाभासलक्षणयोगित्वरूपव्यापकोपाध्योश्चार्वाकादिव्यवहारे सत्त्वात्प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वाभावरूपव्याप्यस्य पक्षे सत्त्वेऽप्युक्तोपाधेरभावेन, सोपाधिकतयाऽसम्भवात् । व्यतिरेके उपाधौ चान्वये मूलशैथिल्यस्य स्वतःसिद्धत्वान्नेदमनुमानं सम्भवतीत्याशयेनाह ॥ **व्यतिरेके चेति** ॥ सद्वचनाभासलक्षणान्यसिद्ध्यादिलक्षणानि तेषामन्यतमयोगित्वमित्यर्थः । ननु घटादौ सत्यपि व्यापके उपाधेरभावान्नास्य साध्यव्यापकत्वमिति चेन्न । वाग्व्यवहारत्वे सति साधनबाधनाद्यक्षमत्वे पुरुषश्यामत्वे शाकाद्याहारपरिणतिभेदस्येवास्याप्युपाधित्वसम्भवात् । अन्यथा स श्यामो मित्रातनयत्वादित्यादाविन्द्रनीलादौ साध्याव्यापकत्वेन शाकाद्याहारपरिणतिभेदस्याप्युपाधित्वं न स्यादिति भावः । ननु चार्वाकादिव्यवहारे प्रमाणादिसत्ताऽनभ्युपगमपुरःसरत्वसद्वचनाभासलक्षणयोगित्वयोर्द्वयोरपि सत्त्वात्साधनाद्यक्षमत्वे सद्वचनाभासलक्षणयोगित्वस्यैव प्रयोजकत्वनिश्चायकाभावेन नोपाधित्वमित्यत आह ॥ **यत इति** ॥ शब्दो द्रव्यमव्यवहितसम्बन्धग्राह्यत्वाद्घटवत् । शब्दो न द्रव्यं बहिरिन्द्रियव्यवस्थाहेतुत्वाद्रूपादिवदिति व्यवहारस्याभ्युपगतप्रमाणसत्तापुरःसरत्वेऽप्यन्योन्याभासतया प्रतिषेधस्य दृश्यमानत्वात्प्रमाणादिसत्ताऽनभ्युपगमस्य साधनाद्यक्षमत्वप्रयोजकत्वे स न स्यादिति भावः । ननु प्रमाणादीनां सत्त्वानङ्गीकारे तदसत्त्वाङ्गीकारापातेन तेषां चासत्त्वे व्यवहाररूपधर्मिणो दूषणादिव्यवस्थायाश्चासिद्ध्या सद्वचनाभासलक्षणयोगित्वं प्राप्तमेवेति साधनव्यापकत्वान्नायमुपाधिरित्याशङ्कते ॥ **नन्विति** ॥ सत्त्ववदसत्त्वस्याप्यनङ्गीकारान्न सद्वचनाभासलक्षणप्राप्तिरित्याशयेन परिहरति ॥ **मैवमिति** ॥ उभयानङ्गीकारे कथं व्यवहारसिद्धिरित्याशयेनाशङ्कते ॥ **किं नामेति** ॥ यद्वा यदि प्रमाणानि न सन्तीति न स्वीकारस्तर्हि मदिष्टसिद्धिरित्याशङ्कते ॥ **किं नामेति** ॥ तथेत्यस्याऽऽवृत्तिः । तच्च व्यवहारिभिरित्यनेन सम्बन्ध

त्वयाऽपि मा प्रति नेदं दूषणमभिधातुं शक्यं कीदृशी मर्यादामलम्व्येत्यादिना परणोक्तानङ्गीकारे बाधकमभिहितमिति परग्रन्थाद्भाति । तथाऽपि मयौदासीन्येन कथाप्रवृत्तिस्वीकारान्नानुपाधित्वमस्ये-त्यर्थस्य पूर्ववाक्येनैव सिद्धत्वात्त्वयाऽप्येवमेवाङ्गीकार्यमित्याशयेन प्रवृत्तस्योत्तरग्रन्थस्य दूषणान्तरपरत्व-प्रतिभासात्प्रमाणादिसत्तामनभ्युपगम्य कथाप्रवृत्तिं परेणाप्यङ्गीकारयत्यन्यथेतीति तट्टीकायामवतारितत्वाच्च दूषणान्तरत्वेनैवानुवदति ॥ **किञ्चेति** ॥ अनेकविशेषप्रसक्तेरभावात्कीदृशीमित्यादिप्रश्नानुपपत्तिरित्यतस्तां दर्शयति ॥ **किमित्यादिना** ॥ असत्त्ववादिनः सत्त्वाभ्युपगमे कथारम्भ एवापसिद्धान्तेन निग्रहे कथा-रम्भस्यैवानुपपत्तिरित्यतः कल्पान्तरमाह ॥ **उतेति** ॥ असत्त्वाभ्युपगमे तु सत्त्ववादिनो निग्रहात्पूर्वोक्त-दूषणं तदवस्थमित्यत उभयानुगुणं पक्षान्तरमाह ॥ **अथेति** ॥ **एतादृगिति** ॥ प्रमाणादीनामसत्त्वे धर्म्यसिद्धिर्दूषणादिविभागासिद्धिः सर्वपदार्थानां नास्तीति निषेधस्यास्तीति विधेर्विभागस्य च प्रमाणायत्त-त्वादित्यादिरूपस्येत्यर्थः । तथा च निरनुयोज्यानुयोग इति भावः ॥ **स्वस्यापीति** ॥ परस्येव स्वस्यापि धर्माद्यसिद्ध्यापादकन्यायस्य तुल्यतया जात्युत्तरत्वमिति भावः ॥ **तथैवेति** ॥ प्रमाणादिसत्ताऽनभ्युपगमे किमियं कथा नोपपद्यते कथान्तरं वा । नाद्यः । आरब्धत्वादेव । न द्वितीयः । विमताः कथाः प्रमाणादिसत्ताऽनभ्युपगपुरःसराः कथात्वात्प्रारब्धैतत्कथावदिति भावः ॥ **तस्मादिति** ॥ प्रमाणतर्काभ्यां व्यवहर्तव्यमिति व्यवहारनियमे समयसङ्केतं बद्ध्वा सदसत्त्वौदासीन्येन प्रवृत्तायां सत्त्वानङ्गीकाराद्धर्म्याद्य-सिद्धिरिति दूषणाभिधाने व्याघातः । औदासीन्येन प्रवृत्तिर्नाम सत्ताद्यनभ्युपगम्य प्रवृत्तिः । सत्त्वानङ्गीकारे व्यवहारो न सिध्येदित्यनेन सत्तानभ्युपगमे कथाया अप्रवृत्तिरुक्ता भवति । तथा च सत्तामनभ्युपगम्य प्रवृत्तायां कथायां सत्ताऽनभ्युपगमे कथाप्रवृत्तिर्नास्तीति दूषणाभिधाने कथं न व्याघात इत्यर्थः । तर्हि कारणान्तराभावात्कथं कथाप्रवृत्तिरित्यतस्तत्कारणकथनं व्यवहारेति । स च वक्ष्यमाणोऽनुसन्धेयः । प्रमाणादिसत्ताऽनभ्युपगमे कथानधिकारो न कथायां प्रतिवादिनं प्रत्युच्यते किन्तु शिष्यशिक्षापरं क्रियतेऽतो न व्याघात इति शङ्कते ॥ **न चेति** ॥ चार्वाकादेः कथाप्रवेशेऽयं दोषो वक्तव्य इति विनेयो बोध्यते तदप्रवेशे वा । नोभयथाऽपीत्याह ॥ **तस्येति** ॥ बोधाक्षमत्वे हेतुमाह ॥ **कथायामेवेति** ॥ कथाप्रवेशे सत्येवातत्त्वज्ञानलिङ्गं निग्रहस्तस्येति विनेयबोधनं सम्भवति कथातोऽन्यत्र निग्रहाविषयत्वात् । तथा च व्याघात इति भावः । सत्ताऽभ्युपगमस्य कथाव्यवहारं प्रति हेतुत्वात्प्रमाणादिसत्ताऽभ्युपगम इति द्वितीयमाशङ्क्य निराकरोति ॥ **न द्वितीय इति** ॥ अन्वयव्यतिरेकावसेयत्वात्कारणतायाः प्रमाणादि-सत्ताऽनभ्युपगमेऽपि प्रमाणादिभिर्हेतुभिः कथाव्यवहारनिष्पत्तिसम्भवेन व्यतिरेकासम्भवेन न तत्सत्ता-ऽभ्युपगमस्य कारणता येन तदभ्युपगमः स्यादिति भावः । नन्वभ्युपगमाभावे प्रमाणादीनां हेतुत्व-निवृत्तेर्व्यतिरेकः सम्भवत्येवेत्यत आह ॥ **न त्विति** ॥ ननु प्रमाणादीनां कथाहेतुतायास्तवापीष्टत्वाद्धे-

तोश्च प्राक् सत्यत्वनियमात्प्रमाणादीना कथातः प्राक् सत्त्वे सिद्धे, यद्यदा सत्तदा तदभ्युपगमनीयमेवेति सत्ताऽभ्युपगमस्यापि कथापूर्वभावित्वेन तद्धेतुत्वं सिद्धमिति द्वितीयपक्षे आशयविशेषं शङ्कते ॥ **अथेति** ॥ हेतुत्वस्य सत्त्वरूपत्वाभावस्य वक्ष्यमाणत्वाद्धेतुत्वेन सत्ताऽभ्युपगमानुमानस्य च कथायामेव निग्रहेण कथातोऽन्यत्रासम्भवात्प्रमाणादिसत्ताऽभ्युपगमेन प्रवृत्तायां कथायां तदनुमानस्य च कथाप्रवृत्तौ सत्ताऽभ्युपगमसिद्धिस्तत्सिद्धौ च कथाप्रवृत्तिरित्यन्योन्याश्रयापातेनानुपपत्तेः समयबन्धप्रवृत्तकथायां तत्साधने चोक्तरीत्या व्याघात इति भावेनाह ॥ **मैवमिति** ॥ ननु प्रमाणादिसत्ताऽभ्युपगमस्य कथाप्रवृत्त्युत्तरकाल साध्यत्वे कारणान्तराभावात्कथं कथाप्रवृत्तिरित्यतः पूर्वसूचितं व्यवहारनियमस्य कथाकारणत्वमुपपादयति ॥ **कथात इति** ॥ व्यवहारनियमस्वरूपदर्शनं स चेति । आदिपदेन प्रतिवादिना प्रतिज्ञाहान्यादिनिग्रहस्थानमुद्भावनीयम् । तद्भङ्गे प्रथमस्य भङ्गो व्यवहर्तव्योऽन्यथा द्वितीयस्य प्रामाणिकः पक्षस्तत्त्वतया व्यवहर्तव्य इत्यादेः सङ्ग्रहः । ननु तत्त्वनिर्णयादिफलार्थमेव समयबन्धादिवत्प्रमाणादिवत्प्रमाणादिसत्ताऽपि कथाङ्गत्वेनाङ्गीकार्येत्यत आह ॥ **न चेति** ॥ **तादृशेति** ॥ उभयाङ्गीकारे गौरवादिति भावः । ननु तर्हि नियमं परित्यज्य प्रमाणादिसत्तैवानुमर्तव्या लाघवस्यैवमपि सम्भवादित्यत आह ॥ **प्रमाणादीति** ॥ लोकशब्दस्योभयत्र तुल्यत्वाद्विकल्पयति ॥ **लोकेति** ॥ पामरः संस्काररहितः । 'विवर्णः पामरो नीचः प्राकृतश्च पृथग्जन' इति नामशासनात् ॥ **विचारेति** ॥ विचारसिद्धौ च सत्ताऽभ्युपगमस्तन्नश्च विचार इति चक्रकमिति भावः । सत्तां स्वीकृत्यापि नियमो बध्यते वादिभिर्विचारप्रवृत्त्यर्थं, तदनुपपत्तिरपि सत्ताया अहेतुत्वं गमयतीत्याह ॥ **तदिति** ॥ अबाध्यत्वे सति लोकव्यवहारसिद्धत्वं स्वीकारप्रयोजकमिति शङ्कते ॥ **पश्चादिति** ॥ तर्हि प्रमाणादिसत्ता लोकप्रसिद्धत्वादङ्गीकार्येत्येतद्भुतमित्याह ॥ **तर्हीति यादृश इति** ॥ अवश्याश्रयणीयनियमादेव फलव्यवस्थोपपत्तेः सत्ताऽभ्युपगमो व्यर्थ इत्याशयः । नियमस्याप्रामाणिकत्वेनाव्यवस्थापकत्वे तवापि स न व्यवस्थापकः स्यादित्याह ॥ **तस्येति** ॥ अनेनाक्षेपभाष्यं दर्शयन्नेवोपसंहरति ॥ **तस्मादिति** ॥ अनेनोद्ग्राप्यस्यास्य प्रयासवैयर्थ्यमपि निरस्तं भवति ।

स० — **यदत्रोक्तमिति** ॥ यच्छब्दस्य तत्सर्वमित्युत्तरत्र संबन्धः । कथकेनेत्येकवचनं वैतण्डिकाभिप्रायेण । तदितरस्य प्रमाणादिसत्ताभ्युपगमसिद्धेः ॥ **तत्कस्य हेतोरिति** ॥ 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति कात्यायनवचनात् कस्माद्धेतोरित्यर्थः । तत्र किं प्रमाणमिति यावत् । **हेतुभावादिति** ॥ हेतुत्वादित्यर्थः । यद्यपि कार्यमविनाभावेन गमकं तथापि स्वभावानुपलब्धिकार्यलिङ्गकमनुमानं त्रिविधमिति पराभ्युपगमात् पृथगुपन्यासः ॥ **लोकसिद्धत्वादिति** ॥ लोकशब्दे

लोकव्यवहार उच्यते, तत्सिद्धत्वं प्राणिनिकायेन व्यवह्रियमाणत्वम्। 'लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधक' इत्यादौ लोकशब्दस्य व्यवहारे प्रयोगदर्शनादित्यर्थः ॥ **अथवेति** ॥ प्रमाणादिसत्तामनभ्युपगम्य व्यवहरतो वादफलस्य तत्त्वनिर्णयस्य जल्पादिफलस्य विजयस्य चोपपत्तौ उन्मत्तारब्धकथाया अपी-स्यादिति तदनभ्युपगमस्य फलातिप्रसङ्गहेतुत्वादित्यर्थः ॥ **न प्रथम इति** ॥ विमतः प्रमाणादिसत्ता-ऽभ्युपगमपुरःसरः वाग्व्यवहारत्वात् संप्रतिपन्नवदित्यत्र निर्विशेषणवाग्व्यवहारस्य हेतुत्वे चार्वाकादि-व्यवहारे व्यभिचार इत्यर्थः। ननु माध्यमिकादेः शून्यवादितया प्रमाणादिसत्तानभ्युपगन्तृत्वेऽपि चार्वाकस्य प्रत्यक्षरूपप्रमाणसत्ताभ्युपगन्तृत्वात् कथं व्यभिचारः इति चेत् न। सकलप्रमाणसत्ताभ्युपगमो वाग्व्यवहारव्यापकः यत्किञ्चित्प्रमाणसत्ताभ्युपगमो वा। आद्ये चार्वाककथायां, द्वितीये माध्यमिककथाया-मित्यस्यार्थस्यात्र विवक्षितत्वात्। यद्वा प्रमाणादिपदेन तर्कादेः परिग्रहः। तथाच चार्वाकस्य प्रमाणा-भ्युपगमेऽपि तर्काभ्युपगमो नास्तीति व्यभिचार इत्यर्थः। चार्वाकैकदेशी चार्वाक इत्यप्याहुः। ननु माध्यमिकस्य सर्वशून्यत्ववादितया व्यवहारस्याप्यभावात् कुतो व्यभिचार इत्यत आह ॥ **तस्येति** ॥ माध्यमिकस्यापि सांवृतो व्यवहारोऽस्ति। अन्यथा प्रसक्त्यभावात् प्रतिषेधासंभवादित्यर्थः। किञ्च कथकवाग्व्यवहारः प्रमाणादिसत्तास्वीकारपुरःसरः साधनबाधनक्षमव्यवहारत्वात् भाट्टादिव्यवहारवत्। विपक्षे चार्वाकादिव्यवहारवत् साधनादिक्षमता न स्यादिति द्वितीये अनुमानं प्रयोक्तव्यम्। तत्राद्येऽ-समव्यापकयोर्हेतुसाध्ययोर्व्यतिरेकव्याप्तिनियमात् साधनबाधनक्षमव्यवहाराभावेन प्रमाणादिसत्तानभ्युपगमेन प्रवर्तितत्वं व्याप्तमिति चार्वाकादिव्यवहारे त्वया दर्शनीयम्। अनुमानस्य सोपाधिकत्वात् व्यतिरेके उपाधौ च अन्वये मूलशैथिल्यमेवेत्यभिप्रेत्याह ॥ **व्यतिरेके चेति** ॥ सद्वचनाभासलक्षणान्यसिद्ध्यादीनि तेषामन्यतमयोगित्वादित्यर्थः। ननु चायं नोपाधिः, सति साध्ये, घटादावसत्त्वेन साध्याव्यापकत्वादिति चेत्। मैवम्। पुरुषस्य श्यामत्वे शाकपाकजत्वस्येव वाग्व्यवहारत्वे सति साधनबाधनक्षमत्वाभावे सद्वचनाभासलक्षणयोगित्वं प्रयोजकमिति संतोष्टव्यम्। केचित्– किं च विशिष्टव्यवहारस्यापि माध्य-मिकादिव्यवहार एव व्यभिचारः। ननु माध्यमिकादिव्यवहारः साधनबाधनक्षमो न भवति। प्रमा-णादिसत्ताभ्युपगमपुरःसरत्वाभावादित्यनुमानेन हेतोरेवाभावसाधनान्न व्यभिचार इत्याशङ्क्य अनुमानस्य सोपाधिकत्वान्न हेतुव्यतिरेकसाधनत्वमित्याशयेनाह ॥ **व्यतिरेके चेति** ॥ साधनबाधनक्षमव्यवहारत्व रूपपूर्वहेतुव्यतिरेके माध्यमिकव्यवहारनिष्ठतया व्यभिचाराभावायोक्तरीत्या साध्यतया विवक्षित इत्यर्थः

व्यवहारेऽभ्युपगते प्रमाणसत्तापुरःसरत्वे अन्योन्यमीमांसतया प्रतिपत्त्या दृश्यते । प्रमाणाद्यनभ्युपगम्य प्रवर्ति-तत्वस्य साधनाद्यक्षमत्वप्रयोजकत्वे तन्न स्यादिति भावः । ननु यथा कथकव्यवहारस्य प्रमाणादिसत्ता-भ्युपगमपूर्वकत्वासाधने भवता व्यभिचारादिकमुच्यते तथा तस्य प्रमाणाद्यसत्त्वाभ्युपगमपूर्वकत्वसाधने मयाऽप्याश्रयासिद्ध्यादिकं वक्तुं शक्यत एवेत्याशङ्कते ॥ नन्विति ॥ यद्यप्येतत् पक्षचतुष्टयदूषणानन्तर-माशङ्कनीयम् । तथाऽपि विलम्बमसहमानेनात्रैवाशङ्कितमिति ध्येयम् । ननु वयं कथापूर्वकाले प्रमाणादि-सत्ताभ्युपगमस्याप्रयोजकत्वमाचक्ष्महे । न तु प्रमाणादीनि न सन्तीत्येवंरूपतदसत्वाभ्युपगमस्यापि कथा-प्रयोजकत्वेन पूर्वकालसत्वं, येनेदं चोद्यं स्यादित्याह ॥ न ब्रूम इति ॥ ननु प्रमाणादिसत्वं त्वया कथा-पूर्वकाले नाभ्युपगतं, तदसत्वमपि यदि नाभ्युपगम्यते, तदा प्रमाणादीनां व्यवहारागोचरत्वप्राप्त्या प्रमाणेन तर्केण च व्यवहर्तव्यमित्यादिरूपसमयबन्धाद्यसंभवेन पुनः कथाऽऽरम्भोऽनुपपन्न इत्याशङ्कते ॥किन्नामेति॥ उत्तरमाह ॥ सन्ति न सन्तीत्यादिना ॥ अत्र कथाशब्द आवर्तनीयः । तथा चेत्थं योजना । यथा स्वीकृत्य तानि भवता व्यवह्रियन्त, समयबन्धादिपूर्वककथाऽऽरभ्यते, तथा सन्ति न सन्ति प्रमाणादीनीत्यस्यां चिन्तायां उदासीनैस्तथाव्यवहारिभिरुपेक्षितसदसत्वकप्रमाणैर्व्यवहर्तव्यमित्येव समयबन्धादिरूपव्यवहार-वद्भिः अस्माभिरपि कथा प्रवर्त्यतामिति ब्रूम इति । प्रमाणादिसत्ताऽभ्युपगन्त्रा त्वया यादृशसमयबन्धेन कथाप्रवृत्तिरभ्युपगता तादृशसमयबन्धेनैव प्रमाणादिसत्वाद्युदासीनेन मयाऽपि कथाप्रवृत्तिरुच्यत इति भावः ॥ न तृतीय इति ॥ प्रमाणादिसत्तानभ्युपगमे किमियं कथा नोपपद्यते । कथान्तरं वा । नाद्यः । आरब्धत्वादेव । न द्वितीयः । विमताः कथाः प्रमाणादिसत्तानभ्युपगमपुरःसराः कथात्वात् प्रारब्धैत-त्कथावदिति कथान्तरस्याप्युपपत्तेरिति भावः । चार्वाकादेः कथाप्रवेशेऽयं दोषो वक्तव्य इति बोध्यते उत कथातोऽन्यत्र वक्तव्य इति । उभयथाप्यनुपपत्तिरित्याह ॥ तस्येति ॥ तत्र हेतुमाह ॥ कथाया-मिति ॥ कथाप्रवेशे सत्येव तत्वाज्ञानलिङ्गनिग्रहस्तस्येति विनेयबोधनं संभावितम् ॥ कथातोऽन्यत्र निग्रहा-विषयत्वात्, तथाच व्याघात इत्यर्थः ॥ अथ मन्यस इति ॥ प्रमाणादीनां कारणत्वं तवापीष्टं, नियता-पूर्वक्षणसत्वमेव कारणत्वमिति सत्वमभ्युपगन्तव्यमित्यर्थः । सत्ताऽभ्युपगमस्य कथाप्रवृत्त्युत्तरकालसाध्यत्वं किं कथातः पूर्वं वादिप्रतिवादिभ्यामनुरोद्धव्यं नियमस्थित्यभ्युपगममाक्षिपतीत्यर्थः । तर्हि विचारप्रवृत्त्यैव तन्निरूप्यतामत आह ॥ तदर्थमेवेति ॥ विचारार्थमेवेत्यर्थः । नियमस्य प्रमाणादिसत्ताभ्युपगमनियमस्य । तथाच विचारसिद्धौ व्यवहारस्य प्रामाणिकत्वसिद्धिः, तत्सिद्धौ सत्वाभ्युपगमसिद्धिः, ततश्च विचारसिद्धिः इति चक्रकापत्तिरिति भावः । एके तु विचारप्रवृत्त्या प्रमाणादिसत्ताभ्युपगमस्यापि प्रामाणिकलोक-व्यवहारसिद्धत्वम् । तत्सिद्धेन प्रमाणादिसत्ताभ्युपगमेन विचारप्रवृत्तिरित्यन्योन्याश्रय इत्याहुः । अवा-

पश्चादिति ॥ हेत्वन्तरं नाम निग्रहस्थानं स्यादिति दूषयति ॥ **तर्हीति** ॥ लोकसिद्धेरप्रयोजकतामाह ॥ **अन्यथेति** ॥ प्राप्ताप्राप्तविवेकेनाबाध्यत्वमेव स्वीकारप्रयोजकमागतम् । न लोकव्यवहारसिद्धत्वम् । अबाध्यत्वं प्रमाणादिसत्तायाः न विचारप्रवृत्तिमन्तरेण निश्चेतुं शक्यमिति भावः ॥ **न चतुर्थ इति** ॥ न च, मया कथापूर्वं प्रमाणादिसत्ताऽभ्युपगतेति न फलातिप्रसङ्ग इति, कयाऽपि नियमस्थित्या प्रवृत्तायां कथायां भवतेदं दूषणं वाच्यम् । तथैव कथान्तरप्रवृत्त्युपपत्तेः । अन्यथा अन्योन्याश्रयादिप्रसङ्गादिति उक्तन्यायेन कथातःपूर्वं प्रमाणादिसत्ताऽभ्युपगमस्य कर्तुमशक्यत्वात् । तथा च व्यवहारनियम एव फलातिप्रसङ्गो न भवतीति त्वयापि वाच्यमिति भावः ।

प०—इत्युक्तमिति ॥ अन्यथा प्रामाणिकमित्यवक्ष्यदिति भावः । अनङ्गीकुर्वतामित्यत्र द्वितीययोजनायामुक्ततर्के परोक्तबाधकमनुवदति ॥ **यदत्रेत्यादिना** तदेतत्सर्वमनेनापहसितमित्यन्तेन । अत्र विश्वसत्यतामनङ्गीकुर्वतां कथकता न स्यादित्युक्तप्रसङ्गे यद्बाधकमुक्तं तदपहसितमिति दूरेणान्वयः । हेतुभावाद्धेतुत्वादित्यर्थः ॥ **लोकसिद्धत्वादिति** ॥ प्रमाणादिसत्त्वस्य लोकव्यवहारसिद्धत्वादित्यर्थः ॥ **तदिति** ॥ प्रमाणसत्त्वानभ्युपगमस्येत्यर्थः । प्रमाणहीनस्यापि तत्वनिर्णयादिति भावः ॥ **किं व्यवहारमात्रमिति** ॥ विमतो व्यवहारः प्रमाणसत्त्वाभ्युपगमपूर्वकः व्यवहारत्वादिति साध्यते, साधनबाधनक्षमव्यवहारत्वादिति वेति प्रश्नार्थः ॥ **बाध इति** ॥ चार्वाकादिनाऽनुमानादिप्रमाणसत्ताऽनभ्युपगमादिति भावः ॥**सिद्धं ममेति**॥ मायावादिव्यवहारस्य साधनादिक्षमत्वं प्रतिवादिसिद्धं चेत्तर्हि विश्वमिथ्यात्वं प्राप्तमेवेति भावः ॥ **व्यतिरेके चेति** ॥ नायं व्यवहारवान् । साधनादिक्षमव्यवहारवान्वा न भवति । प्रमाणसत्त्वानभ्युपगन्तृत्वादिति वा । त्वदीयव्यवहारः साधनाद्यक्षमः प्रमाणसत्ताभ्युपगमपूर्वकत्वविधुरत्वादिति वा । व्यतिरेकसाधने चेति वा पूर्वोक्तसाध्यहेत्वोर्व्यतिरेकव्याप्तौ चेति वा प्रमाणसत्वानभ्युपगमो न प्रयोजकः । किन्तु सद्वचनस्य निर्दोषशब्दस्य आभासः तद्वदवभासमानत्वे सति तल्लक्षणशून्यः शब्दस्तस्य यल्लक्षणं योग्यताराहित्यादिरूपं तद्युक्तत्वमेवोपाधिः प्रयोजकमित्यर्थः । कथमिदं ज्ञायते प्रमाणसत्त्वानभ्युपगमोऽप्रयोजकः त्वदुक्तमेव प्रयोजकमित्यतो व्यभिचाराव्यभिचाराभ्यामिति भावेनाह ॥ **यत इति** ॥ मतान्तरानुसारिभिः तार्किकमतानुसारिभिः प्रवर्तिताः शब्दानित्यत्वादिव्यवहाराः अपरैर्मीमांसकैः शब्दनित्यत्वमतानुसारिभिरित्यर्थः । कथ्यन्त इत्यनन्तरं सद्वचनाभासलक्षणायोगित्वे च प्रत्यक्षप्रामाण्यादिव्यवहाराः साधनादिक्षमा इति कथ्यन्त इत्यपि ध्येयम् । सिद्धान्ती शङ्कते ॥ **ननु यदीति** ॥ मायावादी समाधत्ते॥ **न ब्रूमो वयमिति** ॥ **भवतेति** ॥ तत्त्ववादिनेत्यर्थः ॥ **इदमिति** ॥ प्रमाणसत्ताऽभावे साधनादिक्षमव्यवहारो न स्यादिति

दूषणमित्यर्थः ॥ **पर्यनुयोगेति** ॥ दूषणाभिधानेत्यर्थः ॥ **कथान्तरेति** ॥ शब्दनित्यत्वानित्यत्वविषये तावदेका कथा । तदुपायस्यैकेन सत्त्वमन्येनासत्त्वमुपेत्योपक्रान्ता । तत्र च शब्दनित्यत्वादिचिन्तां हित्वा तदुपायो यदि तेऽसन्स्यात्तर्हि तव कथा न स्यादित्यापादने कथान्तरप्रसक्तिदोषः । असतो व्यवहाराङ्गत्वानङ्गत्वचिन्तारूपकथान्तरमप्यसतो व्यवहाराङ्गत्वसाधनोपायस्यैकेन सत्त्वमन्येनासत्त्वमुपेत्य पूर्वत्रेव प्रवर्तनीयम् । तथैवोपक्रमात् । तत्रापि कथान्तरे एवमापादने द्वितीयकथात्यागेन तदुपायगोचरतृतीयकथाप्रसक्तिः । साऽपि तथैव चालनीया। तत्राप्येवमापादने पुनस्तथैव कथान्तरप्रसक्तिरित्यपर्यवसितकथान्तरप्रसक्तेरित्यर्थः । एके तु अन्तरशब्दो विशेषवाची । तथैवैकेन सत्त्वमपरेणासत्त्वमुपेत्यैव तादृशकथाविशेषस्य प्रसक्तत्वेन तत्रैवं दोषोक्तेरयुक्तत्वादित्यर्थ इत्याहुः । तच्चिन्त्यम् । नचैवं कथान्तरप्रसक्त्यादिदोष इत्यग्रिमग्रन्थविरोधादित्यन्ये । ज्ञाप्यन्त 'इत्यस्य गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णाविति' द्विकर्मकत्वात्कर्मणि प्रयोगाच्च शिष्यादय इत्यनधिकारमिति च निर्देशो युक्तः ॥ **कथाप्रवेशाप्रवेशयोरिति** ॥ प्रवेशे कीदृशी मर्यादामित्यनेनोक्तविकल्पदोषाणामापत्तेरित्यस्य स्फुटत्वादप्रवेशपक्षे व्यनक्ति ॥ **कथायामेव हि निग्रह इति** ॥ स्थित इत्यर्थे । प्राग्विकल्पितकल्पचतुष्टयमध्ये कथकप्रवर्तनीयवाग्व्यवहारं प्रति हेतुभावादितिपक्षं निराह ॥ **न द्वितीय इति** ॥ **हेत्वनुपपत्तेरिति** ॥ प्रमाणादेः सत्त्वानङ्गीकारे कारणायोगादित्यर्थः ॥ **तत्त्वेति** ॥ तत्वावधारणादि च सम्भाव्यत इत्यन्वयः ॥ **व्यवहारेति** ॥ पञ्चावयवत्र्यवयवादिप्रमाणतर्कादिव्यवहारविषयसमयबन्धादेवेत्यग्रे व्यक्तम् समयस्सङ्केतः । इत्थमेव । व्यवहारनियमवदेवेत्यर्थः । लोकसिद्धत्वादितिपक्षं निराह ॥ **नापि तृतीय इति** ॥ **पूर्वं नियमस्यगवेषणादिति** ॥ तथाच पूर्वं व्यवहारनियमसमयबन्धादेव प्रवृत्तकथायां प्रमाण व्यवहारोपपत्तौ किं तत्सत्त्वयेति भावः ॥ **इति तावन्न भवतीति** ॥ किन्तु विचारबाध्यत्वाबाध्यत्वाभ्यामेवेति प्राप्तमिति भावः । प्रमाणसत्त्वानभ्युपगमस्य तत्वनिर्णयविजयातिप्रसञ्जकत्वादितिकल्प निराह ॥ **न चतुर्थ इति** ॥ विश्वशब्दार्थः प्रमाणादीति ॥

या० — प्रमाणादिसत्ताऽभ्युपगमस्य कथाऽङ्गत्वे मानाभावात्प्रमाणाद्याकार एव प्रयोजकोऽतो ऽसद्वादिनोऽपि कथाधिकारः किमुतानिर्वचनीयवादिन इत्यभिप्रेत्य यत्केनचिदुक्तं तदनूद्य दूषयति **यदत्रोक्तमित्यादिना** ॥ कथकेनेत्येकवचनं वैतण्डिकाभिप्रायेण । तदितरस्य प्रमाणादिसत्ताऽभ्युपगम सिद्धेः । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति कात्यायनस्मरणात् । कस्य हेतोः कस्माद्धेतोरि क्तानेव विकल्पान्निराशदयति ॥ **किमित्यादिना** ॥ अशक्यत्वात्तत्सत्ताऽभ्युपगम इति शेषः । रूपमविनाभावबलेनैव गमयति न कार्यकारणभावः तत्र मूलं, एवं कथकवाग्व्यवहारोऽपि प्रमाणा

सत्ताऽभ्युपगमाविनाभूत इत्येव तं गमयति । न कारणकार्यत्वेनेति प्रथमविकल्पार्थः । यथा ज्ञानलक्षणं कार्यं स्वकारणं कल्पयति तथा वाग्व्यवहारोऽपि कार्यतया स्वकारणं प्रमाणादिसत्ताऽभ्युपगमं गमयतीति द्वितीयविकल्पार्थः । यद्यपि कार्यमप्यविनाभावेनैव गमयति । तथापि स्वभावानुपलब्धिकार्यलिङ्गकमनुमानं त्रिविधमिति पराभ्युपगमात्पृथगुपन्यासः । लोकशब्देन लोकव्यवहार उच्यते । तथा च यथा घटादिकं लोकव्यवहारसिद्धमङ्गीकार्यं तथा प्रमाणादिसत्ताऽपीति तृतीयविकल्पार्थः । प्रमाणादिसत्तामनभ्युपगच्छतोऽपि कथकस्य यदि वादजल्पफलयोस्तत्त्वनिर्णयजययोः सिद्धिस्तदोन्मत्तस्यापि तत्सिद्धिः स्यादिति प्रमाणादिसत्तानभ्युपगमस्य फलातिप्रसङ्गहेतुत्वात्तत्सत्ताऽभ्युपगन्तव्येति चतुर्थविकल्पार्थः ॥ **साधनबाधनक्षम इति** ॥ साधनक्षमत्वं, स्वपक्षप्रमितिजनकत्वं बाधनक्षमत्वं परपक्षप्रतिषेधप्रमितिजनकत्वम् । विमतो मायावादिव्यवहारः प्रमाणादिसत्ताऽभ्युपगमपुरःसरः । व्यवहारत्वात्संप्रतिपन्नभाट्टादिव्यवहारवदिति प्रथमकल्पाभिप्रेतमनुमानं दूषयति ॥ **न प्रथम इति** ॥ **चार्वाकमाध्यमिकादेरिति** ॥ ननु माध्यमिकादेर्विश्वमिथ्यात्ववादितया प्रमाणादिसत्तानभ्युपगन्तृत्वेऽपि चार्वाकस्य प्रत्यक्षरूपप्रमाणसत्ताऽभ्युपगन्तृत्वात्कथं तद्व्यवहारे व्यभिचार इति चेन्न । सकलप्रमाणसत्ताऽभ्युपगमः कथकवाग्व्यवहारव्यापको, यत्किञ्चित्प्रमाणसत्ताऽभ्युपगमो वा । आद्ये चार्वाककथायां व्यभिचारो, द्वितीये माध्यमिककथायामित्यस्यार्थस्य विवक्षितत्वात् । यद्वा प्रमाणादीत्यादिपदेन तर्कादेः परिग्रहः । तथा च चार्वाकस्य प्रत्यक्षरूपप्रमाणसत्ताऽभ्युपपगमेऽपि तर्काभ्युगमो नास्तीति व्यभिचार इत्यर्थः । चार्वाकैकदेशी चार्वाक इत्यप्याहुः । ननु चार्वाकादेर्वाग्व्यवहार एव नास्ति कुत्र व्यभिचार इत्यत आह ॥ **तस्यैवेति** ॥ तत्तद्दर्शने तत्तदुक्तयुक्तिनिराकरणान्यथाऽनुपपत्तिरेव तद्वाग्व्यवहारे प्रमाणमित्यर्थः । विमतो व्यवहारः, प्रमाणादिसत्ताऽभ्युपगमपुरःसरः, साधनबाधनक्षमव्यवहारत्वाद्भाट्टादिव्यवहारवत् । विपक्षे चार्वाकादिव्यवहारवत्साधनादिक्षमता न स्यादिति द्वितीयं विकल्पमाशङ्क्याह ॥ **द्वितीय इति** ॥ किंच विशिष्टव्यवहारस्यापि माध्यमिकादिव्यवहार एव व्यभिचारः । ननु माध्यमिकादिव्यवहारः साधनबाधनक्षमो न भवति । प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वाभावाद्भ्रान्तपुरुषवाग्व्यवहारवदित्यनुमानेन तत्र हेत्वभावसिद्धेर्न व्यभिचार इत्याशङ्कायामस्यानुमानस्य सोपाधिकत्वान्नोक्तहेत्वभावसाधकत्वमित्याशयेनाह ॥ **व्यतिरेके चेति** ॥ साधनबाधनक्षमव्यवहारत्वरूपपूर्वहेतुव्यतिरेके माध्यमिकादिव्यवहारनिष्ठतया व्यभिचारायोक्तरीत्या साध्यतया विवक्षित इत्यर्थः । यद्वा व्यतिरेके पूर्वानुमानव्यतिरेकव्याप्तावित्यर्थः । वस्तुतस्तु माध्यमिकादिव्यवहारो न साधनादिक्षम इत्युक्तानुमानेऽन्वय एवायमुपाधिरिति द्रष्टव्यम् ।

क्षमत्वे साधनदूषणाभासलक्षणयोगित्वं तन्त्रं न तु प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वाभाव इति भावः । सद्वचनाभासशब्देन निग्रहस्थानं विवक्षितम् । तल्लक्षणं तत्त्वज्ञानाभावलिङ्गत्वं तद्योगित्वमित्यर्थ इत्यन्ये । अत्र च वाग्व्यवहाररूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्य विवक्षितत्वान्न घटादौ साध्याव्यापकतेति द्रष्टव्यम् । उपाधिरेव साध्ये प्रयोजको न हेतुरित्युक्तं विशदयति ॥ **यतोऽभ्युपगम्यापीति** ॥ मतान्तरानुसारिभिर्मीमांसकैः । मतान्तरानुसारिभिरपरैस्तार्किकैः । तथा च नैयायिकमीमांसकयोः कथमुभयोरपि प्रमाणादिसत्ताऽभ्युपगमवत्त्वमुक्तहेत्वभावेऽपि साध्यस्योपाधिप्रयुक्तस्यैव सत्त्वेन नोक्तहेतुस्तत्प्रयोजक इति भावः । तस्मात्साधनबाधनक्षमव्यवहाररूपहेतोरपि माध्यमिकादिव्यवहारे व्यभिचारो युक्त एवेत्यवधेयम् । ननु कथकव्यापारव्यवहारस्य प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वाभावे तदसत्ताऽभ्युपगमपूर्वकत्वमेवोक्तं स्यात् । 'परस्परविरोधे तु न प्रकारान्तरस्थितिरि'ति वचनात् । तथा च प्रमाणाभावेनाश्रयासिद्धिर्न वा साधनदूषणमित्यव्यवस्था स्यादिति शङ्कते ॥ ॥ **नन्विति** ॥ यद्यप्येतत्पक्षचतुष्टयदूषणानन्तरमाशङ्कनीयम् । तथापि विलम्बमसहमानेनात्रैवाऽऽशङ्कितमिति ध्येयम् । कथापूर्वकाले प्रमाणादिसत्ताऽभ्युपगमस्याप्रयोजकतामाचक्ष्महे न तु प्रमाणादीनि न सन्तीत्येवंरूपतदसत्त्वाऽभ्युपगमस्यापि कथापूर्वकाले सत्त्वमनिर्वचनीयरूपतृतीयकोटेः सत्त्वेन तयोः परस्परविरोधस्यैवासंमतत्वात् । अतो नेदं चोद्यं युक्तमित्याह ॥ **न ब्रूम इति** ॥ उदासीनैः कथाऽऽरभ्येति पूर्वेणान्वयः एतदेवोपपादयति ॥ **यथेति** ॥ अत्र तथेत्येकस्तच्छब्दो यच्छब्दोपादानादेव द्रष्टव्यः । तथा च यथा तानि प्रमाणादीनि स्वीकृत्य भवता व्यवह्रियते, तादृशव्यवहारनियमे समयं बद्ध्वा कथाऽऽरभ्यते, तथा, तथाव्यवहर्तृभिरुपेक्षितसदसत्त्वप्रमाणैर्व्यवहर्तव्यमित्येवं समयबन्धादिरूपव्यवहारवद्भिरस्माभिरपि कथा प्रवर्त्यतामिति ब्रूम इति सम्बन्धः । यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्मी न सिध्येदित्यादिनोक्तं दूषणं स्वव्याहतं चेति वक्तुमाह ॥ **किञ्चेति** ॥ कथायामेव दूषणाभिधानं नान्यत्रेति नियमादेतेषां विकल्पानामवकाश इति ध्येयम् ॥ **एतादृक्पर्यनुयोगेति** ॥ यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्मी न सिध्येदित्येतादृशपर्यनुयोगानवकाशादित्यर्थः ॥ **स्वस्याप्यापत्तेरिति** ॥ प्रमाणाद्यसत्त्वस्य स्वेनाप्यङ्गीकृतत्वेन स्वस्यापि धर्म्याद्यसिद्धिरूपदूषणापत्तेरित्यर्थः ॥ **तथैव कथान्तरेति** ॥ यथा प्रकृतैतद्दूषणाधिकरणकथारूपव्यवहाराख्यो धर्म्येकेन प्रमाणादिसत्ताऽनभ्युपगमेऽपि सिद्धः । तथैव मया प्रमाणादिसत्ताऽनभ्युपगमेऽपि मत्कर्तृककथान्तरादिरूपव्यवहारादिलक्षणधर्म्यादिसिध्युपपत्तिरिति भावः ॥ **तथा च व्याघात इति** ॥ स्वयमेव प्रमाणादिसत्ताऽभ्युपगममन्तरेणापि प्रकृतकथारूप-

किन्तूपदेशद्वारेणैव शिष्यशिक्षार्थं क्रियते ततो न व्याघात इत्याशङ्क्य निषेधति ॥ **न चेति** ॥
शिष्यादय इत्यत्रादिपदेन पुत्रादयो ग्राह्याः ॥ **कथं च तथेति** ॥ एवमभिधानं शिष्यादिबोधनाय कथ-मुपपन्नं स्यादित्यर्थः । कुत इत्यत आह ॥ **तस्य कथेति** ॥ तस्य चार्वाकादेर्यदि कथाप्रवेशानन्तरमेत-द्दूषण मुच्यते तदेयमेव कथा कथं प्रवृत्तेत्याद्युक्तविकल्पदूषणप्रसङ्गः । यदि न तस्य कथाप्रवेशस्तद न तं प्रति दूषणाभिधानं युक्तमिति शिष्येणापि वक्तुं शक्यत्वान्न तेनापीदं बोद्धुं शक्यमित्यर्थः । ननु यदि न तस्य कथाप्रवेशस्तदा न तं प्रति दूषणाभिधानमिति कुत इत्यत आह ॥ **कथायामेव हीति** ॥ कथायामखण्डिताहङ्कारेण परेण पराहङ्कारखण्डनस्य, कथाकारणसम्यग्ज्ञानाभावस्य वा निग्रहत्वादिति भावः । प्रमाणादिसत्ताऽभ्युपगमस्य कथकवाग्व्यवहारं प्रति हेतुत्वात्कथातः पूर्वं तदभ्युपगतिरिति द्वितीयपक्षं प्रतिषेधति ॥ **न द्वितीय इति** ॥ वाग्व्यवहारं प्रति प्रमाणादीनां हेतुत्वं सम्भाव्येतापि न तु तत्सत्ताऽभ्युपगमस्यापि, माध्यमिकवाग्व्यवहारे व्यतिरेकव्यभिचारादित्यर्थः । ननु प्रमाणादीनां हेतुत्वं यदि मनुषे तदा तत्सत्ताऽभ्युपगमस्यापि हेतुत्वं मंस्यसे । यतो नियतपूर्वसत्त्वं हेतुत्वम् । तच्चावश्या-भ्युपेयमित्यवर्जनीयसिद्ध एव प्रमाणादिसत्ताभ्युपगमः कथातः पूर्वमित्याशङ्कते ॥ **अथेति** ॥ यद्यद् सत्तया ज्ञायते तत्तदाऽभ्युपगम्यत इति व्याप्तेरुभयसिद्धत्वादिति भावः । प्रमाणादीनि सन्ति हेतुत्वा-द्ब्रह्मवत् । प्रमाणादीन्यभ्युपगमविषयाः सत्त्वाद्ब्रह्मवदिति यस्यां कथायां त्वया साधनीयं सा किमुक्त-विधया प्रमाणादिसत्ताऽभ्युपगमे प्रवृत्ता । उत तदनभ्युपगमेऽपि समयबन्धमात्रात् । आद्येऽन्योन्याश्रयः कथाप्रवृत्तौ सत्ताऽभ्युपगमसिद्धिस्तत्सिद्धौ च कथाप्रवृत्तिरिति । द्वितीये त्वाह ॥ **कथाऽपीति** ॥ अग्रे वक्ष्यमाणयेत्यर्थः । नियमस्थितिः समयबन्धः । भवता प्रसाध्येत्यनन्तरं तथा च तद्वदेव कथान्तर-प्रवृत्तिसम्भवेनास्मदिष्टसिद्धिरिति वाक्यशेषः । कयाऽपि नियमस्थित्येत्यनेन समयबन्धस्य कथापूर्वकत्वं सत्त्वमावश्यकमित्युक्तं तदपि कुत इत्यतस्तत्कल्पकं वक्तुमाह ॥ **कथात इति** ॥ कथातः पूर्वं समयबन्धा-भ्युपगमकल्पकं कथाफलमेवास्तीत्यर्थः । केचित्तु । ननु प्रमाणादिसत्ताऽभ्युपगमवत्समयबन्धोऽपि कथायां तन्त्रमेवेत्यत आह । कथात इतीत्यप्याहुः ॥ **व्यवहारनियमेति** ॥ व्यवहारनियमरूपसमय-बन्धादित्यर्थः ॥ **द्वाभ्यामिति** ॥ अनेन कथातः पूर्वं समयबन्धाभ्युपगम उभयसम्मतो, न प्रमाणादि-सत्ताऽभ्युपगम इव हेतुना साध्य इति सूचितम् । तेन कथायामेव, समयबन्धः पूर्वमावश्यक इति केन-चिद्धेतुना साधनीयस् । कथा च समयबन्धाधीनेति परस्पराश्रयोऽन्तरेण च तं कथैष्टव्येति शङ्का निराकृतेति ध्येयम् । अनुरोध्यं समयबन्धं दर्शयति ॥ **स चेति** ॥ वादिनेव साधकेन प्रथमप्रयोक्त्रा । प्रमाणतर्काभ्यां व्यवहर्तव्यम् । वादाभिप्रायमेतत् । जल्पादौ छलादिप्रयोगस्यापि सम्भवात् । प्रायि-कत्वापेक्षया वेदमुक्तम् । सत्साधनापरिस्फूर्तिदशायामेव कदाचिच्छलोपादानात् । इत्यादीत्यनेन

प्रतिवादिनोऽपि कथाङ्गतत्वज्ञानविपर्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमं निग्रहस्थानं तस्य प्रदर्शनीयम् । तद्व्युत्पादने प्रथमस्य भङ्गो व्यवहर्तव्यः । अन्यथा तु द्वितीयस्यैव । तादृशेतरौ च जेतृतया व्यवहर्तव्यौ । प्रामाणिकः पक्षस्तत्त्वतया व्यवहर्तव्य इत्यादिरूपसमयबन्धसङ्ग्रहः । ननु प्रमाणासत्ताऽपि तथैवानुरुध्यतामित्यत आह ॥ **न चेति** ॥ समयबन्धस्यावश्यकत्वात्तन्मात्रमनुरोध्यं न तु प्रमाणाद्यभ्युपगमोऽपि कल्पनागौरवप्राप्तेरित्यर्थः ॥ **कथाप्रवृत्तिं विनेति** । कथाप्रवृत्त्यभाव इत्यर्थः । लोकसिद्धत्वात्तत्सत्ताङ्गीकार्येति तृतीयं निरस्यति ॥ **नापीति** ॥ **प्रमाणव्यवहार इति** ॥ प्रामाणिकलोकव्यवहार इत्यर्थः । पामराः शास्त्रसंस्कारहिताः । 'विवर्णः प्राकृतो नीचः पामरस्तु पृथग्जन'इत्यभिधानात् । तर्हि विचारप्रवृत्त्यैव तन्निरूप्यतामित्यत आह ॥ **तदर्थमेवेति** ॥ विचारार्थमेवेत्यर्थः ॥ **नियमस्येति** ॥ प्रमाणादिसत्ताऽभ्युपगमनियमस्येत्यर्थः । तथाच विचारप्रवृत्त्या प्रमाणादिसत्ताऽभ्युपगमस्य प्रामाणिकलोकव्यवहारसिद्धत्वं तत्सिद्धेन प्रमाणादिसत्ताऽभ्युपगमेन विचारप्रवृत्तिरित्यन्योन्याश्रय इति भावः ॥ **शरीरेति** ॥ अहं स्थूल इत्यादिप्रत्ययाच्छरीर एवात्मव्यवहारादित्यर्थः । विचाराबाध्यलोकव्यवहारसिद्धत्वमभ्युपगम्यतायां तन्त्रमनो न शरीरात्मत्वादीनामपि स्वीकारप्रसङ्गः इति शङ्कते ॥ **पश्चादिति** ॥ प्राप्ताप्राप्तविवेकेनाबाध्यत्वमेव स्वीकारप्रयोजकमागतं न लोकव्यवहारसिद्धत्वम् । अबाध्यत्वं च प्रमाणादिसत्तायां न विचारप्रवृत्तिमन्तरेण निश्चेतुं शक्यमिति भावः ॥ **यादृशो भवतेति** ॥ समयनियमबन्धादेवावश्याश्रयणीयात्फलव्यवस्थोपपत्तेः कथातः पूर्वं प्रमाणादिसत्ताऽभ्युपगमो व्यर्थ इत्यर्थः । तथा चावश्यक्लृप्तनियतपूर्ववर्तिन एव नियतसमयबन्धात्कार्यसम्भवे तत्सहभूतस्य प्रमाणादिसत्ताऽभ्युपगमस्यान्यथासिद्धस्य न कथादिकारणत्वमिति प्रमाणादिसत्ताऽभ्युपगमो व्यर्थ इत्यर्थः ॥ **तस्येति** ॥ कथापूर्वं प्रमाणादिसत्ताऽभ्युपगमाभावे व्यवहारादिनियममात्रस्योन्मत्तादिसाधारण्यमुक्त्वा यदि फलातिप्रसङ्ग उच्यत इत्यर्थः ॥ **तदा त्वां प्रत्यपीति** ॥ कथातः पूर्वं प्रमाणादिसत्ताऽभ्युपगन्तृत्वमप्यस्तीति न फलातिप्रसङ्गः इति कयाऽपि नियमस्थित्या प्रवृत्तायां कथायां भवतेदं दूषणं वाच्यम् । तथैव कथान्तरप्रवृत्त्युपपत्तेरन्यथाऽन्योन्याश्रयादित्युक्तन्यायेन कथापूर्वं प्रमाणादिसत्ताऽभ्युपगमस्यैव कर्तुमशक्यत्वेनोक्तान्यथासिद्ध्या च केवलो व्यवहारनियम एव फलातिप्रसञ्जको न भवतीति त्वयाऽपि वक्तव्यमिति भावः ।

श्री०—**न हीति** ॥ **व्याघातादिति** ॥ पदार्थप्रमितिकरणस्यैव प्रमाणत्वादिति भावः । **तदभावेनेति** ॥ प्रमाणादिसत्ताभ्युपगमाभावेनेत्यर्थः । ननु चार्वाकमते प्रत्यक्षस्यैव प्रामाण्यम् माध्यमिकस्य सर्वशून्यतया व्यवहारस्याप्यभावात्कुतो व्यभिचार इत्यत आह ॥ **तस्येति** ॥ यद्यपि

सांवृतो व्यवहारोऽस्ति । अन्यथा प्रसक्त्यभावात्प्रतिषेधासम्भवादित्यर्थः । ननु सोऽपि पक्षीक्रियत इत्यत आह ॥ **तस्यापीति** ॥ प्रमाणादिसत्वस्य तेनानङ्गीकारादिति भावः ॥ **अनुभवेति** ॥ मदनुभवेत्यर्थः । विमतो मायावादिव्यवहारः प्रमाणादिसत्ताभ्युपगमपूर्वकः साधनबाधनक्षमव्यवहारत्वाद्भाट्टादिव्यवहारवदित्यनुमाने बाधादिकमभिधाय व्यतिरेकव्याप्तावुपाधिं चाह ॥ **व्यतिरेके चेति** । **सद्वचनेति** ॥ यः 'परार्थानुमानस्य प्रयोगो वाक्यलक्षण' इति वचनेन परार्थानुमानस्य शब्दरूपत्वाद्वचनेत्युक्तम् । सद्वचनं समीचीनानुमानम् । तदाभासस्य यल्लक्षणं व्यभिचारादि तद्योगित्वमित्यर्थः । **व्यवहार एवेति** ॥ कथ् वाक्यप्रबन्ध इति धातोः कथारूपो यो वाग्व्यवहारस्तद्रूपो यो धर्मी साधनदूषणाधिकरणत्वात्स कथं सिध्येदित्यर्थः ॥ **इति स्वीकृत्येति** ॥ प्रमाणादीनामसत्वं स्वीकृत्येत्यर्थः ॥ **कथायामिति** । कथायामेव हि निग्रह इति भावः ॥ **इदं दूषणमिति** ॥ यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्मी कथं सिध्येदिति दूषणमित्यर्थः ॥ **स्यादप्येवमिति** ॥ अपिः सम्भावनायाम् । कथकप्रवर्तनीयकथारूपवाग्व्यवहारं प्रति प्रमाणादिसत्ताभ्युपगमस्य हेतुत्वं तदा सम्भावितं स्यादित्यर्थः । वाग्व्यवहारस्वरूपं वाग्व्यवहाररूपकथास्वरूपम् । कुत इत्यत आह ॥ **हेतुनेति** ॥ प्रमाणादिसत्ताभ्युपगमरूपकारणानुपपत्तेस्तदभावादित्यर्थः । स्थितिर्व्याप्तिः ॥ **कयाऽपि नियमस्थित्येति** ॥ प्रमाणेन तर्केण च व्यवहर्तव्यमित्येवंरूपे व्यवहारनियमे यः समयबन्धः सङ्केतकरणं तेन प्रवृत्तायामित्यर्थः ॥ **तच्चेति** ॥ अभिलषितमित्यर्थः ॥ **स चेति** ॥ व्यवहारनियम इत्यर्थः ॥ **प्रमाणादिसत्ताऽपीत्थमेवेति** ॥ यथा प्रमाणेन तर्केण च व्यवहर्तव्यमिति व्यवहारनियमे समयबन्धो द्वाभ्यां क्रियते एवमेव सद्भिरेव प्रमाणैर्व्यवहर्तव्यमिति समयबन्धः क्रियतामित्यर्थः ॥ **तादृशेति** ॥ प्रमाणेन तर्केण च व्यवहर्तव्यमित्येवंरूपेत्यर्थः ॥ **उपपत्तेरिति** ॥ प्रमाणादीनां सत्ता नाङ्गीकर्तुमुचितेत्याशयः ॥ **प्रमाणादिसत्तामित्यादि** ॥ अयं भावः । यः प्रमाणादिसत्तां कथाप्रवृत्तिकारणमङ्गीकरोति । तेनाप्युक्तव्यवहारनियमसमयबन्धस्तावदवश्यमङ्गीकर्तव्यः । तद्व्यतिरेकेण कथाप्रवृत्त्यभावेनाभिलषितस्य तत्त्वनिर्णयादेरनिष्पत्तेः । तथा चावश्यकल्प्यमाननियतपूर्ववर्तिनः समयबन्धादेव कथाप्रवृत्तिरूपकार्यसम्भवे तत्सहभूतस्य प्रमाणादिसत्ताभ्युपगमस्य न कथाप्रवृत्तिकारणत्वं समयबन्धेनान्यथासिद्धत्वात् । अथापि तस्य कारणत्वकल्पने कल्पनागौरवमिति भावः ॥ **तस्येति** ॥ अयं प्रामाणिकलोकव्यवहार इत्यर्थः ॥ **शरीरेति** ॥ अहं स्थूलोऽहं कृश इत्यादिव्यवहारस्तावदस्ति । देहधर्माणां स्थूलत्वादीनामात्मनि व्यवहारश्च देहात्मनोरभेदं विना न सम्भवतीति देहात्मत्वमपि स्वीकार्यं स्यादित्यर्थः । तत् देहात्मत्वादि । **अन्यथा त्विति** ॥ यदि विचाराबाध्या भविष्यतीत्यर्थः ॥ **इतीति** ॥ विचाराबाध्यत्वस्यैवाभ्युपगम्यतायां तन्त्रत्वादित्यर्थः ॥

कारणत्वमित्याशयेनाह ॥ **यादृश इति** ॥ प्रमाणादिसत्तामभ्युपगम्य भवता यादृशो व्यवहारनियम इत्यन्वयः ॥ **यादृश इति** ॥ प्रमाणेन तर्केण च व्यवहर्तव्यमित्यादिरूपः । प्रमाणादिसत्तामभ्युपगम्यैवं व्यवहारनियमे कृते सद्भिरेव प्रमाणैर्व्यवहर्तव्यमित्येवं नियमो भवताऽवलम्बित आश्रित इत्यर्थः । **तस्यैव** नियमस्य ॥ **तदा त्वां प्रतीति** ॥ न च मम कथातः पूर्वं प्रमाणादिसत्ताऽभ्युपगन्तृत्वमस्तीति न फलातिप्रसङ्गो मत्पक्ष इति वाच्यम् ॥ उक्तरीत्याऽन्यथासिध्याऽङ्गीकृतस्याप्यङ्गीकृतप्रायत्वादित्याशयात् ॥

च०---प्रमाणादीनामेव कथौपयिकतोपेयते न तत्सत्यतोरीकृतेरिति कथायां प्रमाणादीनामसत्तामूरीकुर्वाणा अपि यदाधिऽक्रियन्ते तदा किमुतानिर्वचनीयतामुपगच्छन्त इत्यभिसन्दधतः खण्डनकारस्य दूषणाभासान्प्रत्याचिख्यासुरनुवदति । **यदत्रोक्तमित्यादिना** ॥ नवादितेत्यनुपपन्नमितीत्यन्तेन । कस्य हेतोः कस्माद्धेतोः। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति कात्यायनस्मृतेः । सत्तायां जातिनिरूपिताऽविनाभावबलेन यथा तदनुमापकता तद्वत्कथकवाग्व्यवहारस्य प्रमाणादिसत्तोपगतिनिरूपितव्याप्यतापन्नतया तदनुमापकतेति, धूमं प्रति वन्हेर्हेतुत्वात् तस्य तदनुमापकतेव प्रकृतेऽपि तं प्रति तस्या हेतुत्वात्तस्य तदनुमापकतेति, यथा स्तंभादिकं लौकिकव्यवहारविषयीभूतमुपगन्तव्यं तथा प्रमाणादिसत्ताऽपीति, वादजल्पकथाफलीभूततत्वनिर्णयविजयौ प्रति प्रमाणादिसत्तोपगतेर्हेतुतया द्वैतवादिधर्मिकतत्सत्तानभ्युपगन्तृत्वापादककताद्दशफलवैधुर्यापाद्यकापत्तेस्तत्सत्तोपगन्तव्येति च कल्पचतुष्टयीं प्रतिसंधत्ते ॥ **किमित्यादिनाऽतिप्रसंजकत्वादित्यन्तेन** । हेतूकृतकार्यस्यापि स्वकारणीभूतसाध्यनिरूपितव्याप्तिबलेनैव तदनुमापकतया आद्यकल्पात् द्वितीयस्य भेदो दुर्वच इति तु न शङ्कनीयं । 'स्वभावानुपलब्धिकार्यलिङ्गकमनुमानं त्रिविधमि'ति पराभ्युपगतिमात्रेण विकल्पनात् । 'लोकावगतसामर्थ्यः शब्दो वेदेऽपि वोधक' इत्यादौ लोकशब्दस्य तदीयव्यवहारपरतादर्शनेन लोकसिद्धत्वादित्यस्य ताद्दशव्यवहारविषयत्वादित्यर्थः । **अतिप्रसंजकत्वात्** । प्रमाणादिसत्तामनुपेत्यापि व्यवहार उन्मत्तादेरपि ताद्दशफलद्वयशालिता स्यादिति प्रसङ्गहेतुत्वात् । आद्येऽपि व्यवहारत्वावच्छेदेन ताद्दशसाध्यनिरूपिता व्याप्तिरुत सिषाधयिषितार्थगोचरप्रतिपत्यौपयिकत्वतद्विपरीतार्थगोचरतज्जनकत्वरूपसाधनबाधनक्षमव्यवहारत्वावच्छेदेनेति कल्पद्वयमभिप्रेत्याह ॥ **आद्येऽपीत्यादिना** ॥ प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वतदभावकोटिकशङ्काऽस्कन्दितव्यवहारे व्यवहारत्वेन भट्टादिव्यवहारं निदर्शनीकृत्य तदुपगतिपूर्वकत्वसाधनेऽनैकान्त्यमभिधत्ते ॥**प्रथम इति**॥ यद्यपि माध्यमिकस्य विश्वालीकत्वोपगन्तृतया तन्मतदिशाऽनैकान्त्यस्य सूपपादत्वेऽपि चार्वाकस्य प्रत्यक्षप्रमाणसत्यतोरीकर्तृतया तद्दिशा तस्य दुरुपपादतैव। तथापि प्रमाणसामान्यसत्तोपगतिपूर्वकत्वं कतिपयतदुपगमपूर्वकत्वं वा सिषाधयिषितं। आद्ये चार्वाक-

दिशाऽन्त्ये माध्यमिकदिशेति ग्रन्थसङ्गमनात् । ननु व्यभिचारनिरूपकाधिकरणस्यैव दुर्मिलतयाऽनैकान्त्यस्य दुरुपपादतेत्यत आह ॥**तस्यैवेति**॥ त्वदीयनये तदभिहितयुक्तिप्रतिविधानानुपपत्तिरेव तादृशाधिकरणप्रमापिकेत्यर्थः ॥ **तस्यापि** ॥ चार्वाकमाध्यमिकादिव्यवहारस्यापि । **पक्षत्वे** । ऊरीकृते । तद्धर्मावच्छिन्नपक्षकतत्धर्मावच्छिन्नसाध्यकतन्निदर्शनकसाधनबाधनान्यतरक्षमव्यवहारत्वलिङ्गकानुमानं दर्शितसाध्यसाधनाभावयोश्चार्वाकादिव्यवहारेषु गृहीतव्याप्यव्यापकभावतया यद्ययमुक्तसाध्यव्यतिरेकवान् स्यात्तदा तद्व्यापकसाधनव्यतिरेकवान् स्यान्न च तादृशः अतो न साध्यव्यतिरेकवानित्यप्रयोजकताशङ्कानिरासकबाधकतर्कसचिवं द्वितीयकल्पीयमाशङ्क्यप्रतिविधत्ते ॥ **द्वितीय इति** ॥ यं प्रत्यनुमिमीते तन्मनदिशा बाध इति भावः । उभयसंप्रतिपन्नेन हेतुना तादृशे धर्मिणि सन्दिग्धं साध्यं साधनीयमिति परीक्षकाणां कुलधर्म इत्यन्यतरदिशाऽसिद्धिमभिधत्ते ॥**हेतुरिति**॥ **तव** तत्ववादिनः । किञ्च विशिष्टव्यवहारत्वेनोक्तसाध्यसाधनेऽप्रयोजकता । न च यद्ययं तत्सत्ताऽभ्युपगतिपूर्वको न स्यात्तदा तत्पूर्वकत्वाभावव्यापकविशिष्टव्यवहारत्वाभाववान् स्यान्न चायं तदभाववान् अतस्तत्सत्तोपगतिपूर्वक इति बाधकतर्कात्तन्निवृत्तिरिति वाच्यम् । तर्काङ्गान्वयव्याप्तावुपाधिमत्तया दूषितायां तदनवतारादित्यनुसंदधानस्तत्र व्यभिचारादिदोषदूषितत्वस्य, निग्रहस्थानयोगित्वस्य वोपाधितामाह ॥ **व्यतिरेके चेति** ॥ प्रकृतसाधनव्यतिरेकलक्षणापाद्य चेत्यर्थः । दर्शितोपाधेर्वाग्व्यवहारत्वरूपपक्षधर्मावच्छिन्नोक्तापाद्यव्यापकतया तादृशापादकवति माध्यमिकादिव्यवहारेऽसत्वेन तदव्यापकतया चोपाधितानिर्वाहात् तर्काङ्गव्याप्तिविरहेण तदनवतारादप्रयोजकमनुमानमिति भावः । स्फुटीकरिष्यति च सिद्धान्तेऽन्वय एवायमुपाधिरिति व्याकर्तारः । विशिष्टव्यवहारत्वस्यापि माध्यमिकव्यवहार एव व्यभिचारः । ननु माध्यमिकादिव्यवहारः, साधनबाधनक्षमो न भवति, प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वाभावाद्वन्ध्यापुरुषवाग्व्यवहारवदित्यनेन तत्र हेत्वभावसिद्धेर्न व्यभिचार इत्याशङ्कायामस्यानुमानस्य सोपाधिकत्वान्नोक्तहेत्वभावसाधकत्वमित्याशयेनाह ॥ **व्यतिरेकेति** ॥ साधनबाधनक्षमव्यवहारत्वरूपपूर्वहेतुव्यतिरेके माध्यमिकादिव्यवहारनिष्ठतया व्यभिचाराय साध्यतया विवक्षित इत्यर्थः । यद्वा व्यतिरेके पूर्वानुमानव्यतिरेकव्याप्तावित्यर्थ इति व्याकुर्वते । उपाधेस्तादृशापाद्यप्रयोजकतां व्यनक्ति ॥ **यत इति** ॥ मतान्तरानुसारिभिर्नैयायिकैः मतान्तरानुसारिभिरपरैर्मीमांसकैः । इत्थं च कथकयोर्नैयायिकमीमांसकयोः प्रमाणादिसत्तोरीकर्तृतया तदीयव्यवहारे तत्सत्तोपगतिपूर्वकताराहित्यरूपापादकविरहेऽपि दर्शितापाद्यस्योक्तोपाधिनिबन्धनस्य सत्वेनोपाधिरेवापाद्ये प्रयोजको नापादकमिति प्रकृतानुमानेऽप्रयोजकत्वानिरासकतर्काङ्गभूतव्याप्तिविरहनियमित्ततदनवतारेणाप्रयोजकमुक्तानुमानमिति भावः । ननु

तथा नापीति सङ्गच्छत इत्याशङ्कते । **नान्विति** ॥ ननु प्रमाणधर्मिकसत्ताप्रकारकोपगतिरिव तदसत्तापरक्तोपगतेरपि कथातः प्रागनुपगमेनानिर्वचनीयत्वाख्यविधान्तरोपगमेनैवोक्ताखिलनिर्वाहान्न क्षतिरित्याशयेन समाधत्ते ॥ **मैवमिति** ॥ उदासीनैस्तादृशोपगतिद्वयविनिर्मुक्तैः । इदं च कथाऽऽरभ्येति पूर्वेणान्वेति । तथा व्यवहारिभिः, प्रमाणानां सत्वासत्वेऽनुपेत्यैव व्यवहर्तव्यमिति समयं बध्नानैरस्माभिरपि । इतीति ब्रूम इत्यनेनान्वेति । यदीत्यादिग्रन्थेनाभिहितं दूषणं स्वव्याहतमित्यभिधित्समानः पीठिकामारचयन् परलपनेनैव भापयते । किंचेत्यादिकवाच्यमित्यन्तेन । **स्वस्यापीति** ॥ प्रसंजकस्य तदसत्तोररीकारस्य स्वसाधारण्यादिति भावः ॥ **तथैव कथान्तरेति** ॥ वादिप्रतिवाद्युभयत्वपर्याप्त्याधिकरणेन तत्सत्ताऽनङ्गीकृतावपि तदन्यतरमात्रेण तद्दूरीकृत्यैव निखिलकार्यनिर्वाहो यथा भवदुपगतस्तथा तत्सत्तायास्तद्दूरीकृत्यगोचरत्वेऽपि अन्यतरतद्दूरीकारगोचरतयैवाखिलकार्यनिर्वाहः संगच्छत इति भावः । **व्याघात इति** ॥ तत्सत्तोपगतिमन्तरेणापि कथाप्रवृत्तिमुपेत्येतरं प्रतितदनुपगमे तदनिष्पत्त्यापादने व्याहतिरित्यर्थः । कथकताऽऽपन्नप्रतिवादिबोधोद्देश्यिका नेयमुक्तिः किं तु तदनापन्नविनेयबोधोद्देश्यिकैवेति न क्षतिरित्याशङ्क्य प्रत्याख्याति ॥ **न चेति** ॥ **कथं च तथेति** ॥ विनेयादिबोधनं कया विधया स्यादित्यर्थः । तस्य चार्वाकादेः तद्बोधेति। विनेयस्येति पूरणीयं । कथायां प्रविष्टं चार्वाकं प्रति नेदं सुवचं । कया विधयेयं कथा प्रावर्तिष्टेति विकल्पानामुत्थितेः । तदप्रविष्टं प्रति तु तद्दुर्वचमिति विनेयेनापि सुवचत्वान्न तेनापि सुबोधमेतदिति भावः । तत्र बीजमाह ॥ **कथायामेवेति** ॥ निग्रहलक्षणस्य कथाघटितत्वादिति भावः । कथकप्रवर्तनीयवाग्व्यवहारं प्रति हेतुत्वादिति द्वितीयकल्पं प्रत्याचष्टे ॥ **न द्वितीय इति** ॥ प्रमाणवृत्तिवाग्व्यवहारनिरूपितहेतुतायां विशेष्यताप्रत्यासत्या सत्ताप्रकारकोपगतेरवच्छेदकतायां माध्यमिकादिव्यवहारस्य तदवच्छिन्नाव्यतिरेकनियन्त्रितानुत्पादप्रसङ्गेनायोगादिति भावः । अथ प्रमाणादीनां कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणवृत्तित्वघटितवाग्व्यवहारनिरूपितकारणाभ्युपगम एव तत्सत्तोपगम इति, तत्कारणतोपेयते न तु तत्सत्तेति रिक्तं वच इत्याशङ्कते ॥ **अथेति** ॥ कारणत्वं पदार्थान्तरं न सत्ताघटितमिति प्रतिसन्दधानः । प्रमाणादीनि धर्मीकृत्य हेतुत्वेन सत्वं ब्रह्मवत्सत्त्वेनाभ्युपगतिविषयत्वं च तत्कस्यां कथायां सिषाधयिषितमुक्तभङ्ग्या प्रमाणादिसत्तोपगत्या प्रवृत्तायां कथायां, तदनुपगमेन समयबन्धादिनैव वेति कल्पद्वयीघटकाद्यकल्पस्यान्योन्याश्रयेण प्रत्याख्याततां मन्वानः कल्पान्तरं प्रत्यस्यति ॥ **कयाऽपीति** ॥ अनुपदमभिधास्यमानयेत्यर्थः । नियमस्थित्या समयबन्धेन । समयबन्धस्यान्वयव्यतिरेकितामुपपादयति ॥ **तत्रेत्यादि** ॥ तत्सत्तोपगतेस्तद्राहित्यं दर्शयति ॥ **तादृशेति** ॥ लोकसिद्धत्वात्सोपेयेति तृतीयमपाकुरुते ॥ **नापीति** ॥ प्रमाणव्यवहारः प्रेक्षावद्व्यवहारः । पामराः शास्त्रसंस्काररहिताः । तस्य प्रेक्षावद्व्यवहारस्तस्य । तदर्थमेव विचारार्थमेव । पूर्वनियमस्य प्रमाणादिसत्ताऽभ्युपगमनियमस्य ।

सिद्धतत्सत्तोपगतिनियन्त्रितेत्यन्योन्याश्रय इति भावः ॥ **शरीरेति** ॥ गौरोहमित्यादिप्रतीत्या शरीर एवात्मत्वव्यवहारादित्यर्थः । पश्चात् शास्त्रजनितदेहात्मविवेकोत्तरम् । तद्देहात्मत्वम् ॥ **नाभ्युपेयत इति** ॥ विचाराबाध्यलोकव्यवहारसिद्धत्वस्यैवोपगन्तव्यतानिमित्तत्वादिति भावः । विचाराबाध्यत्वरूप-विशेषणांशस्यैवोपगन्तव्यताहेतुत्वसंभवेन तद्विशेषितव्यवहारसिद्धत्वस्य तत्तन्त्रतोरीकृतिर्निर्बीजेत्याह ॥ **तर्हीत्यादि** ॥ प्रमाणादिसत्तायां विचाराबाध्यत्वं च तत्प्रवृत्तिमन्तरेण दुष्प्रतिपादमिति भावः । तदनु-पगमस्य तत्त्वनिर्णयविजयातिप्रसञ्जकत्वादिति तुरीयकल्पं न्यक्करोति ॥ **न चतुर्थ इति** ॥ तथाचावश्यो-पेतव्यसमयबन्धादेव फलोत्पत्तिसंभवेन तत्सहभूततत्सत्तोपगनेरन्यथासिद्धत्वमित्यर्थः । आक्षेपांशं निगम-यति ॥ **तस्मादिति** ॥ प्रमाणादीनि न स्युरिति । प्रमाणधर्मिकसत्ताऽऽश्रयत्वाभावापादकसाधकत्वा-भावापाद्यकापत्तेरभिप्रेतत्वादिति भावः ।

सु० — तदेतत्सर्वमनेनापहसितं वेदितव्यम् । तथा हि । यत्तावद्व्यवहारमात्रस्य प्रमा-णादिसत्ताऽभ्युपगमव्याप्तत्वपक्षे दूषणमुक्तम् । तदसत् । यदि खल्वेवमस्माभिः साध्येत । मायावादी प्रमाणादिसत्ताऽभ्युपगमवान् । व्यवहर्तृत्वात् । तद्व्यवहारो वा प्रमाणादिसत्ता-ऽभ्युपगमपुरःसरो व्यवहारत्वात्तत्त्ववादिवत्तद्व्यवहारवच्चेति । यद्वा नायं व्यवहर्ता प्रमाणादि-सत्ताऽनभ्युपगन्तृत्वात् । तद्व्यवहारो वा न व्यवहारः । प्रमाणादिसत्ताऽभ्युपगमपुरःसरता-शून्यत्वादिति । तदा स्यादेव व्यभिचारदोषः । को नाम स्वस्थात्मैवमनुमिमीते । किं नाम यदि प्रमाणादीनि सन्ति न स्युः । तर्हि साधकानि न स्युः । असतः साधकत्वानुपपत्तेः । तेषां चासाधकत्वे तत्कार्यो व्यवहारो न निष्पद्येत । तथा च वादिता न स्यात् । अस्ति चेयम् । तस्मात्तद्धेतूनां प्रमाणादीनां सत्ताऽभ्युपगन्तव्येत्याचार्येण प्रसङ्गत्वेनाभिमतत्वात् । व्यभिचार-स्थलस्य च प्रसङ्गविषयतुल्यताऽङ्गीकृता । बाधस्तु प्रसङ्गस्यालङ्कार एवेत्युक्तम् । साधन-बाधनक्षमव्यवहारस्य प्रमाणादिसत्ताऽभ्युपगमव्याप्तत्वपक्षेऽप्युक्तदूषणमनेनैव निरस्तम् । माया-वादिनं तद्व्यवहारं वा पक्षीकृत्य विशिष्टव्यवहारकर्तृत्वेन विशिष्टव्यवहारत्वेन वा हेतुना प्रमाणादिसत्ताऽभ्युपगन्तृत्वे तत्पूर्वकत्वे वा साध्यमाने तत्स्यात् । विमतो व्यवहारो न साधनादिक्षमः । प्रमाणादिसत्ताऽभ्युपगमपूर्वकतारहितत्वादिति वा साधने कथञ्चिदन्वये पूर्वोक्तोपाधिः स्यात् । न चैवमित्युक्तम् । किञ्चायमुपाधिर्न साधनाद्भिद्यते । यदा हि प्रमाणादिसत्ता नाभ्युपगता तदा तदसत्त्वमेवाङ्गीकृतमिति स्वरूपासिद्धत्वम् । तच्च सद्वचना-

भासलक्षणविशेष एव । नन्वेतदाशङ्क्योक्तं न ब्रूमो वदामेत्यादि दुरुक्तं तत् । सत्त्वासत्त्व विहाय प्रमाणस्वरूपस्य बुद्धावारोपयितुमशक्यत्वेनोदासीनस्य तत्स्वीकारानुपपत्तेः । एवं च वदता यदनिर्वचनीयमभिप्रेतं तदग्रे निराकरिष्यते । यदप्यत्रोक्तं कीदृशीं मर्यादामित्यादि । तत्र यः प्रमाणाद्यसत्त्वमभ्युपैति । यश्च तत्सत्तां प्रतीत्यापि सत्ताऽऽद्युदासीनोऽहमिति मन्यते तं प्रतीदं दूषणमिति वदामः । न चोक्तदोषः । न हि वयं प्रमाणादिसत्ताऽभ्युपगमं कथाप्रवृत्तिकारणतयाऽवश्यं ततः पूर्वभाविनं ब्रूमः । किं नाम यो यथाकथञ्चित्कथायां प्रवृत्तस्तं विपक्षे कथाऽनुत्पत्तिप्रसङ्गं दण्डं प्रदर्श्य तत्कारणानां प्रमाणादीनां सत्तामङ्गीकारयामः । न चैवं कथान्तरप्रसक्त्यादिदोषः । प्रमाणादिसत्ताऽनभ्युपगमे कथाया एवानिष्पत्तेः । एतेन शिष्यज्ञापनमपि समाहितम् । प्रतिवादिनः कथाप्रवेशमभ्युपगम्य तत्र प्रवृत्तं प्रति प्रमितकथाकार्यबलेन कारणप्रमाणादिसत्ताया अभ्युपगन्तव्यत्वस्योक्तत्वात् । द्वितीयपक्षोक्तदोषोऽप्यसङ्गत एव । न हि वयं प्रमाणादिसत्ताऽभ्युपगममपि कथकप्रवर्तनीयवाग्व्यवहारकारणकोटौ निवेशयामः । येन तत्सत्ताऽनभ्युपगन्तॄणां वाग्व्यवहारस्वरूपं न निष्पद्येतेति प्रसङ्गः स्यात् । अपि तर्हि प्रमाणादीनामेव कथाकारणता । सा च सत्त्वाभावे नोपपद्यत इति तत्सत्त्वमङ्गीकरणीयमिति वदामः । यत्पुनः कथकवाग्व्यवहारं प्रतीत्याद्याशङ्क्योक्तम् । 'एवं वदता कथाप्रवृत्त्युत्तरकालं प्रमाणादिसत्ताऽङ्गीकारयितव्या । तथाच कथाफलस्य प्रमाणादिसत्ताऽभ्युपगमस्य न कथाकारणत्वम् । किन्तु प्रमाणैर्व्यवहर्तव्यमित्यादिव्यवहारनियमस्यैवेति । तदस्माभिरभ्युपगतमेव । यस्तु सत्ताऽभ्युपगममपि कथाकारणं ब्रूते । स एवैवं पर्यनुयोज्यः । यत्पुनर्न च प्रमाणादीनामित्यादिना कल्पनागौरवमवादि । तत्र किं प्रमाणादिसत्ताऽभ्युपगमे कल्पनागौरवमुत तत्सत्ताऽभ्युपगमस्य कारणकोटिप्रवेशने । नाद्यः । कारणत्वान्यथाऽनुपपत्त्या तत्सत्तायाः प्रमितत्वात् । प्रमितस्य परीक्षकैरङ्गीकरणीयत्वात् । द्वितीये तु संवाद एव । तृतीयेऽप्याद्यं तावदङ्गीकुर्मः । तत्रोक्तं दूषितप्रायम् । द्वितीयाङ्गीकारेऽपि न दोषः । देहात्मत्वादिकं तु पश्चाद्विचारबाध्यतया नाभ्युपगम्यत इति । यदत्रोक्तं प्रमाणादिसत्ताऽपीत्यादि । तेन किमुक्तं भवति । किं विचारसाध्यः प्रमाणादिसत्ताऽभ्युपगमो न विचारप्रवृत्तेः कारणमिति । किंवा विचारबाध्यताया एव प्रमाणादिसत्ताऽभ्युपगमप्रयोजकत्वेन व्यवहारस्याप्रयोजकत्वमिति । आद्ये संप्रतिपत्तिः । न द्वितीयः । औत्सर्गिकं प्रामाण्यं बाधकादपोद्यत इत्यत्रदर्शने तस्यैव प्रयोजकत्वात् । चतुर्थपक्षोक्तदोषोऽप्यनेनैव परिहृतः । न हि वयं प्रमाणादिसत्ताऽभ्युपगमं कथाफलनिष्पत्तिहेतुं ब्रूमः । किन्तु प्रमाणादीन्येव । तेषां च

क्रियासमयबन्धेन कथां प्रवर्तयताऽपि व्यवहारसत्ताऽभ्युपगन्तव्या। न हि सत्तामनभ्युपगम्य व्यवहारक्रियाऽभिधातुं शक्या। क्रिया हि निष्पादना। असतः सद्रूपताप्रापणमिति यावत्। प्रमाणैर्व्यवहर्तव्यमिति च नियमबन्धनं प्रमाणकरणभावस्य नियमान्तर्भावान्नियतपूर्वसत्त्वरूपं कारणत्वं प्रमाणानामनादाय न पर्यवस्यति। दूषणानां चास्तित्वेन भङ्गावधारणनियमबन्धने साधनाङ्गानां च व्याप्त्यादीनां सत्त्वेन तद्विपयस्य तत्त्वरूपताव्यवहारनियमनादौ च कण्ठोक्त्यैव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते। प्रमाणादीनां सत्तामनभ्युपगम्य कथाऽऽरम्भः शक्यत इत्येवमाशङ्क्य यदुक्तमेतैरपि बाधकैः कथायामारब्धायामभिमतस्य प्रसाधनीयत्वेन पूर्वोक्तबाधाया न निस्तारः स्यादिति। तदप्यनेनैव परिहृतम्। कथास्वरूपफलनिष्पत्तये स्वेच्छास्वीकृतस्यैव व्यवहारनियमस्य प्रमाणादिसत्तास्वीकार एव पर्यवसानमिति कथायां प्रवृत्तं स्वव्याघातमप्यचेतयन्तं प्रत्यस्माभिरुच्यमानत्वात्। ननु कथादेः कार्यस्य सत्त्वे कथञ्चि-त्कारणस्य प्रमाणादेः सत्त्वमङ्गीकरणीयं स्यात्। कार्यस्यैव सत्त्वाभावे किं कारणसत्तयेति चेत्। कुतः प्रमाणात्कथादिसत्ताऽभावो भवता निश्चितः। श्रुत्यादेरिति चेन्न। तस्यैवानेकातिप्रसङ्ग-गहननिविष्टत्वात्। तथाच सिद्धे तत्प्रामाण्ये कथादिकार्यसत्त्वसिद्धिः। ततोऽन्यथासिद्ध्या तर्कस्याभासतासिद्धिस्तस्यां च श्रुत्यादिप्रामाण्यसिद्धिरिति चक्रकापत्त्या नैकस्यापि सिद्धिः। असतः कारणत्वं तु सूत्रकृतैव निराकरिष्यत इत्यलं प्रसङ्गेन।

वा०—अनङ्गीकुर्वतामिति वाक्यापातप्रतीतार्थे परोक्तानुपपत्तेस्तस्माद्व्यवहृतिरित्युत्तरवाक्ये प्रसङ्ग-त्वज्ञापनेन, यौगिकव्यवहृतिशब्दप्रयोगेण प्रमाणादीनां कथाव्यवहारकारणत्वज्ञापनेन च परिहृतत्वान्ना-नुपपत्तिरित्याह ॥ **तदेतदिति** ॥ अनङ्गीकुर्वतामिति व्यतिरेकव्याप्तिप्रदर्शनपरम्। तत्रापि धर्मिधर्म-प्राधान्यविवक्षा च। तथा च विवक्षाभेदेन फलितमनुमानप्रकारद्वयमाह ॥ **मायावादीति** ॥ यदि-त्येतस्मिन्वाक्येऽनङ्गीकुर्वतां न वादितेत्येव हेतुसाध्यकथनं पूर्ववदुभयविवक्षा च तदपि विवक्षाभेदेन फलिततत्प्रकारमाह ॥ **यदिति** ॥ व्यभिचारादीत्यादिपदेन बाधसङ्ग्रहः ॥ **कोनामेति** ॥ अभि-प्रायान्तरकल्पनया दूषणानि वदतः परस्यैव छलप्रसङ्ग इति सूचयति। प्रमाणादीनि न स्युर्नाङ्गीक्रियन्त इत्यनङ्गीकुर्वतामित्यस्यार्थकथनम्। उत्तरवाक्ये व्यवहृतिरिति प्रमाणानां व्यवहारकारणत्वोक्त्या लब्धस्य पूर्वमाहत्योक्तस्यापाद्यस्य कथनं तर्हीति। मिथ्यायाः साधकत्वं चेत्युक्तोपपादनप्रकारस्मारणमसत इति व्यवहृतिरित्येतल्लब्धस्यैव कथनं तेषां चेति। तथा चेति पूर्ववाक्योक्तार्थकथनम्। नन्वत्रापादनद्वयेऽपि

यदसत्तन्न साधकं, यत्र साधकाभावस्तत्र कार्याभाव इति वा यस्य प्रमाणाद्यसत्त्वाङ्गीकारस्तेन तत्साधकत्वाभावस्याङ्गीकर्तव्यता, यस्य साधकत्वाभावाङ्गीकारस्तेन तत्कार्याभावस्याङ्गीकर्तव्यतेति वा व्याप्तेर्वक्तव्यत्वात्प्रथमकल्पद्वये बौद्धादिरीत्या व्यभिचाराद्द्वितीयद्वये च बौद्धादावेव व्यभिचारात्प्रसङ्गे च पक्षाद्यभावेन पक्षतुल्यतया च तदपरिहारान्नैतदापादनं सम्भवतीत्यतोऽनङ्गीकुर्वतामिति बहुवचनलब्धं व्यभिचारस्थलस्य प्रसङ्गविपर्ययतुल्यत्वमुत्तरवाक्यसूचितप्रसङ्गत्वलब्धं पूर्वोपपादितम् बाधासम्भवं च स्मारयति ॥ **व्यभिचारेति** ॥ एवं च तदनेनापहसितमित्यत्रानेनेति न केवलमुत्तरवाक्यपरामर्शः, किन्तु पूर्ववाक्यस्थबहुवचनस्य, मिथ्यायाः साधकत्वं चेत्यादेरपीति द्रष्टव्यम् ॥ **उक्तदूषणमिति** ॥ बाधासिद्ध्युपाधिलक्षणमित्यर्थः । वादिशब्दस्य विशिष्टव्यवहर्तृपरतामभ्युपगम्योक्तरीत्याऽनङ्गीकुर्वतामिति वाक्यस्य व्यतिरेकव्याप्तिकथनेन, साक्षात्साध्यसाधनकथनेन वाऽनुमानपरतां विवक्षाभेदं चाश्रित्यानुमानप्रकारमाह ॥ **मायेति** ॥ **न चैवमित्युक्तमिति** ॥ आचार्यस्यात्र साधनस्यानभिमततया प्रसङ्गस्यैवाभिमतत्वात् । प्रसङ्गे च बाधासिद्ध्युपाधीनामसम्भवादिति भावः । ननु बाधासिद्ध्योस्तत्रालङ्कारत्वेऽपि कथमुपाधेरसम्भव इति चेन्न । प्रसङ्गविषयादन्यत्रोपाधिना व्यभिचारोन्नयने स्फुटव्यभिचारेणोपाधिवैयर्थ्यापातात् । उपाधिना प्रसङ्गविषये तदुन्नयनस्य च पक्षादिप्रविभागानन्तरमनुमानस्थल इवानुपपत्त्याऽऽपाद्यस्याप्रामाणिकत्वेन तदभावसाधनरूपप्रतिपक्षस्य च बाधवदलङ्कारतया प्रतिपक्षोन्नायकत्वस्याप्यसम्भवेनापादने तदसम्भवात् । न चापादनमूलभूतव्याप्तिग्रहणदशायामुपस्थितस्याव्याप्त्युन्नायकत्वेन दूषणत्वं सम्भवत्येवेति वाच्यम् । उक्तापादनमूलभूतायां, यदसन्न तत्साधकं, यत्र कारणाभावस्तत्र कार्याभाव इति वा यत्रोक्तोभयाङ्गीकारस्तत्रोक्तोभयोरङ्गीकर्तव्यतेति वा व्याप्तौ तदुक्तोपाधेरप्रसरात् । ननूक्तरूपायामपि व्याप्तौ, नासत्त्वं साधकत्वाभावे प्रयोजकं, किन्त्वाभासलक्षणयोगित्वमेव । एवं, न कारणाभावः कार्याभावे प्रयोजकः, किन्त्वभासलक्षणयोगित्वमेवेति वक्तुं शक्यत एवेति चेन्न । तर्हि वन्ध्यासुतवचसोऽप्यसाधकत्वायाभासलक्षणमेव व्युत्पादनीयं स्यात् । न च वन्ध्यासुतवचसोऽप्यसिद्धिरूपाभासलक्षणमेवासाधकत्वे तन्त्रमिति वाच्यम् । तत्रासत्त्वस्यैवासिद्धिरूपाभासलक्षणप्रयोजकतया प्रकृतेऽप्यसत्त्वादेव तदापत्त्याऽसत्त्वं न तन्त्रमिति वचनस्य रिक्ततापत्तेः । अकारणकार्योत्पत्तौ च व्याघातस्य कारणाभावे कार्याभावस्य मूलभूतत्वादिति सूचितत्वाच्चेत्याशयः । अत एवात्रापाद्यापादकस्वरूपस्य निष्कृष्य कथनं तदुपपादकप्रकारस्मरणं चेति ध्येयम् । एवं च प्रकृते आपादनमूलभूतव्याप्तावप्युपाध्यसम्भवो न तु सर्वत्रेत्येवाभिमतम् । अन्यथा सत्त्वाभावे साधकत्वं न स्यादिति वा प्रसङ्ग ब्रूमः । तत्रासत्त्वमुपाधिरिति चेदित्यत्रसन्धविरोधापत्तेः । न्यायसाम्येन प्रसङ्गमूलभूतव्याप्तावपि तस्यावर्जनीयत्वाच्चेति

मुपाधिः सम्भवतीत्यभ्युच्चयेन परिहारान्तरमाह ॥ **किञ्चेति** ॥ अथवा साधनवदापादनं तन्मूलभूताया व्याप्तौ वाऽस्योपाधित्वशङ्कानिरासाय किमायासान्तरेण साधनेऽप्यस्योपाधित्वं न सम्भवतीत्याह ॥ **किञ्चेति** ॥ **न साधनाद्भिद्यत इति** ॥ साधनव्यापक इत्यर्थः । वक्रोक्तेः प्रयोजनं तु साधनमुपाधिं विनाऽनुपपन्नं पक्षे स्वयं सदुपाधिमप्याक्षिपतीति नोपाधेः पक्षे साधनाय यत्नान्तरं कर्तव्यमिति सूचनम् । साधनबलादेव पक्षे तत्सिद्धिमुपपादयति ॥ **यदाहीति** ॥ यद्वा प्रमाणादिसत्ताऽभ्युपगमपूर्वकताराहित्यस्य साधनतया निर्दिष्टस्यापि तृतीयप्रकाराभावेनासत्त्वाभ्युपगम एव पर्यवसानात्पर्यवसितसाधनस्योपाधिघटितशरीरतया नोपाधिः साधनाद्भिद्यत इत्युक्तम् । एवं च नोपाधिः साधनाद्भिद्यते साधनशरीराप्रविष्टो न भवतीत्यर्थः । प्रकृतसाधनस्य तत्र पर्यवसानमुपपादयति ॥ **यदा हीति** ॥ यद्वा व्यवहारस्य साधनाक्षमत्वेऽसत्त्वाभ्युपगमपूर्वकत्वमेव हेतुः । तच्चोपाधिघटितशरीरमेवेत्याशयेन न साधनाद्भिद्यत इत्युक्तम् । न च हेत्वसिद्धिः । सत्ताऽनभ्युपगमेन तत्साधनादित्याशयेनाह ॥ **यदा हीति** ॥ ननु सत्त्ववदसत्त्वस्याप्यनङ्गीकारादसत्त्वाभ्युपगमस्य न प्रकृतसाधनव्यापकत्वं तत्पर्यवसानविषयत्वं वा स्वयमेव हेतुत्वं वेत्याशयेनाशङ्कते ॥ **नन्विति** ॥ उभयानङ्गीकारे तृतीयप्रकाराभावेन कथायां प्रमाणादिस्वीकार एवानुपपन्न इत्याशयेनाह ॥ **दुरुक्तमिति** ॥ ननु सत्त्वासत्त्वोभयानभ्युपगमेऽपि सदसद्वैलक्षण्यरूपतृतीयप्रकारेण प्रमाणादिस्वरूपस्य बुद्ध्यारोहेण स्वीकारोपपत्तेर्नानुपपत्तिरित्यत आह ॥ **एवं चेति** ॥ एवं प्रसङ्गत्वकथनेन भाष्यसूचितं परोक्तदूषणानां परिहारमभिधाय व्यवहृतिरिति प्रमाणानां कारणत्वोक्त्या, सत्ताऽभ्युपगमस्य कारणत्वाभावसूचनेन लब्धं परोक्तदूषणानां परिहारमुपपादयति ॥ **यदपीति** ॥ प्रथमद्वितीयपक्षयोरनङ्गीकारपराहतिं सूचयन्पर्यनुयोगविषयं तावद्दर्शयति ॥ **तत्रेति** । तत्रासत्त्वमुपैति तं प्रतीति प्रथमद्वितीयानङ्गीकारस्य सूचनं । यः प्रमाणादीति असत्त्वाभ्युपगन्तुर्यश्चेति च तस्मादिति परपरिशेषितस्योदासीनस्य च पर्यनुयोगविषयत्वं च सूचयति । नन्वेवं प्रथमद्वितीयोक्तदोषाभावेऽपि तृतीयपक्षोक्ततथैवकथान्तरप्रसक्तिदोषस्तस्मादिति परिशेषितपक्षोक्तव्याघातश्च स्यादेवेत्याशङ्क्य निषेधति ॥ **न चेति** ॥ यद्येतद्दूषणाभिधानेन कथाप्रवृत्तेः प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वं साधयितुमस्माकमयं प्रयत्नः स्यात्तर्ह्यस्याः कथायाः असत्त्वाभ्युपगमेऽपि प्रवृत्तत्वादेव तद्वत्कथान्तरप्रवृत्तेरपि सम्भवात्कथाप्रवृत्तेर्न प्रमाणादिसत्ताऽभ्युपगमपूर्वकत्वं सुसाधम् । औदासीन्येन प्रवृत्तायां कथायां सत्ताऽनभ्युपगमे कथाऽप्रवृत्तिप्रतिपादने व्याघातश्च स्यात् । न चैवमिति भावेनाह ॥ **नहीति** ॥ तर्हि साधनीयान्तराभावाद्विवादः पर्यवसन्नः किमित्याशङ्कते ॥ **किं नामेति** ॥ **यथाकथञ्चिदिति** ॥ असत्त्वमभ्युपेत्य वौदासीन्येन वेत्यर्थः । कथेत्यतःपूर्वं प्रारब्धेति शेषः । एवं च कथाप्रवृत्तेः सत्ताऽभ्युपगमपूर्वकत्वस्य साधयितुमशक्यत्वेऽपि प्रमाणादीनां कथाप्रवृत्तिकारणत्वात्तेषाम

सत्त्वे कार्यभूतप्रमितप्रारब्धकथानुत्पत्तिबाधकेन कथाकारणीभूतप्रमाणादिसत्त्वस्यासत्त्वाभ्युपगमेन वौदासीन्येन वा प्रवृत्तकथायामभ्युपगमनीयत्वप्रतिपादने कथान्तरप्रसक्तिव्याघातयोः प्रसक्तिरेव नास्तीत्याह ॥ **न चैवमिति** ॥ **एवं वदतेति** ॥ हेतुत्वेन सत्त्वाभ्युपगमानुमानपक्षे परोक्त्या मुख्यतः प्रतीयमानान्योन्याश्रयप्रयोजकानुवादोऽयं; तदभिप्रेतो हेतुत्वस्य सत्त्वरूपत्वाभावपक्षस्त्वसतः कारणत्वं त्वित्यादिना खण्डनमतनिरासान्ते निरसिष्यत इति द्रष्टव्यम् । यद्यपि पूर्वोत्तरवाक्यबलान्न च प्रमाणादीनामित्येतद्वाक्यं सत्ताऽभ्युपगमस्य कारणत्वे गौरवमित्येतत्परमेव भाति तथाऽप्यस्य वाक्यस्य सामान्येन प्रवृत्तत्वाद्विकल्प्य दूषयति ॥ **तत्र किमिति** ॥ **तत्रोक्तमिति** ॥ व्यवहारप्रामाणिकत्व-विचारस्य प्रमाणादिसत्ताऽभ्युपगमानधीनत्वेनोक्तचक्रकाप्रवृत्तिरिति भावः । उक्तरीत्या चक्रकपरिहार-लाभेऽपि चक्रकं नेत्येवंरूपेण प्रायशब्दः ॥ **तेन किमिति** ॥ यद्यपि लोकव्यवहारसिद्धत्वादिति तावन्न भवतीत्युत्तरवाक्यबलादप्रयोजकत्वे तात्पर्यमेव प्रतिभाति । तथाऽपि पूर्ववाक्ये विचारबाध्यत्वा-बाध्यत्वयोरनभ्युपगमाभ्युपगमोक्तेरभ्युपगमस्य विचारसाध्यत्वेऽपि पर्यवसानसम्भवादुत्तरवाक्यस्य च 'तथा चान्योन्याश्रयतया नायं पक्षः साधुरिति तृतीयपक्षनिरासोपसंहारपरत्वस्यापि सम्भवात्प्रथमकल्पप्रसक्तिः' । उत्तरवाक्योक्ताप्रयोजकत्वोपपादकत्वेनापि पूर्ववाक्यस्योपपत्तेरुत्तरवाक्यस्वारस्यानुरोधेन पराभिमतत्वाच्च द्वितीयकल्पप्रवृत्तिरिति द्रष्टव्यम् ॥ **इत्यत्र दर्शन इति** ॥ अन्यथा स्वतस्त्वभङ्गेनापसिद्धान्तापातादिति भावः ॥ **अनेनैवेति** ॥ तत्सत्ताऽभ्युपगमस्य कथाव्यवहारकारणत्वमनभ्युपगम्य प्रमाणादीनामेव तत्कारणत्वाभ्युपगमेनैवेत्यर्थः । व्याघातरूपं सत्ताऽनभ्युपगमे स्वोक्तिलब्धं बाधकमाशङ्क्य परेणोक्तं दूषणमपि पूर्वोक्तन्यायेनैव परिहृतमिति वक्तुं परोक्तमनुवदति ॥ **स्यादेतदिति** ॥ नियतत्वं समय-विशेषणम् । नियमबन्ध एव पर्यवसानवृत्त्या व्यवहारसत्तां स्वीकारयतीति भावः । ननु सत्तां विनाऽनुपपत्तिशून्यस्य कथं तत्स्वीकारहेतुत्वमित्यत आह ॥ **न हीति** ॥ किमियं राज्ञामाज्ञा नेत्याह ॥ **क्रियेति** ॥ एवमपि नानुपपत्तिलाभ इत्यत आह ॥ **असत इति** ॥ अनेन समयेन व्यवहर्तव्यमिति व्यवहारो निष्पादनीय इत्युक्त्यैव सत्त्वमिष्टं स्यात् । यतो निष्पादनं नामासतः सत्त्वप्रापणमित्यर्थः । न केवलं व्यवहारसत्त्वं स्वोक्त्यैवेष्टं प्रमाणादिसत्त्वमपि तदुक्तिबलादेवापद्यत इत्याह ॥ **प्रमाणैरिति** । तृतीयया करणत्वाभिधानात्तस्य च सत्ताऽव्यतिरेकात्प्रमाणादीनां सत्त्वमनङ्गीकृत्य नियमबन्धो न पर्यवस्यतीत्यर्थः । यद्वादिव्यवहारे दोषाः सन्ति तस्य भङ्गो व्यवहर्तव्यो यस्य पुनः साधनाङ्गानि तस्य जय इति वदन्नेव पुनस्तानि न सन्तीति च वदन्कथं सभ्यः स्यादित्याह ॥ **दूषणानां चेति** ॥ साधन हेतुस्तद्विषयस्य प्रतिज्ञातार्थस्य । तद्वैपरीत्येनासत्यत्वमादिपदार्थः । रिक्तं परस्परा हतत्वेन शून्यं वचनमित्यर्थः । कथायामेवैतद्बाधकोपन्यासेन सत्ताऽभ्युपगमः साधनीयस्तदभ्युपगममन्त

रेण च न कथाप्रवृत्तिः । तथा च सत्ताऽभ्युपगमसिद्धौ च बाधकोपन्यासस्ततश्च सत्ताऽभ्युपगम इति चक्रकमित्याह ॥ **एतैरपीति** ॥ ननु पर्यवसानोक्तेर्न किञ्चिदपि फलमित्यतः स्वव्याघातोद्बोधनमेव तत्फलमित्याशयेनाह ॥ **स्वव्याघातमिति** ॥ अन्यथासिद्ध्या तर्काभासत्वं शङ्कते ॥ **नन्विति** । असतोऽपि कारणत्वसम्भवाभिप्रायेण कथञ्चिदिति । नन्वसतोऽपि साधकत्वसम्भवात्तर्केऽप्रयोजकत्वमित्यत आह ॥ **असत इति** ॥ ननु नासतोऽदृष्टत्वादित्यस्य वैभाषिकादिमतनिरासायाभावकारणतानिरासाय वा प्रवृत्तेर्न तद्विरोध इत्यत आह ॥ **अलमिति** ॥ शून्यमते साक्षात्प्राप्तासत्कारणतानिरासपरतायाः स्फुटत्वेन वैभाषिकादिमतार्थिकप्राप्तासत्कारणतानिरासपरताया अनुपपन्नत्वाद्वैभाषिकादिमतनिरासकत्वेऽप्यसत्कारणतानिरासपरत्वस्यापरिहार्यत्वाच्च विहिताकरणविशेषादर्शनादीनां प्रत्यवायभ्रमादिहेतुतादर्शनेनादृष्टत्वहेत्वसिद्ध्याऽभावकारणतानिरासकत्वानुपपत्तेश्चेति भावः । यद्वा सत्ताविशिष्टस्य कारणत्वे, सत्ताविशिष्ट सत्तावृत्तौ सत्तायामपि सत्तावृत्त्यापत्त्या, सत्तोपलक्षितस्य कारणत्वेऽसत एव कारणत्वं प्राप्तमिति न सूत्रस्यासत्कारणत्वनिरासे तात्पर्यमित्यत आह ॥ **अलमिति** ॥ घटविशिष्टभूतले घटसत्त्वे घटेऽपि घटसत्त्वापत्त्या, घटोपलक्षिते तत्सत्त्वे घटशून्येऽपि तदापत्तिरित्याद्याभाससमानयोगक्षेमतया 'कथमसतः सज्जायेतेति' श्रुत्याऽ'सद्भ्यः शशविषाणादिभ्यः सदुत्पत्त्यदर्शनादिति तत्सूत्रीयस्वभाष्येण च विरुद्ध-तयाऽस्य युक्त्याभासत्वादिति भावः ।

स०— चार्वाकादिमते प्रमाणादीनामसत्त्वेऽपि साधकत्वमस्तीति व्यभिचार इत्यत आह ॥ **व्यभिचारेति** ॥ यदुक्तं तस्यापि पक्षत्वे बाध इति तत्राह ॥ **बाधस्त्विति** ॥ **उक्तमिति** ॥ अनङ्गी-कुर्वतामित्येतद्व्याख्याऽवसरे ॥ **कथञ्चिदन्वय इति** ॥ वक्ष्यमाणरीत्या साधनव्यापकत्वात्कथञ्चिदित्युक्तम् । **न चैवमित्युक्तमिति** ॥ नेदं साधनं किं तु तर्क इत्युक्तमित्यर्थः । तर्केऽप्युपाधिः किं न स्यादित्यतः कथञ्चिदित्युक्तानुपपत्तिं दर्शयति ॥ **किं चेति** ॥ न च सद्वचनाभासलक्षणायोगित्वस्य प्रमाणादिसत्ता-ऽनभ्युपगमपूर्वकत्वस्य च भिन्नत्वात्कथमुपाधेः साधनाभेद इति वाच्यम् । साधनव्यापकत्वप्रतिपादन एवास्य ग्रन्थस्य तात्पर्यात् । नन्वनिर्वचनीयवादिनः सत्वासत्वौदासीन्येनापि प्रमाणानां बुद्धावारोहः शक्य एवेत्यत आह ॥ **एवं चेति** ॥ निराकरिष्यते 'वैलक्षण्यं सतश्चापी'त्यादिना । नन्वत्राप्युक्तं किमेतत्कथाऽऽ-रम्भो न संभवत्युत कथाऽऽन्तरारम्भः । नाद्यः । आरब्धत्वादेव । नान्त्यः । प्रमाणादिसत्ताऽनभ्युपगमेऽप्ये-तत्कथाऽऽरम्भवत्कथाऽन्तरारम्भोपपत्तेरिति ॥ तद्दूषयति ॥ **न चोक्तदोष इति** ॥ **न चैवमिति** ॥ यदि सत्ताऽभ्युपगममन्तरेण प्रवर्तिता तत्कथा स्यात्तदैव तद्दृष्टान्तेन कथान्तरमप्येवं प्रसज्येतेति स्यात् ।

सत्वस्य प्रामाणिकव्यवहारसिद्धत्वे चक्रकाद्यापत्तिरुक्ता । तत्राह ॥ **तत्रोक्तमिति** ॥ सत्ताऽभ्युपगमस्य कारणकोटावप्रवेशादिति भावः ॥ **तस्यैवेति** ॥ व्यवहारस्यैवेत्यर्थः ॥ **स्यादेतदिति** ॥ वाग्व्यवहार-क्रियासमयबन्धो, वाग्व्यवहारः कर्तव्य इति समयबन्धः । नियतत्वं समयविशेषणम् । नियमबन्ध एव पर्यवसानगत्या व्यवहारसत्तां स्वीकारयतीत्याशयः । ननु सत्तां विनाऽनुपपत्त्यभावात् न तां स्वीकारय-तीत्यत आह ॥ **न हीति** ॥ कुत इत्यत आह ॥ **क्रियेति** ॥ नन्वत्राप्यनुपपत्तिर्न प्रतीयत इत्यत आह ॥ **असत इति** ॥ अनेन समयेन व्यवहर्तव्यमिति व्यवहारो निष्पादनीय इत्युक्त्यैव सत्वमिष्टं स्यात् यतो निष्पादनं नामासतः सत्वप्रापणमित्यर्थः । न केवलं व्यवहारसत्वं स्वोक्त्यैवेष्टं प्रमाणादि-सत्वमपि त्वदुक्तिबलादापद्यत इत्याह ॥ **प्रमाणैरिति** ॥ तृतीयया करणत्वाभिधानात्तस्य च कारणविशेष-त्वात्कारणविशेषत्वस्य सत्वाव्यतिरेकात्प्रमाणादीनां सत्वमनङ्गीकृत्य नियमबन्धनमेव न पर्यवस्यतीत्यर्थः । यद्वाग्व्यवहारे दोषाः सन्ति तस्य जय इति वदन्नेव पुनस्तानि न सन्तीति वदन् कथं सभ्यः स्यादि-त्याह ॥ **दूषणानामिति** ॥ साधनस्य हेतोरङ्गानां व्याप्त्यादीनां सत्वेन तद्विषयस्य प्रतिज्ञातार्थस्य तत्व-रूपत्वता सत्यतेति यावत् । तद्वैपरीत्येनासत्यत्वमादिपदार्थः । उपसंहरति ॥ **इतिरिक्तमिति** ॥ पर-स्परपराहतत्वेन शून्यवचनमित्यर्थः । परिहरति ॥ **यदुक्तमिति** ॥ कथायामेवैतानि बाधकान्युपन्यस्य प्रतिवादिनं निगृह्य सत्ताऽभ्युपगमनं साधनीयं । तथा च न तदन्तरेण कथाप्रवृत्तिः । सत्ताऽभ्युपगमसिद्धौ कथासिद्धिस्तत्सिद्धौ बाधकोपन्यासस्ततश्च सत्ताऽभ्युपगम इति चक्रकापत्तिरित्यर्थः । नास्माभिः प्रमाणा-दिसत्ताङ्गीकारोऽपि कथाकारणमित्युच्यते । येनोक्तदोषः किं तु प्रमाणादिसत्ताऽभ्युपगमो न कथापूर्व-मपेक्षितः आवश्यककथाव्यवहारनियमेनैवानतिप्रसक्तकथाफलसिद्धेरिति वदता प्राप्तमपि स्वव्याघातमपश्यन्तं कथञ्चित्कथायां प्रवृत्तं परं प्रति कथातः पूर्वं स्वेच्छास्वीकृतस्यैव व्यवहारनियमस्योक्तरीत्या प्रमाणादि-सत्तास्वीकार एव पर्यवसानम् । तथाच प्रमाणादिसत्ताऽभ्युपगमो न कथापूर्वमपेक्षितः आवश्यकव्यवहार-नियमेनैवोपपत्तेरिति वचनं स्वव्याहतं, व्यवहारनियमस्यैवोक्तरीत्या प्रमाणादिसत्ताऽभ्युपगमपर्यवसायित्वा-दित्युच्यमानत्वात् । तथा च प्रमाणादिसत्ताऽभ्युपगमः कथापूर्वमपरिहार्य इत्याह ॥ **कथास्वरूपेति** ॥ **कथञ्चित्कारणेति** ॥ असतोऽप्यारोपितस्य सर्पादेर्भयकम्पादिसत्यकार्यजनकत्वदर्शनात्कथञ्चिदित्युक्तम् । कार्यस्यैव सत्वाभाव इतीममंशमासेध्या दूषयित्वा किं कारणसत्तयेत्युक्तमसतः कारणत्वं दूषयति ॥ **असतः कारणत्वं त्विति** ॥ निराकरिष्यते । 'नासतोऽदृष्टत्वादि'त्यत्र ।

... तदेतदिति ॥ यदुक्तमित्यादिनोक्तमित्यर्थः ॥ **अनेनेति** ॥ पूर्वोक्तस्य प्रसङ्गत्व

द्यपक्षदोषं तावन्निराह ॥ **यत्तावदित्यादिना** ॥ **दूषणमिति** ॥ तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेरित्यादिनोक्तमित्यर्थः । एवमित्युक्तं व्यनक्ति ॥ **मायावादीति** ॥ **व्यभिचारस्थलस्येति** ॥ चार्वाकादेस्तद्व्यवहारस्य चेत्यर्थः ॥ **अङ्गीकृतेति** ॥ अनङ्गीकुर्वतामितिबहुवचनं प्रयुंजानेनाचार्येणेत्यर्थः । तथैव प्राग्व्याख्यानादिति भावः । तस्यापि पक्षत्वे बाध इत्युक्तं निराह ॥ **बाधस्त्विति** ॥ **त्युक्तमिति** । 'तस्माद्व्यवहृतिरि'त्येतदवतारिकायामिति भावः । आद्यपक्षेऽपि द्वितीयकल्पदोषमुद्धरति ॥ **साधनबाधनेति** ॥ अनेनैव प्रसङ्गपरमूलेनैव ॥ **विशिष्टेति** ॥ साधनादिक्षमेत्यर्थः । प्रागुक्तं सद्वचनाभासलक्षणयोगित्वोपाधिं च निराह ॥ **विमतइत्यादिना** ॥ **इतिवासाधनइति** ॥ 'मायावादिनं तद्व्यवहारं वा पक्षीकृत्ये'तिपूर्वोक्तसाधनद्वयप्रकारापेक्षया वाशब्दः ॥ **कथंचिदन्वयइति** ॥ कथंचित्साध्यव्यापकत्व इत्यर्थः ॥ यत्र साधनाद्यक्षमत्वं तत्र सद्वचनाभासलक्षणयोगित्वमिति नास्ति । शशविषाणादौ प्रत्यक्षाभासादौ च साध्याव्यापकत्वात् । व्यवहारत्वादिरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वं तु संभाव्यत इति कथंचिदन्वय इत्युक्तं ॥ **नचैवमित्युक्तमिति** ॥ साधनं न भवत्यापादनमेवेत्युक्तमित्यर्थः ॥ **साधनादिति** ॥ प्रमाणसत्ताभ्युपगमपूर्वकतारहितत्वादिति साधनादित्यर्थः । तादृशश्चानुमानमात्रोच्छेदकतया नोपाधिरिति भावः । साधनाभेदं व्यनक्ति ॥ **यदाहीति** ॥ तदसत्त्वं प्रमाणादिव्यवहारासत्त्वमित्यर्थः ॥ **तत्स्वीकारेति** ॥ प्रमाणस्वीकारेत्यर्थः ॥ **एवंचवदतेति** ॥ सत्त्वाद्युदासीनैस्तानि स्वीकृत्येतिवदता स्वरूपासत्त्वं नाभिप्रेतं । सदसद्विलक्षणत्वरूपानिर्वचनीयत्वं यदभिप्रेतं तत् 'वैलक्षण्यं सदसतोरि'त्यादावग्रे निरसिष्यत इत्यर्थः ॥ **इत्यादीति** ॥ तथाच व्याघात इत्यन्तमित्यर्थः ॥ **न चोक्तदोषइति** ॥ व्याघातदोष इत्यर्थः । ब्रूम इत्यनन्तरं येन व्याघातदोष इति योज्यं ॥ **न चैवमिति** ॥ प्रारब्धप्रमेयान्तरकथात्यागेन प्रमाणसत्तापादने प्रकृतकथातः कथान्तरप्रसक्तिदोषः । कथान्तरेऽपि प्रमाणासत्त्ववादिनं प्रति एवमेवापादनीयमित्येवं पूर्वोक्तानेककथान्तरप्रसक्तिरित्यादिपदार्थः । 'स्यादप्येवं यदि कथकप्रवर्तनीये'त्यादिनोक्तदोषं चोद्धरति ॥ **द्वितीयपक्षोक्तेति** ॥ **द्वितीयेतुसंवादएवेति** ॥ अस्माभिरपि सत्ताऽभ्युपगमस्य कारणकोटौ प्रवेशानङ्गीकारादिति भावः ॥ **तृतीयेप्याद्यमिति** ॥ 'लोकव्यवहारोऽपि प्रमाणव्यवहारो वा पामरादिसाधारणव्यवहारो वे'त्यत्राद्यमित्यर्थः ॥ **तत्रोक्तमिति** ॥ 'विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वादि'ति तु 'यो यथाकथंचित्कथायां प्रवृत्तः तं विपक्षे कथानुत्पत्तिप्रसङ्गदण्डं प्रदर्श्ये'त्यादिना दूषितप्रायमित्यर्थः ॥ **द्वितीयेति** ॥ 'पामरादिसाधारणव्यवहारो वे'ति द्वितीयेत्यर्थः ॥ **इत्यत्रदर्शने** इत्येतस्मिन्सिद्धान्ते ॥ **तस्यैवेति** ॥ व्यवहारस्यैवेत्यर्थः । देहात्मैक्यादित्वपवादात्त्यज्यते । तावताऽपवादहीनस्थले तस्य मानत्वे बाधकाभावात् । वक्ष्यते च भक्तिपादे । 'उत्सर्गतोऽपि यत्प्राप्त-

पूर्वपक्षयित्वा समाधानं मायावादिनोक्तं तच्छङ्कासमाधाने द्वे अप्यनूद्य निराह ॥ **स्यादेतदित्यादिना** ॥ तदप्यनेनैव परिहृतमित्यन्तेन । व्यवहारक्रिया व्यवहारकृतिः । व्यवहारकरणविषयसमयबन्धेनेत्यर्थः ॥ **व्यवहारक्रियाऽभिधातुं शक्येति** ॥ व्यवहारकर्तव्यताऽभिधातुं शक्येत्यर्थः । एभिरपि बाधकैरि'त्य-स्याभिमतस्य प्रसाधनीयत्वेनेत्यन्वयः ॥ **पूर्वोक्तेति** ॥ सत्ताऽनभ्युपगन्तुश्चार्वाकादेरपि व्यवहारदर्शना न्मायावादिनाऽपि सत्ताऽनभ्युपगमात्कथारूपकार्यलिङ्गेन तत्सत्ताऽभ्युपगमसाधने बाधस्य न निस्तार इत्यर्थः । केचित्तु पूर्वोक्तबाधकान्न निस्तार इत्यर्थ इत्याहुः ॥ **अनेकातिप्रसङ्गगहनेति** ॥ सर्वमिथ्यात्वपरत्वे स्वयं मिथ्या स्यात् । तस्य साधकत्वसाधकमपि सच्चेद्ब्रह्मातिरिक्तमद्वैतभङ्गः । ब्रह्मैव चेन्निर्विशेषस्य साधकत्वायोगः । मिथ्या चेत्तस्याप्यसाधकत्वमित्याद्यनेकातिप्रसङ्गारण्यनिविष्टत्वादसाधकत्वमिति भावः । श्रुत्यादेरसाधकत्वमेव व्यनक्ति ॥ **तथा चेति** ॥ **तर्कस्येति** । यदि प्रमाणसत्ता न स्यात्तर्हि कथाऽऽदिकार्य-निष्पत्तिर्न स्यादित्येवंरूपतर्कस्य प्रमाणसत्त्वेन विनाप्युपपत्त्याऽऽभासत्वसिद्धिरित्यर्थः ॥ **सूत्रकृतैवेति** ॥ नासतोऽदृष्टत्वादिति समयपादीयशून्यवादापाकरणाधिकरण इति भावः ।

या० — माध्यमिकादेः प्रमाणादिसत्ताऽनभ्युपगमेऽपि वादितोपलम्भाद्व्यभिचार इत्यत आह ॥ **व्यभिचारस्थलस्येति** ॥ प्रसङ्गतुल्यता प्रसङ्गस्थलतुल्यता । तस्याप्युक्तरीत्याऽऽपादनविषयत्वान्न व्यभिचार इति भावः । यदुक्तं तस्यापि पक्षत्वे बाध इति तत्राह ॥ **बाधस्त्विति** ॥ विशिष्टव्यवहार-स्याविनाभाव इति प्रथमद्वितीयकल्पमभ्युपेत्य तत्रोक्तं दोषं परिहरति ॥ **साधनेति** ॥ **विमतो व्यवहार इति** ॥ इदं तु व्यवहारपक्षकानुमानस्य माध्यमिकादिव्यवहारे व्यभिचारपरिहाराय तत्र हेतुव्यतिरेक-साधनम् । अन्यथा कथाव्यवहारपूर्वं प्रमाणादिसत्ताऽभ्युपगम एवेद न विप्रतिपत्तेरर्थान्तरप्रसङ्ग इति द्रष्टव्यम् ॥ **कथञ्चिदन्वय इति** ॥ 'किं चायमुपाधिरि'त्यनुपदमेव वक्ष्यमाणरीत्या वस्तुगत्याऽयमुपा-धिरेव न भवतीति भावेन कथञ्चिदित्युक्तमित्यवधेयम् ॥ **तच्चेति** ॥ सामान्यविशेषव्यक्त्योश्चाभेदः शिंशुपा वृक्षो घटः पृथिवीऽत्यादौ प्रसिद्ध एवेति भावः । धर्मविवक्षायां त्वभेदासम्भवेपि सामान्यधर्मस्य विशेषधर्मव्यापकतया साधनव्यापकता स्यादिति द्रष्टव्यम् । ननु सत्त्ववदसत्त्वस्याप्यनङ्गीकारान्न दो[illegible] इत्युक्तमित्याशङ्कते ॥ **नन्वेनदिति** ॥ नन्वनिर्वचनीयवादिनो मम सत्त्वासत्त्वौदासीन्येनापि प्रमाणा[illegible] [illegible]द्ध्यारोहः [illegible]भवतीत्यत आह ॥ **एवं च वदतेति** ॥ **अग्र इति** ॥ 'वैलक्षण्यं सदसतोरप्येतन्न निषिध्यत' इत्यत्रेत्यर्थः । प्रमाणादिसत्त्वस्य प्रामाणिकलोकव्यवहारसिद्धत्वेऽन्योन्याश्रयत्वं स्यादित्यु[illegible] मित्यत आह ॥ **तत्रोक्तमिति** ॥ भविष्यतीति प्रयोगात्पूर्ववर्तित्वरहितस्य कारणत्वं न सम्भवतीत्याद्या[illegible]-कल्पस्य प्रसक्तिः । लोकव्यवहारसिद्धतया सत्त्वमभ्युगगम्यत इति तावन्न भवतीति वाक्यपर्यालोचनया

द्वितीयस्येति द्रष्टव्यम् ॥ **तस्यैवेति** ॥ उत्सर्गतः प्रवृत्तलोकव्यवहारस्यैवेत्यर्थः ॥ **चतुर्थपक्षोक्तेति** । प्रमाणादिसत्ताऽभ्युपगमस्य समयबन्धनेनान्यथासिद्धस्य न कारणत्वमिति यो दोषश्चतुर्थपक्षेऽभिहितः सोऽपि प्रमाणादिसत्ताऽभ्युपगमस्य कथाफलनिष्पादकतया कथापूर्वकालीनत्वस्यानङ्गीकारेणैव परिहृत इत्यर्थः । अनङ्गीकारमेव दर्शयति ॥ **न हि वयमिति** ॥ तथा च चतुर्थपक्षोक्तदूषणे इष्टापत्तिरिति भावः । ननु प्रमाणादिसत्ता कुतो नाङ्गीकार्या । द्वैतापत्तिभयादिति चेत् । तर्हि कथापूर्वं समयबन्धमात्राङ्गीकारेऽपि सुतरां द्वैतापत्तिः । समयबन्धकरणस्य स्वसत्ताऽभ्युपगमं प्रमाणादिसत्ताऽभ्युपगमं चानादायापर्यवसानात् । अत एव समयबन्धमात्रेणैव कथाऽऽरम्भो न प्रमाणादिसत्तामभ्युपगम्येति वचनं स्वव्याहतमित्याशङ्कते ॥ **स्यादेतदिति** ॥ **व्यवहारक्रियेति** ॥ व्यवहारकरणरूपसमयबन्धेनेत्यर्थः । तस्य स्वसत्ताऽभ्युपगम-मनादायापर्यवसानमुपपादयति ॥ **प्रमाणैरिति** ॥ **प्रमाकारणभावस्येति** । प्रमाणैरिति तृतीयया करणत्वाभिधानात्तस्य च कारणविशेषत्वादिति भावः ॥ **अस्तित्वेनेति** ॥ यस्य व्यवहारे दूषणानि सन्ति तस्य भङ्गः पराजयोऽवधार्य इति नियमबन्धन इत्यर्थः ॥ **साधनाङ्गेति** ॥ यस्य पुनः साधनस्य हेतोरङ्गानि व्याप्त्यादीनि सन्ति तस्य जयो व्यवहर्तव्यः । तद्विषयस्य प्रतिज्ञातार्थस्य तत्त्वरूपता च व्यवहर्तव्येत्येवं व्यवहारनियमनादावित्यर्थः । आदिपदेन साधनाङ्गानामसत्त्वे तद्विषयस्याप्यसत्यत्वमिति व्यवहारनियमनस्य ग्रहणम् ॥ **अङ्गीकृतमिति** ॥ दूषणानि सन्ति व्याप्त्यादिकमस्तीत्यादिवचनं तत्सत्ताऽङ्गीकारपरमेवेति भावः ॥ **रिक्तमिति** ॥ स्वव्याहतत्वादर्थशून्यं वचनमित्यर्थः । अत्र यद्यपि स्वव्याहतिरेवोक्ता प्रतीयते नापसिद्धान्तः । तथाऽपि समयबन्धस्य स्वसत्ताऽभ्युपगमपर्यवसानोपपादनं न व्याहत्यनुकूलमतः सोऽप्यत्राभिप्रेत इति गम्यत इति द्रष्टव्यम् ॥ **पूर्वोक्तबाधाया इति** ॥ तथैव कथाऽन्तरप्रसक्तिः । अन्यथाऽन्योन्याश्रय इत्युक्तबाधस्येत्यर्थः । नास्माभिः प्रमाणादिसत्ताऽङ्गीकारोऽपि कथाकारणमित्युच्यते येनोक्तदोषः किंतु प्रमाणदिसत्ताऽभ्युपगमो न कथापूर्वमपेक्षितः । आवश्यकव्यवहार-नियमेनैवानतिप्रसक्तकथायां फलसिद्धेरिति वदन्तं कथञ्चित्कथायां प्रवृत्तं प्राप्तमपि स्वव्याघातमपसिद्धान्तं चापश्यन्तं परं प्रति कथातः पूर्वं स्वेच्छास्वीकृतस्यैव व्यवहारनियमस्योक्त्या त्वया समयबन्धसत्तास्वीकारे प्रमाणादिसत्तास्वीकारे च पर्यवसानं ततश्च स्वव्याघातादिकमपरिहार्यमेवेत्युच्यत इत्याह ॥ **कथा-स्वरूपेति** ॥ कार्यस्यैव सत्त्वाभाव इति इममंशमसिद्ध्या दूषयित्वा किं कारणसत्तयेत्यनेनोक्तमसतः कारणत्वं दूषयति ॥ **असतःकारणत्वं त्विति** ॥ अथवाऽसतः कारणत्वं यत्खण्डनकारस्याभिप्रेतं तत्सूत्रविरुद्धं चेत्याह ॥ **असत इति** । नासतोऽदृष्टत्वादित्यत्रेति शेषः ॥

श्री०—**प्रसङ्गविषयतुल्यतेति** ॥ प्रसङ्गे यो विषयो धर्मी मायावादी तत्तुल्यतेत्यर्थः ॥ **विशिष्टेति** ॥ साधनबाधनक्षमेत्यर्थः । तदुपपादयति ॥ **यदा हीति** ॥ **स्वरूपासिद्धत्वमिति** ।

तथा च प्रमाणादीनामसत्वप्राप्त्या प्रमाणादिसत्ताभ्युपगमपूर्वकतारहितत्वादिति हेतोरपि प्रमाणान्तर्गततयेनासत्वप्राप्त्या स्वरूपासिद्धत्वमित्यर्थः ॥ **तच्चेति** ॥ स्वरूपासिद्धत्वम् ॥ **तत्र य इति** ॥ वादीत्यर्थः **इदं दूषणमिति** ॥ यदि प्रमाणानि न सन्तीत्यादिनोक्तं दूषणमित्यर्थः ॥ **यश्चेति** ॥ प्रतिवादीत्यर्थः । ननु तर्हि यथैकेन प्रमाणादिसत्तानभ्युपगमेऽपि यदि प्रमाणादीनि न सन्तीति प्रकृतैतद्दूषणाधिकरणभूतकथारूपव्यवहाराख्यो धर्मी सिद्धस्तथैव मत्कर्तृककथान्तरप्रवृत्तिः प्रमाणादिसत्ताऽनभ्युपगमेऽपि भविष्यतीत्युक्तो दोषः स्यादेवेत्याशङ्क्य निराकरोति ॥ **न चोक्तदोष इति** ॥ कुतो न चेत्यत आह ॥ **न हीति** ॥ **ब्रूम इति** ॥ यद्येवं वयं ब्रूमस्तर्ह्येव प्रमाणादिसत्ताभ्युपगमाभावेऽप्येतद्दूषणाधिकरणकथाऽन्तरप्रवृत्त्युपपत्तिरिति दूषणमस्माकं स्यान्न चैवं ब्रूम इत्यर्थः ॥ **यथाकथञ्चिदिति** ॥ समयबन्धादिमात्रेणेत्यर्थः । प्रवृत्तो वादी । कथायां प्रवृत्तं वादिनं प्रत्येव । विपक्षे प्रमाणादिसत्तानङ्गीकारे । एवं सति यथाकथञ्चित्कथायां प्रवृत्त्यङ्गीकारे । कथान्तरप्रसक्त्यादिदोषो न च, न हीत्यर्थः । आदिपदेनस्वव्याघातग्रहणम् । स्वयमेव प्रतिवादी तत्त्ववादी प्रमाणादिसत्ताऽभ्युपगममन्तरेणापि प्रकृतकथारूपव्यवहारप्रवृत्तिमङ्गीकृत्य तत्र यदि प्रमाणादीनि न सन्ति तर्हि व्यवहार एव धर्मी न सिद्ध्येदिति दूषणाभिधाने किं न स्वव्याघातः स्यात् । न चैवम् । प्रमाणादिसत्ताऽभ्युपगममन्तरेण कथाप्रवृत्तेरस्माभिरनङ्गीकारात् । यथाकथञ्चित्प्रवृत्तं परं प्रत्येव विपक्षे बाधकप्रदर्शनेन सत्ताया अङ्गीकर्तव्यत्वस्योक्तत्वात् । न ह्येवं सति व्याघातप्रसक्तिरस्तीत्याशयः । एतेनेत्युक्तम् विशदयति ॥ **प्रतिवादिन इति** ॥ कथाप्रवेशं यथाकथञ्चित्कथायां प्रवेशम् ॥ **न कथाकारणत्वमिति** ॥ अन्योन्याश्रयादिति भावः ॥ **तृतीये आद्यमिति** ॥ लोकव्यवहारोऽपि प्रमाणव्यवहारो वा पामरादिसाधारणव्यवहारो वेत्यत्राद्यमित्यर्थः ॥ **तत्रोक्तमिति** ॥ विचारप्रवृत्त्यनन्तरं प्रमाणादिसत्ताभ्युपगमस्य प्रामाणिकव्यवहारसिद्धत्वं तत्सिद्धेन प्रमाणादिसत्ताभ्युपगमेन विचारप्रवृत्तिस्तस्य विचारकारणत्वादित्युक्तं दूषितप्रायम् सत्ताऽभ्युपगमस्य विचारकारणत्वाभावेन द्वितीयकोट्यनङ्गीकारादिति भावः ॥ **द्वितीयेति** ॥ पामरादिसाधारणव्यवहारो वेति द्वितीयपक्षेत्यर्थः ॥ **विचारबाध्य इति** ॥ प्रमाणादिसत्ता विचारबाध्या यदि भविष्यति तदा नाभ्युपगन्तव्या । यदि विचारबाध्या न भविष्यति तर्ह्यङ्गीकर्तव्येत्युक्त्या विचारप्रवृत्तिनान्तरीयस्य प्रमाणसत्ताभ्युपगमस्य विचारप्रवृत्तिपूर्वकालीनत्वाभावान्न विचारप्रवृत्तिकारणत्वमित्यर्थः ॥ **तस्यैवेति** ॥ उपरागेन प्रवृत्तलोकव्यवहारस्यैवेत्यर्थः ॥ **नियतेति** ॥ नियतवाग्व्यवहारकरणरूपसमयबन्धेनेत्यर्थः । अस्तित्वेन सत्यत्वेन । भङ्गः परपक्षस्य । कथायां प्रवृत्तं स्वेच्छास्वीकृतव्यवहारनियमेन यः कथञ्चित्कथायां प्रवृत्तम् ॥ **स्वव्याघातमिति** ॥ प्रमाणादिसत्तामनङ्गीकृत्य प्रमाणैर्व्यवहर्तव्यमिति स्वेच्छ

श्रुत्यादेरिति ॥ नेहनानेतिश्रुत्या सर्वस्य सत्वाभावो बोध्यते । तथाच सर्वान्तर्गतस्य कथाऽऽदेरपि सत्त्वाभावो निश्चित इत्यर्थः ॥ **अनेकातिप्रसङ्गेति** ॥ 'तद्वाक्यस्याग्रतो भवेत्', 'प्रत्यक्षविरोधत' इत्युक्तानेकातिप्रसङ्गेनेत्यर्थः । तत्प्रामाण्ये नेहनानेतिश्रुतिप्रामाण्ये ॥ **अन्यथासिद्धेरिति** । अन्यथासिद्धिरप्रयोजकत्वम् । ब्रह्मज्ञानेतरज्ञानबाध्यत्वाभावे सत्वाभावे साधकत्वं न स्यादिति तर्के मिथ्यात्वसाधकश्रुतिविरोधेनाप्रयोजकत्वप्राप्तेरित्यर्थः ॥ **तस्य चेति** ॥ तर्कस्याभासत्वेन तद्विरोधाभावादित्यर्थः ॥

च०— व्यभिचारस्थलस्य माध्यमिकादिव्यवहारस्य । आपत्तिधर्मिभूताद्वैतवादिव्यवहारतुल्यता । तथा च तस्याप्युक्तदिशाऽऽपादनविषयत्वान्नानैकान्त्यमिति भावः ॥ **कथंचिदिति** ॥ समनन्तरमेव साधनाभेदं तस्य प्रदर्श्योपाधित्वाभावस्य व्युत्पादनाशयेन कथञ्चिदित्युक्तिः ॥ **साधनादिति** ॥ प्रमाणादिसत्तोपगतिपूर्वकतारहितत्वादिति साधनादित्यर्थः । साधनव्यापकत्वान्नोपाधिरिति भावः ॥ **तच्चेति** ॥ सामान्यधर्मावच्छिन्नस्य विशेषधर्मावच्छिन्नाभेदस्तु वृक्षः शिंशुपा, द्रव्यं घट इत्यादौ प्रसिद्ध इति भावः ॥ **निराकरिष्यत इति** ॥ 'वैलक्षण्यं सदसतोरित्यादिने'ति पूर्णं यम् । पर्यनुयोज्यः शङ्कनीयः । संवादः संप्रतिपत्तिः । आद्यं प्रमाणव्यवहार इति कल्पम् ॥ **चतुर्थपक्षेति** ॥ अन्यथासिद्धत्वान्न तत्सत्तोपगतेः कारणत्वमित्येवंरूपः । ननु द्वैतापत्तिभिया प्रमाणादिसत्तां यदि नोपेयात्तदा विधिनिषेधाववधूय प्रत्ययायोगेन समयबन्धादेस्तद्धेतुतास्वीकारो न घटत एवेत्यादिदिशा सत्यत्ववाद्यभिहितं पूर्वमतीकृत्य यदभ्यधात्खण्डनकारस्तदप्यनूद्य प्रतिविधत्ते स्यादेतदित्यादिना परिहृतमित्यन्तेन । अचेतयन्तं अनभिजानानम् । सूत्रकृतैव निराकरिष्यत इति । समयचरणे 'नासतोऽदृष्टत्वादि'ति शून्यवादापाकृतिनय इति भावः । खण्डनकृन्मतनिरासः ॥

अनु०— व्यवहारसतश्चापि साधकत्वं तु पूर्ववत् ॥

सु०— स्यादेतदेवम् । यदि नेहनानेत्यादिबलेनात्माऽतिरिक्तस्य सर्वस्यासत्त्वमभ्युपगच्छामः । न चैवं किं नाम व्यावहारिकी सत्ताऽभ्युपगम्यत एव । तथा च सर्वान्तःपातिनो व्यवहारसतः प्रमाणादेः साधकत्वसंभवान्नोक्तप्रसङ्ग इत्यत आह ॥ व्यवहारसतश्चेति ॥ चशब्दो हेतौ । अपिशब्दः समुच्चये । तुशब्दोऽवधारणे । व्यवहारसतोऽपि साधकत्वं पूर्वस्यासत इव प्रतिवादिनो न सिद्धमेव यतोऽतो नोक्तप्रसङ्गनिस्तार इति । अयमर्थः । यदि व्यावहारिकं सन्नाम सदेव तदा मिथ्यात्वप्रतिपादनं व्याहतम् । फलितं चास्मन्मनोरथद्रुमेण । व्यर्थं च

व्यावहारिकपदम् । अथ तदसत्तदा किमनेनाधिकमाचरितम् । सत्त्वाभावे साधकत्वं न स्यादित्यनिष्टप्रसङ्गस्य तदवस्थत्वादिति । ननु च द्विविधं सन्मुख्यममुख्यं च । तत्र यस्य सर्वप्रकारेण बाधितत्वं नास्ति तन्मुख्यं सत्पारमार्थिकमिति च गीयते । यस्य तु सत्प्रतीतिरेव सत्ता तदमुख्यं सत् । न च ततः सत्ता सिद्ध्यति । तथा हि । किं सत्ताऽवगममात्रात्तत्सत्ताऽभ्युपगम्येति मन्यसेऽबाधितात्तदवगमाद्वा । नाद्यः । मरुमरीचिकाऽऽदौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात् । द्वितीयेऽपि वादिप्रतिवादिमध्यस्थमात्रस्य तस्यापि कथाकाल एव बाधितत्वावगमाभावात् । अथवा कस्यचिदपि कालान्तरेऽपि च बाधितत्वबोधविरहात् । नाद्यः । अतिप्रसङ्गात् । पुरुषत्रयावगतस्याप्येकक्षणावगतस्य पुरुषान्तरेण तेनापि क्षणान्तरेऽपि बहुलं बाधदर्शनात् । न चासावर्थोऽसत्योऽपि द्वित्रादिपुरुषमात्रपूर्वजाततत्प्रतीत्यनुरोधाद्बाधदर्शने सञ्जातेऽपि तथैव सन्नित्यभ्युपगम्यते । तस्माद् द्वितीयः पक्षः परिशिष्यते । न चासावमुख्येऽस्तीति कुतः पारमार्थ्यप्राप्तिः । न च वाच्यं सत्प्रतीतेरपि प्रतीत्यन्तरमेव सत्तेत्यनवस्थेति । प्रतीतेः पारमार्थिकत्वात् । न हि तस्या बाधोऽस्ति । अस्ति चेत्सैव प्रतीतिरबाधिता परमार्थसती । न च प्रतीतेः स्वरूपभेदोऽस्तीत्यतो विज्ञानं ब्रह्मैव परमार्थसत् । अमुख्यं पुनर्द्वेधा । मायोपाधिकमविद्योपाधिकं चेति । तत्राऽऽद्यमम्बरादिकम् । तच्चाब्रह्मज्ञानाद्बाधवैधुर्येण हानादिव्यवहारनिर्वाहकत्वाद्व्यावहारिकमिति गीयते । कतिपयप्रतिपत्तृकतिपयकालतथात्वावगमादेव हि लौकिको व्यवहारः प्रतीयते । द्वितीयं शुक्तिरजतादि । तत्तु प्रतीतिसमयमात्रपरिवर्ति । न पुनर्हानादिहेतुरिति प्रातीतिकमुच्यते । तदेवं सत्त्रैविध्यादम्बरादिकं विश्वं सदपि पारमार्थिकत्वाभावान्मिथ्येति युज्यते । व्यावहारिकसत्त्वाच्च तदन्तर्गतस्य प्रमाणाऽऽदेः कथाऽङ्गतोपपद्यते । पारमार्थिकप्रातीतिकव्यावृत्त्यर्थत्वेन व्यावहारिकपदं च संभवतीति अत्रेदं वक्तव्यम् । किं पारमार्थिकसदेव सदसच्च बाधकभेदेन द्विविधमिति सत्त्रैविध्यमुत सत्येवावान्तरभेदेन । आद्ये प्रागुक्तदोषानिस्तारः । नहि सदिति ज्ञानमात्रेणासदर्थक्रियार्हम् । येन तथाविधं प्रमाणादि, कथाङ्गतां गच्छेत् । तथात्वे विषमपि पीयूषतयाऽवगतं तदर्थक्रियां कुर्यात् । बाधविलम्बस्त्वप्रयोजकः । अर्थतादवस्थ्यानिवृत्तेः । एवं ज्ञानसत्यताऽपि । शुक्तिरजतादेरपि रजतोचितार्थक्रियाकारित्वप्रसङ्गात् । यदपि तथैव लौकिको व्यवहारः प्रतीयत इति तदग्रे निराकरिष्यते । अर्थक्रियाऽप्यसतीति चेतरेतराश्रयादिना निरस्तम् । सतोऽर्थक्रियाऽसंभवादसत्येः कथंचित्साऽङ्गीकार्येति चेत् । श्रुतिप्रामाण्यनिश्चयोत्तरकालमेवैतत् । प्राक्तन्निश्चयात्परमार्थसत एवार्थक्रियेति मन्यमानः प्रतिवादी कथं बोधनीयः । अन्योन्याश्रयादिप्रसङ्गादित्युक्तम् ।

वा०— ननु नेहनानेतिवाक्यबलसिद्धासत्त्वप्रपञ्चान्तर्गतप्रमाणादेरसत्त्वमङ्गीकुर्वता व्यावहारिकसत्त्वस्य शङ्कितुमशक्यतया व्यावहारिकसत्त्वाप्रसक्तेस्तत्साधकत्वोपयोगनिरासकोत्तरभाष्यमसङ्गतमित्यत आह ॥ **स्यादेतदिति** ॥ नेहनानेतिवाक्यं च पारमार्थिकत्वाभावविषयमिति गूढाभिसन्धेः शङ्केयमिति ध्येयम् । समुच्चयस्यैकेनैव सिद्ध्या चापिशब्दयोरन्यतरस्य वैयर्थ्यमित्यतः प्रकृतसङ्गतिं दर्शयितुं, प्रकृतं प्रत्येतद्वाक्यार्थस्य हेतुत्वद्योतकतया चशब्दं व्याचष्टे ॥ **चेति** ॥ इवेति वतेरर्थकथनम् । प्रतिवादिन इत्यादि तल्लब्धार्थकथनम् । चशब्दद्योतितहेतुं प्रति योग्यसाध्याध्याहारोऽतो नोक्तेत्यादिः । ननु व्यावहारिकसत्त्वस्य व्यवहारनिर्वाहक्षमत्वरूपस्य पारमार्थिकसत्त्वरूपत्वात्कथं नोक्तप्रसङ्गनिस्तार इत्यतस्तस्य पारमार्थिकत्वरूपत्वपक्षमुपर्येव निरस्य सत्त्वेन व्यवहारमात्रं न तु ताऽवस्तुनः सदिति पारमार्थिकसत्त्वरूपत्वभावपक्षं परिशेष्य तन्निरासपरत्वेन भाष्यं योजयति ॥ **अयमर्थ इति** ॥ आशयमजानानस्यैवेदमुत्तरम् । अत एव ननुचेत्यादिना तदाशयोद्घाटनेनोत्तरं भविष्यतीति द्रष्टव्यम् ॥ **फलितं चेति** ॥ सत्यस्यैव साधकत्वं नासत इत्यस्माभिः प्रतिपादनीयस्य सिद्धेरित्याशयः । ननु सत्त्वपक्षोक्तदूषणानुपमर्दकतया सत्त्रैविध्यस्य परेणानाशङ्कनीयत्वात्तन्निरासकोत्तरभाष्यमसङ्गतम् । तथा हि । सत्त्रैविध्यं वदता प्रमाणादीनां सत्त्वात्साधकत्वस्योपपादनेनासत्त्वपक्षोक्तदूषणपरिहारेऽपि सत्त्वाङ्गीकारे मिथ्यात्वप्रतिपादनं व्याहतमिति सत्त्वपक्षोक्तदूषणस्य परिहारो न कर्तुं शक्यः । न च सत्तात्रैविध्याद्व्यावहारिकसत्तासद्भावेऽपि ब्रह्मनिष्ठपारमार्थिकसत्त्वाभावेन मिथ्यात्वमिति वाच्यम् । सत्त्वाविशेषेऽपि ब्रह्मनिष्ठसत्त्वाभावेन जगतो मिथ्यात्वे ब्रह्मण्यपि जगन्निष्ठसत्त्वाभावेन तस्यापि मिथ्यात्वापत्तेरित्यतो न सत्तात्रैविध्यवादिनाऽविशेषेण सत्त्वमङ्गीक्रियते किं नाम क्वचिन्मुख्यमपरत्रामुख्यममुख्येन च न मुख्येनेवार्थगतसत्तासिद्धिरित्यभिप्रेत्य सत्त्वयोर्मुख्यामुख्यभेदेन द्वैविध्यं, तत्स्वरूपं, अमुख्येन तदसिद्धिप्रकारं च प्रतिपादयति ॥ **ननु चेत्यादिना** ॥ ननु प्रतीतेरेवार्थसाधकत्वात्सत्ताप्रतीतावपि तदसिद्धौ न क्वाऽप्यर्थसिद्धिः स्यादित्यत आह ॥ **तथा हीति** ॥ वादिप्रतिवादिमध्यस्थानामेव बाधबोधविरहाद्वा कस्यापि बाधबोधविरहाद्वा । आद्येऽपि तेषां कथाकाल एव तदभावाद्वा कालान्तरेऽपि वा । द्वितीयेऽपि प्रतीतिकाल एव वा कदाऽपि वेति विकल्पान्मनसि निधायाह ॥ **द्वितीयेऽपीति** ॥ द्वयमप्यनैकान्त्येन निरस्यति ॥ **नाद्य इति** ॥ अनैकान्त्यमेव स्फोरयति ॥ **पुरुषेति** ॥ पुरुषत्रयावगतस्यापि पुरुषान्तरेणेत्याद्ये वाद्यादीनामेव कालान्तरेऽपीति द्वितीयस्य । एकक्षणावगतस्य तेनापि क्षणान्तर इत्यनेन वाद्यादीनामेव कथाकाल एवेत्याद्यस्य द्वितीये कस्यचिदपि प्रतीतिकाल एवेत्याद्यस्य च निरासः । वैभाषिकसौत्रान्तिकयोगाचारावगतस्य स्वरसभङ्गुरत्वस्य वाद्यन्तरेण, पूर्वं सर्पतया

वदिति पुरुषत्रयावगतस्यापि सत्त्वेन तत्र साध्यस्यापि सत्त्वान्न व्यभिचारस्तत्राह ॥ **न चेति** ॥ द्वौ त्रयो वा द्वित्राः । त एव पुरुषा मात्राः परिमाणं यस्य तस्य पूर्वं जाता या, तस्य च तस्य वस्तुनः प्रतीतिरिति विग्रहः । बाधदर्शने सञ्जातेऽपि द्वित्रादिपुरुषमात्रपूर्वजातदर्थप्रतीत्यनुरोधादसत्योऽप्यसावर्थस्तथैव सन् । तथाभूत इति यावत् । इति न चाभ्युपगम्यत इति सम्बन्धः । तादृशावगमेन प्रातीतिकसत्त्वसाधने सिद्धसाधनमर्थसत्त्वसाधने बाधबोधविरोध इत्याशयः ॥ **तस्मादिति** ॥ द्वितीये द्वितीय इत्यर्थः । जगद्विषयकप्रतीतेः कालान्तरे बाधो भविष्यतीत्याशयेनाह ॥ **न चेति** ॥ **प्रतीत्यन्तरमेवेति** ॥ अन्यथाप्रतीतौ तद्गतसत्तास्वीकारेऽविशेषादर्थेऽपि सा स्यादित्याशयः । ननु बाधप्रतीतेः पारमार्थिकत्वे किमायातं जगत्सत्त्वप्रतीतेरित्यत आह ॥ **न चेति** ॥ साक्षिचैतन्यरूपप्रतीतेर्ब्रह्मरूपत्वादिति भावः । यद्वा ननु तथा सति सदद्वैतभङ्ग इत्यत आह ॥ **न चेति** ॥ ब्रह्मस्वरूपान्न भेदः प्रतीतेरिति भावः । सत्ताप्रतीतिमात्रान्न जगतः सत्त्वसिद्धिरित्यर्थप्रतिपादनाय प्रवृत्तेन मयाऽनवस्थापरिहाराय प्रतीतेः पारमार्थिकत्वं व्युत्पादयता ब्रह्मैव परमार्थसदित्यपि व्युत्पादितं भवतीत्याशयेन मुख्यं सदित्यस्योदाहरणमाह ॥ **अत इति** ॥ तर्हि पारमार्थिकसत्त्वाभावेन जगतो मिथ्यात्वे व्याहतिपरिहारेऽपि मिथ्यात्वाविशेषाच्छुक्तिरजतादिवत्प्रमाणादेरपि साधकत्वं न स्यादन्यथा तस्याप्यर्थक्रियाकारित्वं स्यादित्यतस्तत्राप्यवान्तरविशेषः सत्तात्रैविध्यं वदतोऽभिप्रेत इत्याशयेनाह ॥ **अमुख्यं पुनरिति** ॥ मायाऽविद्याभेदमाश्रित्य वैकस्या एव मूलप्रकृतेरावरणविक्षेपशक्तिविशेषाभिप्रायेण वाऽयं विभागः । तत्राम्बरादेर्हानादिव्यवहारनिष्पादककतिपयप्रतिपत्तृकतिपयकालतथात्वावगमप्रयोजकाब्रह्मज्ञानबाधवैधुर्योपपादनाय ब्रह्माश्रितमायोपाधिकत्वोक्तिः । शुक्तिरजतादेश्च हानादिव्यवहाराभावप्रयोजकप्रतीतिसमयमात्रपरिवर्तित्वोपपादनाय प्रातिस्विकतत्तज्जीवाश्रिताविद्योपाधिकत्वोक्तिः । प्रातिस्विकपुरुषप्रतीतिमात्रसिद्धतया दुःखादेराविद्यकत्वस्य परेणोक्तावपि ब्रह्मान्यज्ञानबाधवैधुर्येण तस्याविद्यकत्वाविवक्षया रजतादेरेव तथात्वेनात्रोपादानमिति द्रष्टव्यम् । नन्वब्रह्मज्ञानाद्बाधवैधुर्यस्य कथं हानादिव्यवहारप्रयोजकत्वमित्यतो बहुयत्नसाध्यबाधकीभूतब्रह्मज्ञानस्य कालान्तरीयत्वेन तदभावदशायां बहुपुरुषाणां बहुकालमर्थतथात्वज्ञानसम्भवात्तस्यैव च व्यवहारप्रयोजकत्वान्नानुपपत्तिरित्याशयेनाह **कतिपयेति** ॥ प्रतीयते सम्यग्ज्ञानं जन्यत इत्यर्थः । एवं च सत्त्वासत्त्वपक्षद्वयोक्तस्यापि दूषणस्य परिहारः सिद्ध इत्याशयेनोपसंहरति ॥ **तदेवमिति** ॥ नन्वमुख्यं सदित्युक्तेऽमुख्यः सिंह इत्यादावसिंह इवासदेव भाति । एतादृशे च सत्त्रैविध्ये, सत्त्वाभावे साधकत्वं न स्यादिति प्रसङ्गानिस्तारेण 'सत्त्रैविध्ये' त्युत्तरभाष्योक्तदूषणान्तरं न सङ्गतमित्यतोऽमुख्यं सदित्युक्तेऽसदिवाभिधात्वाविशेषेऽपि, रूढियोगरूढ्यविशेषेऽपि धेनुवागादौ गवादिशब्दानां मुख्यत्ववत्, कयाचिद्विवक्षया सत्येवावान्तरभेदेना

सत्त्वेविध्यसम्भवात्तत्पक्षदूषणस्यावश्यकत्वादमुख्यं सदसदिति पक्षस्य पूर्वोक्तरीत्या दुष्टत्वात्तदुपपादनप्रकारस्य च स्पष्टत्वाद्भाष्यकारेण तं पक्षमुपेक्ष्यावान्तरभेदपक्ष एव दूषणमुच्यत इत्यभिप्रेत्य पक्षद्वयं विकल्प्याद्यपक्षे पूर्वोक्तदूषणमेवातिदिश्य तदुपपादनप्रकारं चाभिधाय द्वितीयपक्षदूषणत्वेन भाष्यं योजयति ॥ **अत्रेदमिति** ॥ यद्यपि कथञ्चित्प्रथमपक्षदूषणत्वेनापि भाष्यं योजयितुं शक्यं तथाऽपि तस्य पूर्वोक्तरीत्या दुष्टत्वाददूषितपक्षदूषणतया भाष्यं योजितमिति द्रष्टव्यम् । ज्ञानमात्रेणेत्यत्र मात्रशब्दसूचितार्थसत्त्वनिषेधं सूचयति ॥ **असदिति** ॥ शुक्तिरजतादेः प्रकृतत्वेऽपि विरुद्धत्वेनात्यन्तासम्भावितत्वया विषपीयूषदृष्टान्तोक्तिः । ननु न सदिति ज्ञानमात्रस्यार्थक्रियार्हत्वप्रयोजकत्वं येनोक्तदोषः किन्त्वब्रह्मज्ञानबाधवैधुर्यसहितस्य तस्येति विषादिदृष्टान्तवैषम्यमित्यतो ब्रह्मज्ञानरूपप्रपञ्चबाधकस्य कालान्तरीयत्वं तात्कालिकबाधोपपन्नविषादिदृष्टान्तवैषम्यमित्युक्तं स्यात् । तच्चाप्रयोजकमित्याह ॥ **बाधेति** ॥ सर्वथा बाधवैधुर्येऽर्थस्यासत्त्वासम्भवेऽपि कालान्तरीयबाधाङ्गीकारेऽसत्त्वानिवृत्त्याऽर्थक्रियानुपपत्तिस्तदवस्थैवेत्याह ॥ **अर्थेति** ॥ नन्वर्थस्यासत्त्वेऽपि तत्सत्ताया अर्थक्रियां प्रत्यप्रयोजकत्वाज्ज्ञानसत्ताया एव च प्रयोजकत्वात्तस्याश्चोपपादितत्वान्नार्थक्रियाऽनुपपत्तिरित्यतो बाधविलम्बपक्षोक्तमप्रयोजकत्वं ज्ञानसत्यत्वपक्षेऽप्यतिदिशति ॥ **एवमिति** ॥ **शुक्तिरजतादेरिति** ॥ न हि तस्या बाधोऽस्तीत्युक्तोपपादकस्य तत्प्रतीतावपि साम्यादिति भावः । ननु बाधविलम्बस्य नाप्रयोजकत्वम् । व्यवहारान्यथाऽनुपपत्त्या तत्प्रयोजकत्वस्य सिद्धेरित्याशयेन परेण यदुक्तं तथैवेत्यादि तदाशङ्क्य निषेधति ॥ **यदपीति** ॥ अर्थसाध्यव्यवहारस्यार्थगतपारमार्थिकसत्त्वेनेव ज्ञानसाध्यस्य च ज्ञानपारमार्थिकसत्त्वेनैवान्यथासिद्ध्याऽन्यथोपपत्तेर्वक्ष्यमाणत्वादित्यर्थः । यद्वा त्रैकालिकाबाध्यत्वनिश्चयादेव व्यवहारस्य 'ऊरीकृत्य च तान्सर्वान्' इत्यादिना वक्ष्यमाणत्वादिति भावः । इतरेतराश्रयत्वादिनेत्यत्रादिशब्देन चक्रकं गृह्यते । ननु ब्रह्मणोऽर्थक्रियाङ्गीकारे क्रियाऽऽश्रयेण विकारित्वापत्त्या निर्विकारश्रुतिविरोधेनासम्भवाज्जगतश्च नेह नानेतिश्रुतिबलेन मिथ्यात्वादर्थक्रियायाश्च प्रतीतिसिद्धत्वाज्ज्ञानसत्यत्वब्रह्मज्ञानमात्रबाध्यत्वयोस्तत्प्रयोजकत्वाङ्गीकारेणार्थक्रियाया अप्यसत्त्वाङ्गीकारेण वा तत्र प्राप्तदूषणानि कथञ्चित्परिहृत्यासत्येव सा स्वीकर्तव्येति शङ्कते ॥ **सत इति** ॥

स० — प्रमाणादि परमार्थसत् अबाधितावगमगोचरत्वादात्मवदित्याशङ्क्याह ॥ **द्वितीय इति** ॥ तस्य वादिप्रतिवादिमध्यस्थमात्रस्य कथाकाले बाधितावगमाभावात्सत्ताऽभ्युपगम्यते । किंवा कदाचिदपि तदभावात् । उत कस्यचिदपि कालान्तरेऽपि बाधावगमविरहादिति विकल्पार्थः । आद्यमनैकान्त्येन दूषयति ॥ **नेति** ॥ व्यभिचारमेव स्फोरयति ॥ **पुरुषेति** ॥ पुरुषत्रयावगतस्य रसभङ्गुरत्वस्य वाद्यन्तरेण

बाध्यतादर्शनात् । तथा महान्धकारे पथि गच्छतः पुरुषत्रयस्य स्रजं दृष्ट्वा सर्पं मन्यमानस्य कालान्तरे निकटोपसर्पणेन दर्शने बाधदर्शनात्पुरुषत्रयस्यैकक्षणे अबाधितावगमत्वहेतुस्तत्र व्यभिचारीत्यर्थ । ननु विगीतः प्रत्ययो यथार्थः प्रत्ययत्वात्संप्रतिपन्नवदित्यनुमानेन पुरुषत्रयावगमस्य याथार्थ्ये तदवगतस्यापि सत्यत्वान्न तत्र व्यभिचार इत्यत्राह ॥ **न चेति** ॥ द्वौ त्रयश्च द्वित्राः, त एव आदयो येषां ते द्वित्रादयः, त एव पुरुषास्तन्मात्रस्य पूर्वजातेति विग्रहः । प्रातीतिकत्वसाधने सिद्धसाधनमर्थसत्वसाधने बाधबोध-विरोध इत्यर्थः । द्वितीयं परिशेषयति ॥ **तस्मादिति** ॥ तमेव विशदयति ॥ **न चेति** ॥ नन्वेवं चेत्सत्प्रतीतेः सत्वं नाम सत्वेन प्रतीतिरेव, एवं तस्या अपीति पूर्वपूर्वप्रतीत्यसत्वे उत्तरोत्तरप्रतीते-रप्यसत्वमित्याशङ्कते ॥ **न चेति** ॥ साक्षिचैतन्यरूपत्वेन पारमार्थिकत्वात्प्रतीतेर्नानवस्थेत्याह ॥ **प्रती-तेरिति** ॥ प्रतीतेः भ्रमत्वात्कथं पारमार्थ्यमिति चेन्न । तस्य बाधकैकसमधिगम्यत्वात्प्रकृते तदभावा-दित्याह ॥ **न हि तस्या इति** ॥ बाधकाभावेन पारमार्थ्यमुक्तमिदानीमभ्युपेत्यापि तत्सत्वं प्रतीतेः पार-मार्थिकत्वमुपपादयति ॥ **अस्ति चेदिति** ॥ सैव बाधिकैवेत्यर्थः । ननु बाधकज्ञानस्य पारमार्थिकत्वेऽपि सत्प्रतीतेः पारमार्थिकत्वे किमायातमित्यत आह ॥ **न च प्रतीतेरिति** ॥ अथवा नन्वतीन्द्रियधर्मादि-प्रतीतेर्न चैतन्यरूपत्वम् । तत्र चैतन्याभिव्यक्त्यनङ्गीकारात् । अतो धर्मादिप्रतीतेर्वृत्तिरूपाया बाधसंभवेन सत्वेन प्रतीतिरपर्यवसन्नेति वक्तव्यम् । अतस्तत्रोक्तानवस्थेत्यत आह ॥ **अस्ति चेदिति** ॥ क्वचित् धर्माद्यतीन्द्रियप्रतीताविति शेषः । अयं भावः । न धर्मादिप्रतीतेरपि सत्वेन प्रतीतिरेव सत्त्वेत्य-नवस्था । सर्वस्या अपि प्रतीतेः सत्वेन प्रतीतेरनावश्यकत्वात् । कस्याश्चित्प्रतीतेर्विशेषदर्शने बाधरूपा-सत्वप्रतीतेरपि संभवे तत्रैव पर्यवसानात् । न च बाधरूपासत्वप्रतीतेरपि सत्वेन प्रतीतिरेव सत्त्वेति पुनरनवस्था । तस्याः बाधाभावेन परमार्थसत्वात् । अन्यथा बाध्यत्वेनाभिमतायाः पूर्वप्रतीतेरेव परमार्थसत्वप्राप्त्या तत्रैव परम्परापर्यवसानादिति । नन्वेवं ब्रह्मैव परमार्थसदिति सदद्वैतमतहानिः । घटादिप्रतीतेर्बाधप्रतीतेर्वा परस्परं ब्रह्मणश्च भिन्नत्वादित्यत आह ॥ **न च प्रतीतेरिति** ॥ घटादिप्रतीतेर्बाधप्रतीतेर्वा, न परस्परं, न वा ब्रह्मस्वरूपाद्भेदोऽस्तीत्यर्थः । अभावस्य ब्रह्मात्मकत्वात्तस्य च स्वविषयकप्रकाशरूपत्वादभावज्ञानरूपबाधप्रतीतेर्ब्रह्माभेदो युक्त इति मन्तव्यम् । तदिदमाह ॥ **विज्ञानं ब्रह्मैवेति** ॥ स्वविषयज्ञानरूपं ब्रह्मैवेत्यर्थः । आपणस्थरूप्यस्य शुक्तिरूप्यस्य चामुख्यत्वाविशेषेऽर्थक्रिया-कारित्वतदभावव्यवस्था न स्यादित्यतस्तत्रापि भेदमाह ॥ **अमुख्यमिति** ॥ **प्रागुक्तेति** ॥ असत्वे साधकत्वं न स्यादिति प्रागुक्तेत्यर्थः । ननु शुक्तिरजतादेः प्रमाणादेश्चासत्वाविशेषेऽपि शुक्तिरजतादे-

सत्यत्वेन प्रपञ्चस्यार्थक्रियाकारित्वं स्यादित्यत आह ॥ **एवमिति** ॥ अप्रयोजकमिति शेषः । अतिप्रसङ्गं चाह ॥ **शुक्तिरजतादेरपीति** ॥ **अग्रे निराकरिष्यत इति** ॥ 'दीर्घभ्रान्तिकरी चेत्स्यादतत्त्वावेदक-प्रमे'त्यादिना चतुर्थस्य द्वितीये ।

प०— चशब्दादित्रयस्योक्तार्थतामन्वयं दर्शयन्नेव योजयति ॥ **व्यवहारसतोऽपीति** ॥ पष्ठ्यन्ताद्वतिरित्युपेत्य पूर्ववदित्येतत् पूर्वस्यासत इवेत्युक्तम् । नोक्तप्रसङ्गनिस्तार इत्येतद्व्यनक्ति ॥ **यदि व्यावहारिकं सत्त्वमेति** ॥ तस्यापि बाध्यादिमात्रस्यापि । ननु बाधदर्शनेऽपि बाध्यादित्रयानुगतोऽर्थः सत्य एवास्त्वित्यतो नेत्याह ॥ **न चागमाविति** ॥ असत्योऽपि ह्यागावर्थः तथैव सन्निति न चाभ्युपगम्यत इत्यन्वयः ॥ **तत्प्रतीतीति** ॥ अर्थप्रतीतीत्यर्थः । पूर्वजातेत्यस्य तु बाधापेक्षया पूर्वोत्पन्नेत्यर्थः ॥ **सैव प्रतीतिरिति** ॥ बाधरूपप्रतीतिरित्यर्थः । ब्रह्मरूपत्वात्तस्या इतिभावेनाह ॥ **न चेति** ॥ परव्यामोहनकरी माया स्वाश्रयव्यामोहनकरी अविद्या क्रमादीशजीवयोराश्रिता । लौकिको व्यवहारो हानोपादानादिः ॥ **बाधकभेदेनेति** ॥ ब्रह्मज्ञानतदितरबाधकभेदेनेत्यर्थः ॥ **एवं ज्ञानसत्यताऽपीति** ॥ असत्त्वावान्तरभेदश्चेदुक्तदोषेण दुष्टेत्यर्थः । सदितिज्ञानमात्रेणार्थक्रियाहेतुत्वे दोषान्तरमाह ॥ **शुक्तिरजतादेरिति** ॥ **अग्रे निराकरिष्यत इति** ॥ 'अतत्त्वावेदकत्वं चेदप्रामाण्यं सतां मतम् । दीर्घभ्रान्तिकरी चेत्स्यादतत्त्वावेदकप्रमा । रज्जुसर्पादिविज्ञानादप्याधिक्यादमानते'त्यादिना चतुर्थस्य द्वितीयपाद इति भावः ॥ **निरस्तमिति** ॥ 'कुतः प्रमाणात् कथाऽऽदिसत्त्वाभावो भवता निश्चितः । श्रुत्यादेरिति चेदित्या'दिना निरस्तप्रायमित्यर्थः ॥ **सेति** ॥ अर्थक्रिया ॥ **श्रुतिप्रामाण्येति** ॥ नेहनानेति सर्वासत्त्वाववोधकश्रुतिप्रामाण्येत्यर्थः ॥ **इत्युक्तमिति** ॥ 'कुतः प्रमाणात्कथादीत्या'दिग्रन्थ एवेति भावः ।

या०—**सत्प्रतीतिरेव सत्तेति** । सत्ताव्यवहारहेतुर्नार्थगताऽपरा सत्ताऽस्ति । सत्ताऽवगमे सति सत्त्वाभावेन व्यवहाराभावादर्शनात् । तथा चाधिष्ठानगतैव सत्ताऽऽरोपेऽवभासते नारोप्यस्य पृथक् सत्त्व-मस्तीति केषञ्चिन्मायिनां मतमिति भावः । उक्तं हि विवरणे । 'इदन्तासंसर्गवद्रजतस्य शुक्तिकासत्तासं-सर्गोऽयमवभासते न रजतस्यापरं सत्त्वमि'ति ॥ **तस्यापीति** । वादिप्रतिवादिमध्यस्थमात्रस्यापीत्यर्थः । अत्रैवं विकल्पक्रमः । किं वादिप्रतिवादिमध्यस्थमात्रस्य बाधितावगमाभावो हेतुरुत कदाऽपि । एवं कस्यचिदपि प्रतीतिकाले बाधबोधविरहो विवक्षित उत कदाऽपीति विकल्पनीयम् ॥ **अतिप्रसङ्गादिति** ॥ व्यभिचारादित्यर्थः । तमेव दर्शयति ॥ **पुरुषत्रयेति** । पुरुषान्तरेण । तेन पुरुषत्रयेणैकक्षणावगतस्य क्षणान्तरे बाधदर्शनादिति आद्येऽप्याद्यस्य दूषणम् । आद्यस्य द्वितीयपक्षदूषणं द्वितीयस्य द्वितीयपक्षदूष-

ऽन्तर्भवति । तथा द्वितीयस्य प्रथमपक्षदूषणमपि प्रथमस्य प्रथमपक्षदूषणमिति ज्ञातव्यम् । ननु विगीत्ययो यथार्थः प्रत्ययत्वात्सम्प्रतिपन्नवदिति पुरुषत्रयावगतस्यापि सत्त्वान्न व्यभिचार इत्याशङ्क्याह **न चेति** । द्वौ च त्रयश्च द्वित्रास्त आदयो येषां ते द्वित्रादयः । ते च ते पुरुषास्तन्मात्रस्य या पूर्वाता तस्यार्थस्य प्रतीतिरित्यर्थः । तथा चात्र प्रतीतिसत्त्वसाधने सिद्धसाधनम् । अर्थसत्त्वसाधने बाधरोध इति भाव इत्याहुः । पुरुषत्रयावगतस्येत्यादेरुदाहरणं तु कथाकाले योगाचारसौत्रान्तिकवैभाषित्रयावगतस्य स्वरसंभङ्गुरत्वस्य वाद्यन्तरेण बाध्यतादर्शनात् । तथा पुरुषत्रयस्य शुक्तिकायां रजतभ्रमे ालान्तरे तस्यैव विशेषदर्शनेन बाधदर्शनादित्याद्यूह्यम् ॥ **द्वितीयः पक्ष इति** । द्वितीयस्य द्वितीयक्ष इत्यर्थः ॥ **प्रतीतेरिति** । अन्यथा ज्ञेयवज्ज्ञानस्याप्यसत्त्वे शून्यवादप्रसङ्ग इति भावः । ननु ज्ञेयज्ज्ञानस्यापि बाध्यत्वे शून्यवादो युक्त एवेत्यत आह ॥ **न हीति** । नन्वसिद्धो बाधाभाव इत्यत आह रित **चेदिति** । न शून्यवादसम्भव इति भावः । ननु बाधरूपप्रतीतेः पारमार्थिकत्वेऽपि तद्बाधिताया यदादिप्रतीतेर्न पारमार्थिकत्वमित्यनवस्थातादवस्थ्यमित्यत आह ॥ **न चेति** । विज्ञानतत्त्वाखण्डत्वादिति भावः । नन्विदं विज्ञानवादिनां मतं न वेदान्तिनाम् । तन्मते ब्रह्मण एव परमार्थरूपत्वेन विज्ञानस्यापि पारमार्थिकत्वे सदद्वैतभङ्ग इत्यत आह ॥ **विज्ञानं ब्रह्मैवेति** ॥ 'विज्ञानमानन्दं ब्र'ति श्रुत्या विज्ञानब्रह्मणोरैक्यावगमान्न ब्रह्मैव परमार्थसदित्यस्य भङ्ग इति भावः । 'सत्यं ज्ञानमनन्तं ह्म'ति श्रुत्या ब्रह्मणो विज्ञानात्मकताया उक्तत्वान्नाद्वैतहानिरिति भावः । ननु वेदान्तिमते कथं यदादिज्ञानानां ब्रह्मात्मकत्वमिति चेत् । उच्यते । तन्मते सर्वत्र वृत्तिप्रतिबिम्बितचैतन्यमेव ज्ञानत्युच्यते न केवलमन्तःकरणपरिणामरूपं जडम् । तस्याज्ञाननिवर्तकत्वाद्यभावेन ज्ञानशब्दावाच्यात् । तथाच ज्ञानशब्दवाच्यान्तर्गतविशेष्यं विशेषणांशत्यागेन सर्वत्रानुस्यूतं ब्रह्मरूपमेवेति काऽत्र थन्ता । उक्तं च सर्वार्थज्ञानानामैक्यं सङ्क्षेपशारीरकटीकायाम् । 'सर्वेष्वर्थेषु यत्स्फुरणमवभासते त्तदर्थविशेषितबुद्धिवृत्तिविशिष्टं सत् ज्ञानशब्दवाच्यं भवति । तदेव तत्तदर्थाकारबुद्धिविशेषणांशापानानुगम्यमानं प्रकाशमात्रस्वभावं ज्ञानशब्दस्य लक्षणं भवती'ति ॥ **बाधकभेदेनेति** ॥ ब्रह्मज्ञानतदिरज्ञानलक्षणबाधकभेदेन सत्त्वेन प्रतीयमानमेव द्विविधमित्यर्थः ॥ **अग्रे निराकरिष्यत इति** ॥ दीर्घभ्रान्तिकरी चेत्स्यादतत्त्वावेदकप्रमे'त्यादिना चतुर्थे निराकरिष्यत इत्यर्थः ।

श्री०—— **सत्प्रतीतिरेव सत्तेति** ॥ नार्थसत्ताऽस्तीत्यर्थः । अद्वैतहानिं परिहरति ॥ **न च** **तीतेरिति** ॥ ब्रह्मस्वरूपाद्भेदो न चेत्यर्थः । नन्वब्रह्मज्ञानाद्बाधवैधुर्ये ब्रह्मज्ञानबाध्यत्वप्राप्त्या कथं ानादिव्यवहारः । प्रत्यक्षादेर्लौकिकः प्रामाण्यव्यवहारश्चेत्यत आह ॥ **कतिपयेति** ॥ अब्रह्मज्ञानिना-

[illegible]

बाधविलम्बेनेति यावत् । हानादिव्यवहारनिर्वाहकत्वेन प्रामाण्यव्यवहारः प्रतीयते । तथा च ब्रह्मज्ञानबाध्यविषयकत्वेन प्रत्यक्षादेरतत्त्वावेदकं प्रामाण्यमिति भावः ॥ **आद्ये प्रागुक्तेति** ॥ व्यावहारिकसत्त्वमसत्प्रभेद एवेत्यङ्गीकृतं चेत्तर्हि कथाऽङ्गभूतप्रमाणादीनां व्यावहारिकसत्त्वाङ्गीकारेऽपि असत्त्वस्यैव प्राप्त्या साधकत्वं न स्यादिति प्रागुक्तदोषानिस्तार इत्यर्थः । ननु व्यावहारिकसत्त्वमसत्प्रभेद एव । न चोक्तदोषः । प्रमाणादिकं सदिति ज्ञानमात्रेण कथाङ्गत्वोपपत्त्या साधकत्वोपपत्तिरित्यत आह ॥ **न हीति** ॥ **पीयूषतयेति** ॥ 'पीयूषममृतं सुधेत्य'भिधानात् । तदर्थक्रियां जीवनरूपम् । व्यावहारिकसत्त्वस्यासत्प्रभेदत्वेऽपि ब्रह्मज्ञानबाध्यत्वेन बाधविलम्बसद्भावाद्व्यावहारिकसतां प्रमाणादीनां साधकत्वमित्यत आह ॥ **बाध्येति** ॥ **अर्थेति** ॥ बाधविलम्बेऽपि प्रमाणादीनामर्थानामसत्त्वरूपत्वं तावन्न निवर्तते । तथाच साधकत्वं न सम्भवतीति भावः । प्रमाणादीनामसत्प्रभेदरूपव्यावहारिकसत्त्वेऽपि साधकत्वं प्रमाणादिप्रतीतेः पारमार्थिकत्वादित्युक्तत्वादिति चेत्तत्राह ॥ **एवमिति** ॥ सत्यता अप्रयोजिकेति लिङ्गविपरिणामेनानुवर्तते ॥ **शुक्तीति** ॥ एतावन्तं कालं रजतज्ञानमासीदित्यनुभवेन शुक्तिरजतज्ञानस्वरूपस्यापि सत्यत्वादिति भावः ॥ **तथैवेति** ॥ बाधविलम्बप्रयुक्तो लौकिको हानादिनिर्वाहत्वव्यवहारः प्रामाण्यव्यवहारश्च भवति ब्रह्मज्ञानबाध्यविषयकत्वेनातत्त्वावेदकप्रामाण्यव्यवहारश्च प्रतीयत इति यदुक्तं तदित्यर्थः । प्रमाणादीनामसत्प्रभेदरूपव्यावहारिकसत्त्वाङ्गीकारे साधकत्वानुपपत्तिरसतोऽर्थक्रियाकारित्वाभावादित्युक्तमयुक्तम् । स्यादिदम् यद्यर्थक्रिया सती स्यात् । न चैवं । अर्थक्रियाया अप्यसत्त्वाङ्गीकारादित्यत आह ॥ **अर्थक्रियाऽपीति** ॥ **निरस्तमिति** ॥ नेह नानेति श्रुतिप्रामाण्यसिद्धौ सर्वासत्त्वसिध्या तदन्तर्गतार्थक्रियाया अप्यसत्त्वसिद्धिस्तत्सिद्धौ प्रत्यक्षादिप्रमाणविरोधाभावेन श्रुतिप्रामाण्यसिद्धिरित्यन्योन्याश्रयचक्रकादिना निरस्तमित्यर्थः । सतः परमार्थसतो ब्रह्मणः । अर्थक्रिया तत्कारित्वम् । निष्क्रियत्वं 'निष्क्रियं निष्कल'मित्यादिश्रुतेरिति भावः । असति व्यावहारिके प्रत्यक्षादौ । साऽर्थक्रिया । तत्कारित्वमित्यर्थः । परिशेषादिति भावः । एवंच कथाऽङ्गभूतप्रमाणादेः सत्यत्वाभावेऽपि साधकत्वं युक्तमिति हृदयम् ॥ **श्रुतीति** ॥ नेहनानेति श्रुतेः सर्वासत्त्वरूपार्थे प्रामाण्यनिश्चयेत्यर्थः ॥ **एवं तदिति** ॥ सतोऽर्थक्रियाऽसम्भवादित्युक्तपरिशेषकरणमित्यर्थः ॥ **प्रागिति** ॥ सर्वासत्त्वरूपार्थे नेह नानेति श्रुतेः प्रामाण्यनिश्चयात्प्रागित्यर्थः ॥ **अन्योन्याश्रयेति** ॥ श्रुतिप्रामाण्यनिश्चये परमार्थसतोऽर्थक्रियाकारित्वासिध्या कथाङ्गभूतप्रमाणादेरसतोऽपि साधकत्वसिद्धिस्तत्सिद्धावसत्त्वे साधकत्वं न स्यादिति तर्कस्याभासत्वसिध्या तद्विरोधाभावेन श्रुतिप्रामाण्यनिश्चय इत्यन्योन्याश्रय इत्यर्थः ।

च०— इवेति वतेरर्थकथनम् ॥ व्यर्थं चेति ॥ सदन्तराव्यावर्तकत्वादिति भावः ॥ जल-
तेति ॥ तत्राप्यवगमसद्भावादिति भावः । बाद्यादित्रितयावगतत्वं सत्यतायामतन्त्रमित्याह ॥
चासावर्थ इति ॥ द्वितीयः पक्ष इति ॥ पुरुषान्तरीयकालान्तरीयबाधबोधविरहाख्य इत्यर्थः ।
बाधरूपैव । आद्यं मायोपाधिकं द्वितीयमविद्योपाधिकम् । बाधकभेदेन चरमान्तःकरणवृत्तितदितर-
बाधकभेदेन । बाधविलम्बः अखण्डार्थनिष्ठवेदान्तवाक्यजन्यनिष्प्रकारकब्रह्मप्रमारूपबाधविलम्बः ॥
निराकरिष्यत इति ॥ 'दीर्घभ्रान्तिकरी चेत्स्या'दित्यादिनेति पूरणीयम् ।

अनु०— सत्त्रैविध्यं च मानेन सिद्ध्येत्केनेति पृच्छ्यते ॥
तस्याप्युक्तप्रकारेण नैव सिद्धिः कथञ्चन ॥
वैलक्षण्यं सदसतोरप्येतेन निषिध्यते ॥

सु०— द्वितीयं दूषयति ॥ सत्त्रैविध्यं चेति ॥ केनेत्यस्य परमार्थसता वा व्यावहा-
कसता वा प्रातिभासिकसता वा । आद्येऽपि किमात्मेतरेणोताऽऽत्मनेत्यर्थः । पृच्छ्यतेऽस्माभि-
ति शेषः । यथा मिथ्याभूतस्य साधकत्वं केन सिद्ध्येदिति पृष्टं तथेति चार्थः । व्यावहा-
कसतः साधकत्वसिद्ध्ये यदुपन्यस्तं तच्चेति वा । पृच्छाविषयत्वमेव न दोष इत्यत आह ॥
ापीति ॥ असतः साधकस्येव तस्य सत्त्रैविध्यस्यापि कथञ्चन विकल्पितपक्षेषु कस्मिंश्चन पक्षे
सिद्धिः । कुतः । उक्तप्रकारेणैव । तथा हि । न तावत्परमार्थसताऽऽत्मेतरेण । द्वैता-
पत्तेः । नाप्यात्मनैव । तस्य निर्विशेषस्य साधकताऽयोगात् । व्यावहारिकप्रातीतिकयोस्तु
रूपमेवाद्यापि न सिद्धमिति । नामुख्यं सदसन्नापि सत् । येनोक्तदोषप्रसङ्गः । किन्त्वनि-
चनीयम् । न च तदपि दुर्वचम् । सदसद्वैलक्षण्यस्यैव तत्त्वात् । तच्चोक्तविधया व्यावहा-
कप्रातिभासिकभेदाद् द्विविधम् । तत्र व्यावहारिकस्य प्रपञ्चस्य सदसद्विलक्षणस्य सद्विलक्ष-
त्वादुपपन्नं श्रुत्यादिना मिथ्यात्वसमर्थनम् । असद्विलक्षणत्वात्तदन्तर्गतस्य प्रमाणादेः
धकत्वं चेति । स्यादेतदेवं कथञ्चिद्यदि विश्वस्य सदसद्विलक्षणत्वं स्यात् । तदेव न सिद्ध्य-
त्याह ॥ वैलक्षण्यं सदसतोरिति ॥ विश्वस्येति शेषः । सदसतोरिति संबन्धमात्रे षष्ठी ।
ा च सदसद्भ्यामित्यर्थः ॥ एनेन । प्रमाणविकल्पनिरासेन । तथा हि । विश्वस्य सदस-
क्षण्यं किं सता प्रमाणेन साध्यते । उतासता । अथ सदसद्विलक्षणेन । नाद्यः । वादिनो-
ुपपत्तेः । न द्वितीयतृतीयौ । प्रतिवादिनोऽसंप्रतिपत्तेरिति । नन्वत्र सदसद्वैलक्षण्ये

साधकत्वं न स्यादिति प्रसङ्गो वाच्यः । न च तत्र व्याप्तिः । मैवम् । साक्षिणि व्याप्त्यवधारणोपपत्तेः । सत्त्वाभावे साधकत्वं न स्यादिति वा प्रसङ्गं वक्ष्यामः । तत्रासत्त्वमुपाधिरिति चेन्न । तस्य सत्त्वाभावानतिरेकात् । तद्भङ्गस्य च प्रागनिर्वचनीयसिद्धेरशक्यत्वात् । एतेन सद्विलक्षणत्वान्मिथ्यात्वोपपादनमसद्विलक्षणत्वात्साधकत्वं चोपपन्नमिति परास्तम् । सद्वैलक्षण्येऽसत्त्वापत्त्या साधकत्वाभावस्यासद्वैलक्षण्ये च सत्त्वापातेन मिथ्यात्वोपपादनस्यासंभवस्यापत्तेः । प्रागनिर्वाच्यसिद्धेर्व्याप्तिद्वयनिरासायोगात् । असद्वैलक्षण्यमात्रेण हानादिव्यवहारोपपत्तौ शुक्तिरजतादावपि तत्प्रसङ्गः । मायाऽविद्यावैलक्षण्यान्नैवमिति चेन्न । तस्य निराकरिष्यमाणत्वात् । वैलक्षण्यमात्रस्य प्रकृतानुपयोगादिति । आस्तां वा सत्त्वादिविकल्पनिरासेन दूषणाभिधानम् । प्रमाणमेव प्रपञ्चानिर्वचनीयतायां नोपपद्यते । न हि नेहनानेत्यादिश्रुतिः सदसद्वैलक्षण्यलक्षणानिर्वचनीयतां विश्वस्य वक्ति ।

वाक्यार्थचन्द्रिका — अत्र केनेत्यस्य प्रत्यक्षादिपरत्वे पूर्वं प्रत्यक्षाद्यनिरासात्तस्यापीत्युत्तरदूषणासङ्गतिः । सता मिथ्याभूतेन वेति पूर्वोक्तप्रकारपरत्वे मिथ्याभूतस्य साधकत्वासम्भवेऽपि सत्येवावान्तरभेदेन सत्त्रैविध्यमङ्गीकृत्य तादृशसतः साधकत्वमुच्यत इति ब्रुवाणं प्रति मिथ्याभूतेनेत्यस्या विकल्पकोटेरनुपपन्नत्वात्पराभिप्रेतव्यावहारिकप्रातिभासिकयोर्विकल्पकोटावसङ्ग्रहापत्त्या च साधकतया पराभिप्रेतत्रिविधसतामेव सत्त्रैविध्यसाधकविकल्पकोटित्वमुचितमित्यभिप्रेत्य केनेत्यस्यार्थमाह ॥ **केनेति** ॥ कर्त्रनुक्तेर्योग्यकर्तारमध्याहरति ॥ **पृच्छ्यत इति** ॥ नन्वेतादृग्विकल्पानां पूर्वमप्रवृत्ततया समुच्चायकचशब्दानुपपत्तिरित्यत: प्रमाणविकल्पप्रश्नत्वसामान्येन समुच्चय इत्याशयेन समुच्चयविषयं दर्शयति ॥ **यथेति** ॥ अत एव पक्षान्तरमाह ॥ **व्यावहारिकेति** ॥ एकेनैव सिद्धेः, एवेति कथञ्चनेत्यनयोरन्यतरवैयर्थ्यमित्यत आह ॥ **विकल्पितेति** ॥ सता चेदद्वैतसिद्धिः स्यादित्युक्तप्रकारं मनसि निधाय न तावदिति ॥ 'अविशेषस्य साध्या साधकता पुनरि'त्युक्तप्रकारकथनं तस्येति । 'न सिद्धं चान्यसाधनमि'त्यस्य न पूर्ववन्मिथ्याभूतस्य साधनत्वं न सिद्धमिति धर्मनिषेधोऽत्रार्थोऽपि तु साधनत्वेन त्वदभिमतव्यावहरिकप्रातिभासिकस्वरूपमेवासिद्धमिति धर्मिनिषेध इत्याशयेनाह ॥ **स्वरूपमेवेति** ॥ **अद्यापीति** ॥ सत्त्रैविध्यसाधकतया सत्त्रैविध्यस्योपन्यासे आत्माश्रयादीति ध्वनयति । ननु मिथ्याभूतस्य साधकत्वनिरासावसरे विश्वसदसद्वैलक्षण्यस्य निरासोऽसङ्गत इत्यतस्तस्यापि साधकत्वोपपादकतया पराभिप्रेतत्वान्न तन्निरासासङ्गतिरित्याशयेन पराभिप्रायमुद्घाटयति ॥ **नामुख्यमिति** ॥ **किन्त्विति** ॥ यद्यप्यत्र किन्तु सदसद्विलक्षणमित्युक्तौ लाघवं तथाऽप्यनिर्वचनीयत्वं तृतीयः प्रकार इति परेषां

यवहारादनिर्वचनीयलक्षणान्तरनिरासेन परेण सिद्धान्तितस्य सदसद्विलक्षणत्वज्ञानबाध्यत्वरूपलक्षणद्वयस्य निरासपरतयोत्तरभाष्यस्यावतारयिष्यमाणत्वेन तदुपक्षेपाय च गौरवमाश्रितमिति ध्येयम् । अत्र सदसद्विलक्षणत्वस्य साधकत्वाद्युपयोगितया कथनात्तत्र विभागाकथने शुक्तिरजतादेरपि साधकत्वापातेनापसिद्धान्तापत्त्या सदसद्विलक्षणविशेषस्यैव साधकत्वं वक्तुं तद्द्वैविध्यमाह ॥ तच्चेति ॥ ननु सदसद्वैलक्षण्यस्य साधकत्वाद्युपयोगानिरासकत्वादुत्तरभाष्यमसङ्गतमित्यतः स्वरूपनिषेधस्यापि तदर्थत्वान्नासङ्गतिरित्याशयेनाह ॥ स्यादिति ॥ सदसद्वैलक्षण्यसिद्धावपि तस्य साधकत्वाद्युपयोगाभावस्यैतेनेत्यादिना वक्ष्यमाणत्वात्कथञ्चिदित्युक्तम् । सदसतोः परस्परवैलक्षण्यस्य सिद्धान्ततया, प्रकृतानुपयोगाच्च तन्निषेधोऽनुपपन्न इत्यत आह ॥ विश्वस्येति शेष इति ॥ 'अन्यारादितरर्ते' इत्यत्रान्य इत्यस्यार्थग्रहणत्वात्पञ्चमीप्राप्त्या षष्ठीनिर्देशायोग इत्यत आह ॥ सदसतोरितीति ॥ कर्तृत्वादिषट्कारकविवक्षायां तत्तद्विभक्तितद्व्यतिरिक्तसम्बन्धविशेषविवक्षायामेवोपपदविभक्तेः प्राप्त्या, प्रकृते च कर्तृत्वादिवत्सम्बन्धान्तरस्य विशिष्याविवक्षया सम्बन्धसामान्यस्यैव विवक्षणात् षष्ठ्युपपत्तिरिति भावः । सत्तात्रैविध्यस्यास्मिन्पक्षे अभ्युपगमेन पारमार्थिकव्यावहारिकप्रातिभासिकत्वादिविकल्पानां प्रकृतेऽसम्भवेन तन्निरासदूषणातिदेशासम्भवात्पूर्वत्रेवात्रापि प्रमाणविकल्पनिरासान्सामान्येऽतिदेश इत्याशयेनाह ॥ एतेनेति ॥ अत एवात्रोपयुक्तं प्रमाणविकल्पप्रकारं दर्शयति ॥ तथा हीत्यादिना ॥ अनुपपत्तेरिति ॥ आत्मतदितरपक्षोक्तदूषणद्वयस्य निर्विशेषसाधकत्वासम्भवाद्वैतहानिरूपस्यापत्त्योभयविधसत्पक्षानुपपत्तेरित्यर्थः ॥ असम्प्रतिपत्तेरिति ॥ उक्तरीत्याऽसत्साधकत्वस्य व्यावहारिकादिवत्सदसद्विलक्षणस्वरूपस्यैवासिद्धतया सदसद्विलक्षणसाधकत्वस्य चासम्प्रतिपत्तेरित्यर्थः । असम्प्रतिपत्तेरित्यनेनाभिप्रेतं प्रसङ्गं शङ्कामुखेन दर्शयंस्तत्रानुपपत्तिं शङ्कते ॥ नन्विति ॥ व्याप्तीति ॥ साधकत्वं सतस्तेनेति साक्षिणः साधकत्वोपपादनात्तत्र व्यतिरेकव्याप्त्यवधारणोपपत्तेरित्यर्थः । असत्त्वसदसद्वैलक्षण्यरूपपक्षद्वये पृथक् प्रसङ्गमभिप्रेत्य पराङ्गीकारेण द्वितीये साक्षिणि व्यतिरेकव्याप्त्या समाधायाधुना पक्षद्वयेऽप्येकरूपमेव प्रसङ्गं मनसि निधायाविशेषस्येत्युक्तरीत्या पराङ्गीकारस्यायुक्तत्वात्साक्षिणि व्याप्त्यवधारणासम्भवेऽप्यसत्येवान्वयव्याप्त्यवधारणं सुकरमित्याशयेन पक्षान्तरमाह ॥ सत्त्वाभाव इति ॥ यद्वा सदसद्वैलक्षण्यपक्ष एव पर्यवसानमसत्यन्वयव्याप्तिप्रदर्शनायाह ॥ सत्त्वाभाव इति ॥ यद्यसत्त्वं नाम सत्त्वाभावस्तदाऽऽपादनातिरिक्ततया नोपाधित्वम् । यदि चासत्त्वमत्यन्ताभावप्रतियोगित्वं तदा तस्य सत्त्वाभावरूपापादनातिरेकस्याभाववत्त्वमात्रः । एवं चापादकव्यापकत्वान्नोपाधित्वमित्याशयेनाह ॥ तस्येति ॥ ननु सत्त्वाभाववत्यनिर्वचनीयेऽप्रतोऽसत्त्वस्य न तद्व्याप्यत्वं नापि तद्व्यापकत्वमित्यतोऽन्योन्याश्रयतया नैतदुपपद्यत इत्याह ॥ तद्भङ्गस्येति । सदद्वैलक्षण्यसिद्धावपि न साधकत्वादिसिद्धिः प्रत्युत वैपरीत्यमेवेत्याह

॥ एतेनेति । प्रमाणविकल्पनिरासकतर्के प्राप्तोपाधिनिरासाय सत्त्वाभावस्यासत्त्वव्याप्तिप्रतिपादनेनेत्यर्थः । असद्वैलक्षण्ये सत्त्वप्राप्तिरपि तुल्यन्यायतया तद्बललब्धैवेति द्रष्टव्यम् । अनेनैतेनेति प्रतिपादितप्रमेयमपि भाष्यसूचितमेवेति ध्वनयति । एवमसद्वैलक्षण्यस्य परोक्तं साधकताप्रयोजकत्वमभ्युपगम्य तस्य सत्त्वापादकतया तत्सिद्धान्तप्रतिकूलताऽभिहिता । अधुना परोक्तमसद्वैलक्षण्यस्य साधकत्वप्रयोजकत्वमेवानुपपन्नमतिप्रसङ्गादित्याह ॥ असद्वैलक्षण्यमात्रेणेति । ननु विश्वस्य मायिकत्वाच्छुक्तिरजतादेश्चाविद्यकत्वात्तन्निष्ठासद्वैलक्षण्ययोरपि तथात्वेन वैलक्षण्यमात्रत्वाभावाद्व्यवहारतदभावरूपवैलक्षण्योपपत्तिरित्याशङ्कते ॥ मायेति । अर्थक्रियासमर्थप्रपञ्चारोपहेतुर्माया विभ्रममात्रहेतुरविद्येति मायाऽविद्यावैलक्षण्यं तादृशकार्यविशेषसम्पादकतयाऽभिमतं किंवा स्वाश्रयाव्यामोहिनी माया तद्व्यामोहिन्यविद्येति अर्थक्रियासामर्थ्यतदभावरूपकार्यविशेषसम्पादकवैलक्षण्यमात्रम् । नाद्यः । प्रमाणाभावेन तादृशवैलक्षण्यस्य 'न चाप्येकत्वविज्ञानादि'त्यनुव्याख्यानव्याख्यानावसरे निराकरिष्यमाणत्वादित्याह ॥ तस्येति । न द्वितीयः । यथाकथञ्चिद्वैलक्षण्यस्य कार्ये व्यवहारसम्पादनतदभावनुपयोगेनातिप्रसङ्गानुद्धारादसद्वैलक्षण्यकथनमनुपयुक्तमित्याह ॥ वैलक्षण्यमात्रस्य चेति । यद्वाऽऽद्यपक्षमेव मायाऽविद्यावैलक्षण्यं वदतोऽभिमततया सिद्धवत्कृत्य तस्येत्यनेन दूषणमुक्तम् । उत्तरवाक्यं तु तथाऽपि ब्रह्मज्ञानबाध्यत्वतदितरबाध्यत्वाभ्यां व्यवहारनिर्वाहकत्वतदभावरूपविशेषः किं न स्यादित्यतो बाधविलम्बेऽप्यर्थतादवस्थ्यानिवृत्तेरित्युक्तरीत्या तादृशवैलक्षण्यं व्यवहाराद्यप्रयोजकमित्याह वैलक्षण्येतीति योज्यम् । ननूत्तरवाक्ये उक्तानुपपादनादसङ्गतिः । न च सदसद्वैलक्षण्येऽनुमानरूपप्रमाणनिरासायोत्तरवाक्यमिति वाच्यम् । प्रमाणसत्त्वादिविकल्पनिरासकदूषणान्यनुद्धृत्य परेण प्रमाणस्वरूपस्यानाशङ्कनीयत्वेन तन्निरासस्यानुचितत्वात् । श्रुतेरुपपत्तिविरोधकथनप्रसङ्गेऽनुमानस्यानिराकार्यत्वाच्चेत्यतोऽङ्गीकारवादेन प्रमाणस्वरूपस्यानिराक्रियमाणत्वादनुमानस्यापि श्रुतेरर्थविशेषे पर्यवसानहेतुतया पराभिमतत्वात्तद्दूषणमप्युपपन्नमेवेत्याशयेनोत्तरवाक्यमवतारयति ॥ आस्तां वेति ॥

स० — स्यादेतदेवं कथञ्चिदिति ॥ एतेन सद्विलक्षणत्वादित्यादिना दोषस्य वक्ष्यमाणत्वात्कथञ्चिदित्युक्तम् । ननु सदसतोरिति षष्ठीप्रयोगोऽनुपपन्नः । 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इत्यनेन सूत्रेणान्यार्थकशब्दयोगे पञ्चमीविधानेन प्रकृतेऽप्यन्यार्थकवैलक्षण्यशब्दप्रयोगस्य सत्त्वादित्यत आह ॥ सदसतोरिति ॥ अनुपपत्तेः असंप्रतिपत्तेः । यत्सदसद्विलक्षणं न तत्साधकमिति अन्वयव्याप्तिग्रहणस्थलाभावेऽपि यत्साधकं न तत्सदसद्विलक्षणमिति व्यतिरेकव्याप्तौ सदसद्विलक्षणत्वाभावसाधकत्वयोर्वादिप्रतिवादिसंप्रतिपत्त्या साक्षिण एव दृष्टान्तत्वं संभवतीत्याह ॥ साक्षिणीति ॥

धिः साधनव्यापकतामाह ॥ **तस्येति** ॥ असत्वस्य सत्त्वाभावं विहायावस्थानाभावात् तयोः सम-
त्वमिति यावत् । न चानिर्वचनीये सत्त्वाभावसत्त्वेऽपि असत्त्वाभावेन साधनाव्यापकतेत्यत आह ॥
ङ्गस्येति॥ सत्त्वाभावासत्त्वयोर्व्याप्तिभङ्गस्येत्यर्थः। तथा चानिर्वचनीयत्वे सिद्धे सत्त्वाभावासत्त्वयोर्व्याप्ति-
न साधनाव्यापकत्वेनासत्त्वस्योपाधित्वात् सत्त्वाभावे साधकत्वं न स्यादित्यस्मदभिमततर्कस्याभासत्व-
द्धिः । तत्सिद्धौ च विरोधाभावादनिर्वचनीयसिद्धिरित्यन्योन्याश्रय इति भावः । केचित्तु ॥ **तस्येति** ॥
ध्यापकयोरभेदादित्यर्थः । नन्वनिर्वचनीयवादिनोऽभेदोऽसिद्ध इत्यत आह ॥ **तद्भङ्गस्येति** ॥
व्याचक्षते । ननु प्रपञ्चे मायिकासद्वैलक्षण्यस्य सत्त्वेन तस्य हानादिव्यवहारनिर्वाहकत्वेऽपि शुक्ति-
ादौ असद्वैलक्षण्यस्याविद्यकत्वेन हानाद्यर्थक्रियाऽनर्हतेति शङ्कते ॥ **मायेति** ॥ **निराकरिष्यमाण-**
त् ॥ प्रथमस्य चतुर्थे । तर्ह्यल्पकालबाध्यत्वदीर्घकालबाध्यत्वरूपवैलक्षण्यं प्रयोजकमस्त्वित्यत आह ॥
क्षण्यमात्रस्येति ॥ सद्वैलक्षण्यान्मिथ्यात्वोपपादनमसद्वैलक्षण्याच्च साधकत्वमिति प्रकृतेऽनुपयोगादित्यर्थ
ख्याहुः ॥

प० — उत सत्त्येवावान्तरभेदेन सत्त्वैविध्यमितिकल्पदूषकतयाऽवतारयति ॥ **द्वितीयमिति** ॥
त्कसमुच्चयार्थत्वमुपेत्याह । **यदुपन्यस्तं तच्चेति वेति** ॥ अब्रह्मज्ञानाबाधितत्वं कतिपय-
पतृकतिपयकाले तथाऽवगतत्वं चेत्यर्थः । अपिपदार्थमाह ॥ **असत इत्यादि** ॥ **स्वरूपमेवेति** ॥
वान्तरभेदभिन्नं स्वरूपमेवासिद्धं दूरे तत्साधकत्वमित्यर्थः । विवृतमेतन्न्यायामृते सत्तात्रैविध्यभङ्गे ।
ते ॥ **नामुख्यमिति** ॥ अमुख्यं सदित्यनुवादः । नासत् नापि सदिति कोटिद्वयनिषेधः ।
न्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त' इति पञ्चमीविधिसूत्रेऽन्यइत्यर्थग्रहणोक्तेः सदसद्भ्यामिति-
यमित्यत आह ॥ **संबन्धमात्रे षष्ठीति** ॥ प्रतियोग्यनुयोगिभावमविवक्षित्वा संबन्धमात्रे 'षष्ठी शेषे'
सूत्रेण षष्ठीत्यर्थः ॥ **वादिनोऽनुपपत्तेरिति** ॥ आत्माऽतिरिक्तेन सता चेदद्वैतभङ्गात् । आत्मना
र्निर्विशेषस्य साधकत्वायोगादित्यर्थः ॥ **सत्त्वेति** ॥ सत्त्वाभावे साधकं न स्यादिति प्रसङ्गं वक्ष्यामो
मित्यर्थः ॥ **तत्रेति** ॥ सत्त्वाभावे साधकं नेत्यत्रेत्यर्थः ॥ **व्याप्तिद्वयेति** ॥ सद्वैलक्षण्येऽसत्त्वं
द्वैलक्षण्ये सत्त्वमिति व्याप्तिद्वयेत्यर्थः । असद्वैलक्षण्ये समानेऽपि मायिकत्वाविद्यकत्वाभ्यां प्रपञ्चप्राति-
सिकयोर्वैलक्षण्यान्न हानाद्यतिप्रसङ्ग इति शङ्कते ॥ **मायेति** ॥ **निराकरिष्यमाणत्वादिति** ॥
भ्रमायिकत्वादेरिति योज्यम् । 'सा मन्दद्दष्टिस्तस्यैव भ्रमणश्चेत्स्वतोऽन्यगे'त्यादिनाऽऽनुमानिकपादे
त्यधिकरण इति भावः । एके तु 'निर्विशेष' इत्यादावज्ञानखण्डनेन तदवान्तरभेदस्य निराकरिष्य-
णत्वादित्यर्थ इत्याहुः ॥

या०—शङ्कते ॥ नामुख्य सदिति ॥ उक्तविधयति ॥ बाधकभेदनेत्यर्थः ॥ संबन्धमात्रेति ॥ कर्तृत्वाद्यसंभवात् । 'षष्ठी शेषे' इत्यनेन षष्ठीति भावः ॥ साक्षिणि व्याप्त्यवधारणेति ॥ कव्याप्त्यवधारणोपपत्तिरित्यर्थः ॥ तस्य निराकरिष्यमाणत्वादिति ॥ 'न चाप्येकत्वविज्ञानाायेन मुच्यत' इत्यत्रेति शेषः । उक्तं वैलक्षण्यमङ्गीकृत्यापि दूषणान्तरमाह ॥ वैलक्षण्यमात्र- ॥ असद्विलक्षणत्वाविशेषेऽपि मायाऽविद्यारूपोपादानवैलक्षण्यमात्रस्य प्रकृतहानादिपरिहारानुपदित्यर्थः । न हि घटपटयोः सत्त्वाविशेषे उपादानवैलक्षण्यमात्रेणैकत्र हानादिव्यवहाराभावो ति भावः ॥

श्री०— द्वितीयमिति ॥ सत्येवावान्तरभेद इति द्वितीयं पक्षमित्यर्थः ॥ तच्चेति वेति ॥ प्रकृतत्वानुसंधानार्थश्चशब्द इति भावः । नन्वात्मेतरेण व्यावहारिकेण प्रातिभासिकेन वा सत्त्रैविध्यसिद्धिरस्त्वित्यत आह ॥ व्यावहारिकेति ॥ शङ्कते ॥ नेति ॥ अमुख्यं यत्सत्त् असदवान्तरभेदो न भवतीत्यर्थः । सत् पारमार्थिकम् ॥ अनुपपत्तेरिति ॥ सता चेदद्वैतभङ्गात् । चेन्निर्विशेषस्य साधकत्वायोगादित्यर्थः ॥ व्याप्तिरिति ॥ भवन्मते सदसद्विलक्षणवस्त्वभावेन भावादिति भावः । यत्सदसद्विलक्षणं न तत्साधकमित्यन्वयव्याप्तिग्रहणस्थलाभावेऽपि यत्साधकं सदसद्विलक्षणमिति व्यतिरेकव्याप्तौ सदसद्विलक्षणत्वाभावसाधकत्वयोर्वादिप्रतिवादिसंप्रतिपत्त्या एव दृष्टान्तत्वं संभवतीत्याशयेनाह ॥ साक्षिणीति ॥ व्याप्तीति ॥ व्यतिरेकव्याप्तीत्यर्थः ॥ ॥ असत्त्वस्य सत्त्वाभावरूपहेत्वभिन्नत्वेन नोपाधित्वमित्यर्थः । न हि हेतुरेवोपाधिः । साधनात्वाभावादिति भावः । नन्वनिर्वचनीयरूपतृतीयकोटिसद्भावात्सत्त्वाभाव एवासत्त्वमिति नियमभङ्ग आह ॥ तद्भङ्गस्येति ॥ ननु सद्वैलक्षण्ये च असत्त्वं असद्वैलक्षण्ये च सत्त्वमिति न व्याप्तिद्वयं निर्वचनीयरूपतृतीयकोटिसद्भावादित्यत आह ॥ प्रागिति ॥ असद्विलक्षणत्वात्साधकत्वं चोपपन्नदूषयति ॥ असदिति ॥ नन्वसद्वैलक्षण्येऽपि मायिकत्वाद्धानादिव्यवहारहेतुत्वं प्रत्यक्षादेसद्वैलक्षण्येऽप्याविद्यकत्वाच्छुक्तिरजतादेर्न हानादिव्यवहारहेतुत्वमित्याशङ्कते ॥ मायेति ॥

च०— द्वितीयमिति ॥ सत्येवावान्तरभेदेनेति द्वितीयकल्पमित्यर्थः ॥ न च तदपीति ॥ चनीयमित्यर्थः । तत्त्वात् अनिर्वचनीयरूपत्वात् । अन्यारादिति पञ्चमीविधायकसूत्रेऽन्य इत्यर्थमित्याकारे व्यक्ततया निरूपकताप्रत्यासत्त्या भावप्रत्ययान्तोपस्थाप्यभेदान्वयिप्रतियोगित्वार्थिकया पदप्रकृतिकपञ्चम्या भवितव्यमिति कथं षष्ठी विन्यस्तेत्यत आह ॥ संबन्धमात्र इति ॥ प्रति-

[illegible] । [illegible] सत्त्वरूपव्यापकधर्मावच्छिन्नप्रकारकताघटितधर्मावच्छिन्नजन्यताशालित्वान्वय-बोधतात्पर्यिका 'शेषे' इति लक्षणलक्षिता षष्ठ्येवेति भावः ॥ **व्याप्तीति** ॥ प्रकृतापादकव्यतिरेकनिरूपिताऽऽपाद्यव्यतिरेकनिष्ठाव्याप्तीत्यर्थः । तद्भङ्गस्य तत्प्रभेदस्य । तत्प्रसङ्गः हानादिव्यवहारप्रसङ्गः ॥ **निराकरिष्यमाणत्वादिति** । तुरीयपादे, प्रकृतिनये, 'सा मन्ददृष्टिस्तस्यैवे'त्यादिना, प्रतिविधास्यमानत्वादित्यर्थः । वैलक्षण्यमात्रस्य । उपादानवैलक्षण्यमात्रस्य । प्रकृतानुपयोगात् । शुक्तिरजतादौ तत्प्रसञ्जनापनोदकत्वात् ।

अनु० — वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिनः ॥
असतश्चापि विश्वस्य तेनानिष्टं कथं भवेत् ॥

सु० — अथ मन्येत । विवादपदं सदसद्विलक्षणं ज्ञानबाध्यत्वाद्यदेवं तदेवं यथा शुक्तिरजतमित्यनुमानं विश्वस्य सदसद्विलक्षणत्वे मानम् । तद्बलाच्छ्रुतिरपि तत्रैव पर्यवस्यतीति । तदसत् । अनुमानस्याऽऽभासत्वादित्याशयवान्प्रथमप्राप्तत्वात्प्रतिज्ञां तावन्निराकरोति ॥ **वैलक्षण्यं सतश्चेति** ॥ चशब्दाववधारणे । अपिशब्दौ मिथः समुच्चये । अयमर्थः । किमत्र सदसच्छब्दौ भावाभाववाचिनौ । किंवा विद्यमानाविद्यमानवाचिनौ । आद्ये दूषणम् । सतो भावात्मकस्य विश्वस्यासतोऽभावाद्वैलक्षण्यमपि भावाभावभेदवादिनो मम मते स्वयं सदस्त्येव । एवमसतोऽभावात्मकस्य विश्वस्य सतो भावाद्वैलक्षण्यमपि भेदवादिनः स्वयं सदेव । अतस्तेन साधितेन ममानिष्टं कथं भवेत् । किं त्वामैवं विभागेन सदसद्वैलक्षण्यसिद्ध्याऽपि प्रतिज्ञातार्थसिद्धेरर्थान्तरता परस्य स्यादिति ॥ १ ॥ यदि च प्रत्येकं भावाभाववैलक्षण्यं विवक्षितम् । तदा सतो भावस्यापि विश्वस्य सतो भावाद्वैलक्षण्यं भावभेदवादिनो मम स्वयं सदेव । भावान्तरवैलक्षण्याङ्गीकारात् । असतोऽभावादपि वैलक्षण्यं सुतरां भावाभावभेदवादिनः स्वयं सदेव । एवमसतोऽभावस्य विश्वस्यासतोऽभावाद्वैलक्षण्यमभावभेदवादिनः स्वयं सदेव । अभावान्तरवैलक्षण्याङ्गीकारात् । सतो भावाद्वैलक्षण्यमपि सुतरां स्वयं सदेवेति तेनानिष्टं कथं भवेत् ॥ २ ॥

वा — समुच्चयस्यैकेनैव सिद्धेश्चापिशब्दयोरुभयोर्न प्रयोजनमित्यत आह ॥ **चशब्दावित्यादिना** ॥ सदसद्वैलक्षण्यशब्दार्थतया प्रसक्तसकलपक्षनिराकरणार्थतया मूलं व्याख्यातुमाह ॥ **अयमिति** ॥

अन्तर्भवतश्च समानार्थतया मूलसाधर्म्यम् सुवत्यादिधातुव्याख्यानसिद्धत्वाद्भवतीति भाव इति भूधातु-
निष्पन्नभावशब्दस्यास्तीति सदित्यसधातुनिष्पन्नसदित्यस्य चैकार्थत्वाद्भावशब्दरूढविधिरूपार्थेनाप्येकार्थत्व-
माश्रित्य सच्छब्दस्य भावार्थत्वेऽसच्छब्दस्याभावार्थत्वमित्याशयेनाद्यकल्पः । सच्छब्दस्य विद्यमानार्थक-
तया प्रसिद्धेरसच्छब्दस्य विद्यमानार्थकत्वमित्याशयेन द्वितीयः । प्रथमे प्रागभावादीनामसच्छब्दार्थत्वं
द्वितीये तेषामपि सच्छब्दार्थकोटिनिवेशाच्छशविषाणादीनामसच्छब्दार्थत्वमिति विवेकः । तत्र प्रथम-
कल्पसम्भावितानेककल्पदूषणपरतया मूलं योजयितुं प्रतिजानीते ॥ **आद्य इति** ॥ अत्र पृथिव्यादिविलक्षण-
बीजआदिरूपद्रव्यान्तरस्येव भावाभावातिरिक्तविश्वस्य प्रतिवादिनोऽसम्मतेस्तदात्मकस्य च भावभाववि-
लक्षणत्वसाधनेऽनिर्वचनीयत्वसिद्धिरिति पराशयं सिद्धवत्कृत्योत्तरदूषणानां प्रवृत्तिरिति ज्ञेयम् । विजातीय-
मित्यादौ विशब्दस्य भिन्नार्थकतया प्रसिद्धेर्विलक्षणशब्दस्य भिन्नस्वरूपार्थकत्वादन्याराादितरर्त इत्यत्रान्य-
त्यर्थग्रहणं विलक्षणो देवदत्तो यज्ञदत्तादित्यभियुक्तव्याख्यानाच्च वैलक्षण्यशब्दाद्भेदप्रसक्तिः । व्युध्य-
र्थाभावेत्यत्र विशब्दस्याभावपरतया तद्व्याख्यानात् भावाभावविलक्षणशब्दभावाभावलक्षस्य णाभावपरत्वे
लक्षणस्य च सन्निधानात्तच्छब्दोपस्थितस्यैव ग्रहणेन भावाभावत्वानधिकरणत्वस्य तच्छब्दात्प्रसक्तिः। उभय-
त्रापि भावाभावसमुदाये भावाभाववैलक्षण्यसाधनमुत भावात्मके उभयवैलक्षण्यसाधनमभावात्मके च विश्व-
स्मिन्नुभयवैलक्षण्यसाधनमिति प्रत्येकं वा । भेदपक्षे आद्यं निराकरोति ॥ **सत इति** ॥ अस्मिन्पक्षे सतो-
ऽसतो भेदवादिनो वैलक्षण्यं स्वयं सदेवेत्यादीनां द्विरावृत्तिः सूचिता भवति । वस्तुन एकं प्रति सतेऽन्यं
त्यसत्त्वानुपपत्तेर्भेदवादिनः स्वयं सदित्यनुपपन्नमित्यतोऽभ्युपगमाभिप्रायेणेयमुक्तिरित्याशयेन मन
त्युक्तम् । स्वयमिति परकीयोपपादनानपेक्षामाह । भावाभाववैलक्षण्यस्य स्वमतसिद्धत्वोपपादनायोपात्तस्य
भेदवादिन इत्यस्य तेनानिष्टमित्यत्र प्रयोजनाभावात्तद्बलल्लब्धविशेष्यस्यैवात्रान्वय इत्याशयेन ममानिष्ट-
मित्युक्तम् । अत एव पूर्वं ममेत्यध्याहृतमिति द्रष्टव्यम् । सदसद्वैलक्षण्यासिद्धिं विना प्रतिज्ञातार्था-
सिद्धेस्तदभ्युपगमस्तव कथं नानिष्ट इत्याशयेन शङ्कते ॥ **किं नामेति** ॥ यद्वा ॥ अनुमाने दूषणा-
नुक्तेर्मदिष्टसिद्धिरेव तवानिष्टमित्याशङ्कते ॥ **किं नामेति** ॥ विभागेनेत्येतत्कल्पस्फुटीकरणम् ॥ १ ॥
भेदपक्षे द्वितीयं निराकरोति ॥ **यदि चेति** ॥ अस्मिंश्च पक्षे सतोऽसत इत्यस्य त्रिरावृत्तिर्भेदवादिनो
वैलक्षण्यमित्यस्य चतुर्वारमिति ज्ञेयम् । भावस्य भावाद्भेद एवानुपपन्न इत्यतो हेतुमुपपादयति ॥
भावान्तरेति ॥ सजातीयभाववैलक्षण्याभ्युपगमे विजातीयाभाववैलक्षण्याभ्युपगमस्य कैमुत्यसिद्धतां
सूचयितुं सुतरामित्युक्तम् । एवमुत्तरत्रापि द्रष्टव्यम् । अत्रोत्तरोत्तरपक्षाणां पूर्वपूर्वपक्षोक्तदोषोपमर्देन
प्रवृत्तेः स्फुटमेव क्रमनिमित्तम् । अत्र तेनानिष्टं कथं भवेदित्यतः परं दूषणोपपादनाभावस्थलेऽर्थान्तरतया
निग्रहोऽभिमतो द्रष्टव्यः ॥ २ ॥

प० - यदि च प्रत्येकं भावाभाववैलक्षण्यमिति ॥ भावस्य भावादभावाच्च वैलक्षण्यमभावस्या-
द्भावाच्च वैलक्षण्यमित्यर्थः । सत इत्यस्यासत इत्यस्य चावृत्त्या पञ्चम्यन्तत्वषष्ठ्यन्तत्वाभ्युपगमेन
यति ॥ तदा सतो भावस्येत्यादिना ॥

श्री०— प्रत्येकमिति ॥ एकस्यैव भावरूपस्यैव प्रपञ्चस्य भावाभाववैलक्षण्यम् । एवमेकस्यै-
ावरूपस्य प्रपञ्चस्य भावाभाववैलक्षण्यं विवक्षितमित्यर्थः ॥

च०— अर्थान्तरता परस्य स्यादिति ॥ प्रकृतपक्षतावच्छेदकीभूतविमतिविषयत्वसामानाधि-
येन भावेऽभाववैलक्षण्यमभावे च भाववैलक्षण्यमवगाहमानायाः अनुमितेः द्रव्यत्वसामानाधिकरण्येन
वीत्वतदभावविषयकप्रतीतिवदुपपत्त्यैकस्यां व्यक्तौ तादृग्वैलक्षण्यद्वयविषयकतदभिमतानुमितेरसिद्ध्या
पृथिवीत्वतदभाववदित्यनुमिमानस्येवार्थान्तरतेत्याशयः । इयं च प्रथमयोजना ॥ विमतिविषयीभूतां
रूपामभावरूपां वैकैकां व्यक्तिं पक्षीकृत्य भाववैलक्षण्याभाववैलक्षण्योभयत्वावच्छिन्नसाधनान्न पक्षीकृत-
कभेदेन साध्यीभूतप्रातिस्विकांशसत्वेन तत्पर्यवसाननियन्त्रिनार्थान्तरताऽवकाश इत्याशङ्कायामेवमपि
प्रन्तरेणोक्तत्वादवश्यमभिधत्ते यदि चेत्यादिना भवेदित्यन्तेन । इयं च द्वितीया ॥

सु०— भावाभाववैलक्षण्यं नाम तत्त्वानधिकरणत्वं विवक्षितमिति चेत् । तथाऽपि
भावस्यापि विश्वस्यासतोऽभावाद्वैलक्षण्यमभावत्वानधिकरणत्वमपि स्वयं सदेव । असतो-
वस्य विश्वस्य सतो भावाद्वैलक्षण्यमपि भावत्वानधिकरणत्वमपि मम स्वयं सदेव । भावा-
भेदवादित्वात् । यदि हि भावेऽप्यभावत्वमभावेऽपि भावत्वमङ्गीकुर्यां कुतस्तदा भावाभाव-
वादः । तथा च कथं तेन साध्यमानेनानिष्टं मम भवेत् ॥ ३ ॥ अथ प्रत्येकं भावाभाव-
नधिकरणत्वं विवक्षितमिति मन्येत । तदा सतो भावस्यापि विश्वस्य भावाभाववैलक्षण्यं
ाभावरूपत्वानधिकरणत्वं मम स्वयं सदेव । तथाऽसतोऽभावस्यापि विश्वस्योक्तरूपं वैलक्षण्यं
सदेव । भावाभावभेदवादिनैकैकार्थस्योभयरूपताऽनङ्गीकारात् । भावे हि भावत्वमेव ।
ावत्वमपि । अभावे चाभावत्वमेव । न भावत्वमपीत्यतस्तेन साधितेनानिष्टं मम कथं
त् ॥ ४ ॥ अथैकैकस्य वस्तुनो भावत्वानधिकरणत्वमभावत्वानधिकरणत्वं च साध्यतया
क्षितमिति मन्वीत । तथापि सतो भावस्यापि विश्वस्यासतोऽभावाद्वैलक्षण्यमभावत्वानधि-
णत्वं मम सदेव । एवमसतोऽभावस्यापि विश्वस्य सतो भावाद्वैलक्षण्यं भावत्वानधिकरणत्वं

स्वयं सदेव । भावाभावभेदवादित्वात् । अतः कथं मम तेनानिष्टं भवेत् । अंशे सिद्धार्थतया परस्य निग्रहात् । उभयसाधनाददोष इति चेन्न । असिद्धसन्निधानेऽपि सिद्धस्य तत्त्वानपायात् । विशिष्टसाधनान्नैवमिति चेन्न । तथाऽपि वैयर्थ्यानिस्तारात् ॥ ५ ॥

वा०— द्वितीयं शङ्कते ॥ **भावेति** ॥ तत्रापि समुदिते तत्त्वानधिकरणत्वमिति प्रथमे दोषमाह ॥ **तथापीति** ॥ भावाभावभेदवादिनो भावाभावयोर्भावाभाववैलक्षण्येऽपि भावत्वाभावत्वानधिकरणत्वं कुतो धर्मिभेदेऽपि धर्मैक्यदर्शनादित्यतः प्रतिनियतविरुद्धधर्माणां धर्मिभेदहेतूनां न सामानाधिकरण्यमित्याशयेन हेतुच्छित्तिं विपक्षे बाधकमाह ॥ **यदि हीति** ॥ अत्रापि सत इत्यादेर्द्विरावृत्तिरिति ज्ञेयम् ॥ ३ ॥ द्वितीयं शङ्कते ॥ **अथेति** ॥ भावेऽभावे च प्रत्येकं भावाभावत्वानधिकरणत्वं साधयन्प्रष्टव्यः । प्रत्येकमुभयानधिकरणत्वं साध्यमुतैकैकानधिकरणत्वमाहोस्विदेकैकानधिकरणत्वे वादिप्रतिवादिसिद्धेऽपरानधिकरणत्वं विप्रतिपन्नमधिकं साध्यते । आद्येऽपि समुदितोभयानधिकरणत्वं साध्यमुत विशकलितोभयानधिकरणत्वमिति । तत्र नाद्य इत्याह ॥ **तदेति** ॥ इत आरभ्य सदसच्छब्दयोर्वैलक्षण्यमित्यनेनाप्यन्वयमभिप्रेत्य वा विवक्षावशादेव वा वैलक्षण्यमित्यस्य भावत्वाभावत्वानधिकरणत्वमिति व्याख्यातम् । भेदवादिन इत्यस्य प्रकृते हेतुत्वमुपपादयति ॥**भावेति**॥४॥द्वितीयं शङ्कते ॥ **अथेति** ॥ अत्रापि पृथगनुमानाभ्यामुभयानधिकरणत्वं साध्यते उतैकेनेति । द्वितीयेऽपि समप्राधान्येन तत्साध्यते किंवा विशेषणविशेष्यभावेनेति विकल्पान्मनसि निधायाऽऽद्यं दूषयति ॥ **तथाऽपीति** ॥ **अंश इति** ॥ भावे विवक्षितानुमानद्वयेऽभावत्वानधिकरणत्वानुमानरूपस्याभावे विवक्षितानुमानद्वये भावत्वाधिकरणत्वानुमानरूपस्यांशस्य सिद्धार्थतयेत्यर्थः । द्वितीये प्रथमं शङ्कते ॥ **उभयेति** ॥ द्वितीये द्वितीयं शङ्कते ॥ **विशिष्टेति** ॥ यद्वा विशकलितोभयानधिकरणत्वसाधनेऽपि समप्राधान्येनोभयसाधनमभिमतं किंवा विशेषणविशेष्यभावेन । नाद्य इत्याह ॥ **तथाऽपीति** ॥ एकांशस्य सिद्धत्वादिति भावः । ननु पक्षैकदेशे सम्पूर्णसाध्यसिद्धावंशतः सिद्धसाधनतायां दोषत्वेऽपि सर्वस्मिन्पक्षे साध्यैकदेशसिद्ध्या तस्या अदोषत्वात्प्रकृते चोभयोर्मिलितयोः साधनान्न सिद्धार्थतेति शङ्कते ॥ **उभयेति** ॥ उभयोर्मिलितयोः पक्षत्वेऽपि पक्षतावच्छेदकनानात्वेन क्वचिदधिकरणे पक्षतावच्छेदकावच्छेदेन साध्यसिद्धावंशतः सिद्धसाधनतावदुभयोर्मिलितयोः साध्यत्वेऽपि साध्यताऽवच्छेदकनानात्वात्साध्यतावच्छेदकावच्छिन्नस्य पक्षतावच्छेदकावच्छेदेन सिद्धिरूपस्य सिद्धसाधनताबीजस्य सत्त्वादंशतः सिद्धसाधनत्वमेवेत्याशयेनाह ॥ **असिद्धेति** ॥ यत् केनचित्पक्षतावच्छेदकनानात्वे वा साध्यताऽवच्छेदकनानात्वे वा नांशतः सिद्धसाधनं पक्षताऽवच्छेदकसामानाधिकरण्येन साध्यताऽवच्छेदकाक्रान्तसाध्यसिद्धावुद्देश्यतायां सम्पूर्णमेव सिद्ध-

धनम् । नांशतः सिद्धसाधनम् । पक्षताऽवच्छेदकावच्छेदेन साध्यताऽवच्छेदकावच्छिन्नसिद्धावुद्देश्या-
मंशतोऽप्युद्देश्यसिद्धेरभावान्नांशतः सिद्धसाधनमिति दूषणमुक्तं तदनेनैव निरस्तं भवति ।
तावच्छेदकनानात्वस्थले क्वचिदधिकरणे पक्षताऽवच्छेदकावच्छेदेन साध्यसिद्धेर्जातत्वे साध्यता-
च्छेदकनानात्वस्थले साध्यतावच्छेदकावच्छिन्नसाध्यैकदेशसिद्धिसद्भावे उक्तदूषकताबीजसद्भावेन
ांशे सिद्धसाधनताया दुर्वारत्वात्प्रयोजनसत्त्व एव च तथोद्देश्यताया: कल्पनीयतया तदभावे स्वेच्छयैव
कल्पनाऽयोगाच्चेति । द्वितीयं शङ्कते ॥ **विशिष्टेति** ॥ **वैयर्थ्येति** ॥ न च गुणादिकं गुण्यादिना
त्वाभिन्नं समानाधिकृतत्वादित्यत्र तार्किकाङ्गीकृतभिन्नत्वस्यैव व्यापकविशेषणानामुद्देश्यप्रतीत्यर्थत्वादिह
भावत्वानाधारत्वे सत्यभावत्वानाधारत्वमिति प्रतीतेरुद्देश्यत्वान्न वैयर्थ्यमिति वाच्यम् । अभेदे सत्यपि
ः कलश इति सामानाधिकरण्यदर्शनादप्रयोजकत्वनिरासाय विशिष्टधियस्तत्रोद्देश्यत्वेऽपि प्रकृते
देशप्रयोजनादर्शनेन विशिष्टधिय उद्देश्यत्वानुपपत्तेः । न च तुच्छे ब्रह्मणि वाऽभावत्वानाधारत्वेऽपि
नवाध्यत्वादर्शनादप्रयोजकतानिरासायैव प्रकृतेऽपि तथाधिय उद्देश्यत्वमिति वाच्यम् । तुच्छादावु-
प्रानाधारत्वेऽपि ज्ञानबाध्यत्वादर्शनेन तथाधिय उद्देश्यत्वेऽप्यप्रयोजकत्वानिरासेन तन्निरासाय
पक्षबाधकान्तरस्यैवानुसर्तव्यत्वे तेनैव भावत्वानाधारत्वमात्रसाधनेऽपि तन्निरासस‍म्भवेन विशेषणवैयर्थ्यस्य
र्वारत्वादिति भावः ॥ ५ ॥

प०—**प्रत्येकं भावाभावत्वानधिकरणत्वं विवक्षितमिति**॥ अत्र पक्षत्रयं संभवति। भावाभावरूपं
न् त्वानधिकरणत्वं वा एकैकस्य भावत्वानधिकरणत्वाभावत्वानधिकरणत्वरूपधर्मद्वयं वा भावत्वानधि-
रणत्वविशिष्टमभावत्वानधिकरणत्वं साध्यमिति वा । तत्राद्ये दोषोक्तिपरतया योजयति ॥ **तदेति** ॥
त इति पञ्चग्रंतत्वेनावृत्तस्यार्थः ॥ **सतो भावस्यापीति** ॥ सतोऽसतश्च वैलक्षण्यमित्यस्य प्रतिपदं
वाभाववैलक्षण्यमिति । तस्याप्यर्थः ॥ **भावाभावत्वेत्यादि** ॥ असत इत्यस्य पञ्चग्रंतत्वेनावृत्तस्यार्थोऽ-
तोऽभावस्यापीति ॥ **उक्तरूपं वैलक्षण्यं** ॥ भावाभावरूपत्वानधिकरणत्वलक्षणमित्यर्थः ॥ **भावा-
वभेदेति** ॥ भावाभावयोरन्योन्यं भेदवादिनेत्यर्थः ॥ द्वितीयमाशङ्कते ॥ **अथैकैकस्येति** ॥ भावे
वत्वानधिकरणत्वस्याभावेऽभावत्वानधिकरणत्वस्यासिद्धत्वेऽप्यभावत्वानधिकरणत्वं भावत्वानधिकरणत्वं
वेऽभावे च सिद्धमेवेति भावेनांशे सिद्धत्वोक्तिपरतया योजयति ॥ **तथापि सतो भावस्यापीति** ॥
वैवसदसत्पदयोरावृत्तिर्ध्येया ॥ **अंशे सिद्धार्थतयेति** ॥ पृथिवी इतरभिन्ना पृथिवीत्वादित्यत्र तु
लाद्यैकैकान्योन्याभावो न पृथिवीत्वोपहिते सिद्धः । अन्यथा तत्रापि दोषः स्यादेवेति भावः । तृतीय-
क्षमाशङ्कते ॥ **विशिष्टेति** ॥ साध्यताऽवच्छेदकैक्यान्नांशे सिद्धार्थतादोष इति भावः ॥ **वैयर्थ्येति** ॥

एकैकांशस्य सिद्धत्वेनासिद्धांशस्यैव परं प्रति साध्यत्वादिति भावः । अस्य वाक्यस्याप्रसिद्धविशेषणत्वे तात्पर्यमिति मिथ्यात्वनिरुक्तिभङ्गे न्यायामृते व्यक्तम् । अत उद्देश्यार्थत्वान्न वैयर्थ्यमित्यादिदोषानवकाशः ।

या०—वैयर्थ्यानिस्तारादिति ॥ भावेऽभावत्वानधिकरणत्वांशस्याभावे भावत्वानधिकरणत्वांशस्य च सिद्धत्वेन तत्साधने व्यर्थविशेषणत्वादिकमिति भावः ॥

श्री०—तत्त्वानधिकरणत्वमिति ॥ भावत्वाभावत्वानधिकरणत्वमित्यर्थः । भावत्वानधिकरणत्वमभावेऽभावत्वानधिकरणत्वं च भावे स्वयं सदेवेति नानिष्टमित्याह ॥ **तथाऽपीति** ॥ **भावाभावत्वानधिकरणत्वमिति** ॥ भावत्वे सत्यभावत्वं यत्तदनधिकरणत्वमित्यर्थः ॥ **उभयसाधनादिति** ॥ सिद्धस्याप्यसिद्धेन सहोच्चार्यमाणस्यासिद्धत्वमिति मया स्वीकारादिति भावः ॥ **तत्त्वेति** ॥ सिद्धत्वेत्यर्थः ॥ **विशिष्टेति** ॥ भावत्वानधिकरणत्वे सत्यभावत्वानधिकरणत्वमित्यर्थः ॥ **वैयर्थ्येति** ॥ अभावत्वानधिकरणत्वांश इत्यर्थः ॥

न्य०— ननु साध्यतया विवक्षितं भावाभाववैलक्षण्यं न भेदरूपं येन भावाभावरूपतत्तद्व्यक्तिवृत्तिप्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकभेदमादायोक्तक्षत्यवकाशः अपि तु भावत्वाभावत्वरूपानुगतधर्माभावरूपमेवाधिकरणत्वांशनिवेशस्य मन्दप्रयोजनत्वादित्याशङ्कायां पूर्ववत्पक्षतावच्छेदकसामानाधिकरण्येन साध्यीकृततत्तदंशसत्वनियन्त्रितार्थान्तरतातादवस्थ्यमभिधत्ते ॥ **भावेत्यादि** ॥ इयं च तृतीया ॥ विमतिविषयीकृतां भावरूपामभावरूपां वैकैकव्यक्तिं पक्षीकृत्य भावत्वाभावत्वाभावसाधनान्न व्यक्तिभेदेनोक्तक्षत्यवकाश इत्याशङ्कायामेवमपि भावत्वाभावत्वोभयवृत्तिव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावमादाय सिद्धसाधनतादुर्वारेत्याह ॥ **अथेति** ॥ इयं च चतुर्थी ॥ अथ तादृशैकैकव्यक्त्युद्देश्यकभावत्वाभावत्ववृत्तिप्रातिस्विकधर्मावच्छिन्नप्रतियोगिताकाभावविधेयकानुमितेरुद्देश्यतोपगमान्नोक्तक्षत्यवकाश इत्यलस्तथापि गुणो गुणाभाववान् क्रियाभाववान् । गुणत्वादित्यादौ समूहालम्बनानुमितेरिव प्रकृतेऽपि समूहालम्बनानुमितेरुद्देश्यताप्रतीत्या तादृशानुमितौ चाभावत्वाभाववान् भाव इत्यादिसिद्धीनां विरोधितयांशे सिद्धार्थता दुष्परिहरेत्याह ॥ **अंशे सिद्धार्थतयेति** ॥ प्रकृते व्यासज्यवृत्तिधर्मावच्छिन्नैकविधेयतानिरूपिताकधर्मावच्छिन्नैकव्यक्तिनिष्ठोद्देश्यताकसमूहालम्बनात्मकानुमितेरुद्देश्यतोपगमेनैतस्याश्च तादृशसिद्ध्यप्रतिबध्यतया क्षत्यनवकाशादित्याशयेनाशङ्कते ॥ **उभयेति** ॥ नव्यमते तादृशानुमितेस्तादृशसिद्ध्यप्रतिबध्यत्वेऽपि प्राचीनमते तद्विषयकानुमितेः एतद्विषयकसिद्धेर्विरोधित्वमित्युपगमेनोक्तक्षतितादवस्थ्यमाह ॥

॥ असिद्धसन्निधानेऽपीत्यादि । अथ भावरूपां तादृशीं व्यक्तिं पक्षीकृत्य, सामानाधिकरण्यप्रत्यासत्त्या अभावत्वाभावविशिष्टभावत्वाभावस्तादृशीमभावरूपां पक्षीकृत्य तादृशप्रत्यासत्त्या भावत्वाभावविशिष्टाभावत्वाभावः साध्यते । इत्थं च भावपक्षकानुमानेऽभावत्वाभावांशस्याभावपक्षकानुमाने च भावत्वाभावांशस्य साध्यतावच्छेदककोटिनिविष्टत्वोपगमेन साध्यत्वानुपगमेनोक्तक्षत्यनवकाशादित्याशङ्कायामेवमपि गुणकर्मान्यत्वविशिष्टसत्ताऽभाववान् गुणकर्मान्यतरत्वादित्यादौ साध्यशरीरनिविष्टविशेषणांशस्यानैकान्त्यवारकतेव प्रकृते तत्फलकतायाः दुरुपपादतया, व्यापके व्यर्थविशेषणता न दोष इति परिभाषया प्रमेयवह्निमान् धूमादित्यादाविवोपरञ्जनमात्रफलितायाश्चागतिकतयोक्तभङ्गयपि न श्रेयसीत्याह ॥ विशिष्टेत्यादिना ॥ इयं च पञ्चमी ॥ इदमेव प्रतीकमुपाददानाः भावेऽभावत्वानधिकरणत्वांशस्य सिद्धत्वेन तत्साधने व्यर्थविशेषणत्वादिकमिति भाव इत्यपि व्याचक्रिरे । अस्य पक्षस्याप्रसिद्धविशेषणत्वे तात्पर्यमिति मिथ्यात्वनिरुक्तिभङ्गे न्यायामृते व्यक्तमित्यपि स्थितम् ।

सु०— अथ भावाभिमते भावत्वानधिकरणत्वमभावाभिमते चाभावत्वानधिकरणत्वं साध्यते । अतो नोक्तदोष इति चेन्न । तथाऽपि सतो भावस्यापि विश्वस्य सतो वैलक्षण्यं भावत्वानधिकरणत्वं मम स्वयं सदेव । कथं भावत्वभेदवादिनो नैकमेव भावत्वं सर्वभावेष्वनुगतम् । किं नाम प्रतिभावं भावत्वानि भिद्यन्ते । प्रतिपादयिष्यते चैतत् । तथा च भावोऽपि भावत्वान्तरानाधारो भविष्यति । एवमसतोऽभावरूपस्यापि विश्वस्यासतो वैलक्षण्यमभावत्वानधिकरणत्वं मम स्वयं सदेव । कथम् । अभावत्वभेदवादिनाऽभावेऽप्यभावत्वान्तराभावस्वीकारात् । तथा च तेनानिष्टं कथं भवेत् । परस्यैव सिद्धार्थताऽनिस्तारात् ॥ ६ ॥ अथ भावाभावाभिमतयोः सर्वथा भावाभावत्वे न स्त इत्यर्थो विवक्षितः । तथाऽपि सत एव भावस्यैवासतो वैलक्षण्यमभावत्वानधिकरणत्वं स्वयं सदेव नियतं भवत्येव । एवमसत एवाभावस्यैव सतो वैलक्षण्यं भावत्वानधिकरणत्वमपि स्वयं सदेव । यतस्तस्माद्विश्वस्य तेन साधितेन भेदवादिनोऽनिष्टं कथं भवेत् । इदमुक्तं भवति । यदि प्रागभावादिकं पक्षीकृत्याभावत्वानधिकरणमिति साध्यते । तदा तस्य भावत्वं प्रतिज्ञातं स्यात् । भावस्यैवाभावत्वानधिकरणत्वनियमात् । द्वौ नञौ हि प्रकृतमर्थं सातिशयं गमयतः । एवं वियदादिकं पक्षीकृत्य भावत्वानधिकरणत्वे साध्यमाने तस्याभावत्वं प्रतिज्ञातं स्यात् । अभावस्यैव भावत्वानधिकरणत्वनियमात् । भावनिषेध एव ह्यभावः । तथा च विश्वस्य भावाभावविभागस्य च परेणाभ्युपगतत्वान्न भावाभावभेदवादिनो ममानिष्टं किञ्चित् । किन्तु भावाभावव्यतिकरमात्रम् । तत्साधनं च प्रकृतानुपयुक्तमिति ॥७॥

वा०—नन्वस्तु तर्हि प्रत्येकमेकैकानधिकरणत्वपक्षेऽपि भावेऽभावत्वानधिकरणत्वस्याभावे च भावत्वानधिकरणत्वस्य साधने, उक्तरीत्या सिद्धार्थतायामपि भावे भावत्वानधिकरणत्वस्याभावे चाभावत्वानधिकरणत्वस्य साधने न सा। अन्यथासाध्यसिद्धेरसम्भवेन नार्थान्तरताऽपि। एकैकानधिकरणत्वस्य साधनान्न वैयर्थ्यमपीत्याशयेन शङ्कते ॥ **अथेति** ॥ अत्रापि भावे भावत्वानधिकरणत्वमभावे वाऽभावत्वानधिकरणत्वं च यथाकथंचिद्विवक्षितं सर्वथा वा। नाद्य इत्याह ॥ **तथाऽपीति** ॥ ननु भावत्वाभावत्वयोरुपाधित्वेऽपि परम्परासंबद्धजातेरेवोपाधित्वाज्जात्यादेश्चानुगतप्रत्ययाद्यन्यथाऽनुपपत्त्यैकत्वस्य सिद्धत्वात्कथमेतदित्यतो जातेरपि प्रतिव्यक्तिभेदेऽप्यनुगतप्रत्ययादिनिर्वाहस्य सामान्यपरीक्षायां वक्ष्यमाणत्वान्नानुपपत्तिरित्याशयेनाह ॥ **प्रतिपादयिष्यते चैतदिति** ॥ ननु भावत्वादिभेदाङ्गीकारमात्रेण किमुक्तं भवतीत्यतो विवक्षितार्थसिद्धिरुक्ता भवतीत्याशयेनाह ॥ **तथा चेति** ॥ **सिद्धार्थतेति** ॥ यथाकथञ्चिद्भावत्वाद्यनधिकरणत्वस्य विवक्षितस्य सिद्धत्वादिति भावः ॥६॥ द्वितीयं शङ्कते ॥ **अथेति** ॥ स्वरूपार्थकस्वयंशब्दतात्पर्यकथनं नियतमिति। प्रकृतोपयुक्ततया सदित्यस्य व्याख्यानं भवतीति। एतावत्पर्यन्तं भेदवादिन इत्यत्रत्यविशेषणांशस्य हेतूपपादकत्वं ममेत्यभिप्रेतविशेष्यांशस्य तेनानिष्टमिति साध्यान्वय इत्यभिमतम्। अत्रोत्तरत्र च हेतूपपादकत्वासम्भवाद्विशिष्टस्यापि तेनानिष्टमित्यनेनान्वय इत्याशयेनाह ॥ **भेदवादिनोऽनिष्टमिति** ॥ ननु पूर्वोत्तरार्धोक्तयोर्भावस्यैवाभावत्वानधिकरणत्वमभावस्यैव भावत्वानधिकरणत्वमिति नियमयोस्तेनानिष्टमिति साध्येनान्वयः सम्भवतीति नियमद्वयोक्तावपि भावाभावयोः सर्वथा भावाभावत्वे न स्त इति साधनस्यानिष्टत्वानपायात्। न च तादृशनियमोक्तेर्भावाभावयोस्तथा साधनं बाधितमित्यत्र तात्पर्यात्कथं मां प्रत्यनिष्टता परं प्रति च कथं नानिष्टता तथा साधनस्येति वाच्यम्। तथा सति भावादेरेवाभावत्वाद्यनधिकरणत्वमित्यत्र प्रमाणप्रतिपादकोत्तरयोजनाऽन्तर्भावापत्त्या नियमोक्तिमात्रपरयोजनायां तथा तात्पर्यासम्भवात्। नियमद्वयानुपपादनाच्च नैतद्योजना युक्तेत्यतो नैतद्धेतुद्वयं प्रति तेनानिष्टमित्युक्तस्य साक्षात्साध्यत्वमपि तु साध्यान्तरं मध्येऽभिमतम्। हेतूपपादनप्रकारश्च प्रसिद्धन्यायादिसिद्धः सुलभ एवेत्याशयेन भाष्याभिप्रायमाह ॥ **इदमुक्तमिति** ॥ नन्वत्र भावत्वानधिकरणत्वे साध्ये भावस्य भावत्वाधिकरणत्वेन वाऽभावत्वानधिकरणत्वेन वा पक्षत्वैवमभावत्वानधिकरणत्वे साध्येऽभावस्य चाभावत्वाधिकरणत्वेन वा भावत्वानधिकरणत्वेन वा पक्षतोभयत्राप्याद्ये व्याघातापातेन भावत्वेऽभावत्वे च साध्यपर्यवसानानुपपत्त्या वक्ष्यमाणार्थान्तरानुपपत्तिः। अत एव च भावाभिमत इत्यादावभिमतपदोपादानम्। उभयत्रापि द्वितीये उत्तरयोजनान्तर्भावापत्त्या भावत्वाभावत्वयोः प्रतिज्ञातार्थपर्यवसानासिद्धिरेवेत्यतो नोभयथाऽपि तयोः पक्षताऽपि तु प्रागभावत्ववियदादित्वादिनेति नानुपपत्तिरित्याशयेनाह ॥ **प्रागभावादिकं वियदादिकमिति** ॥ अत्र भाष्यपूर्वोत्तरार्धोक्तोपपादना-

नुसारेणाभावपक्षकोक्त्यनन्तरं भावपक्षोक्तिरिति द्रष्टव्यम् । यदीत्यारभ्य स्यादित्यन्तं साध्याध्याहारः एवमुत्तरत्राप्येवमित्यादि स्यादित्यन्तम् । तत्र पूर्वोत्तरार्धोक्तनियमरूपहेत्वोरुक्तिर्भावस्यैवाभावस्यैवेति । अनधिकरणत्वमिति ह्यभावत्वनिषेध एव पर्यवस्यति । अत एव पूर्वं भावत्वाभावत्वे न स्त इत्युक्तम् । एवं च निषेधविशिष्टभावत्वनिषेधस्य विशेषणीभूतनिषेधनिषेधविषयकत्वस्य सविशेषणे हीति न्यायसिद्धत्वान्निषेधनिषेधत्वरूपातिशयलाभाय च नञ्द्वयसार्थक्यसम्भवान्निषेधनिषेधे भावत्वविधिरेव सिद्धो भवतीत्याशयेनासन्न भवतीत्युक्ते च द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति सदेव भवतीति कर्मनिर्णयं मनसि निधायाह ॥ **द्वौ नञाविति** ॥ तत्प्रतिक्षेपरूपस्य तन्निष्ठासाधारणधर्मानधिकरणत्वं प्रसिद्धमेवेत्याशयेन 'भावस्य हि निषेधे तु नाभावस्य निषेधनमि'त्यनुव्याख्यानं मनसि निधायाऽऽह॥ **भावनिषेध एव हीति**॥ ननु भेदवादिन इत्यस्यानिष्टमित्यनेन संबन्धेऽपि कथमुपयोग इत्यतः प्रतिज्ञापर्यवसानलब्धस्य विश्वस्मिन्भावाभावविभागस्य तेनानिष्टमित्युक्तसाध्ये हेतुत्वेनान्वयप्रदर्शनपूर्वकं तं घटयति ॥ **तथा चेति** ॥ विश्वस्य, भावाभावविभागस्य वाऽभावो यदि प्रतिज्ञानबलाल्लभ्येत तर्हि भावाभावविभागवादिनो ममानिष्टप्रसङ्गेऽपि, न भावाभावविभागस्यैव प्रतिज्ञाबलाल्लाभे स इति प्रदर्शनाय भेदवादिन इत्युक्तमिति भावः । प्रागभावादेर्भावत्वादि कथं तव नानिष्टमित्याशङ्कते ॥ **किंचिदिति** ॥ तस्यानिष्टत्वमङ्गीकरोति ॥ **भावाभावेति** ॥ मात्रशब्दसूचितं परं प्रति दूषणं स्पष्टयति ॥ **तदिति** ॥ ७ ॥

सु० — **प्रतिपादयिष्यते चैतदिति** ॥ न सर्वधर्मैकोऽस्तीत्यादिना । ननु भावाभावयोरभावत्वभावत्वाधारत्वासंभवात् भावत्वाभावत्वाधारत्वनिषेधेऽनिर्वाच्यत्वसिद्धेः कथमनिष्टं न भवेदित्यत आह ॥ **इदमुक्तमिति** ॥

प० — सङ्केदेत्यत्र भावप्रधानत्वमुपेत्याह ॥ **भावत्वभेदवादिन इति** । नन्वनुगतधर्मस्य प्रमितस्य कथमपलापः । तादृशधर्माभावे शक्तिव्याप्तिकारणतानामग्रहप्रसङ्ग इत्यत आह ॥ **प्रतिपादयिष्यत इति** ॥ वैशेषिकाधिकरणे 'नरत्वादिकमप्येवं तत्तद्धर्मतयेयत' इत्यादिना । अनुगतधर्माभावस्तदभावेपि व्युत्पत्त्यादिग्रहश्चोपपादयिष्यत इत्यर्थः ॥ **सर्वथा भावाभावत्वे न स्त इति** ॥ भावे भावत्वानां सर्वेषामभावः । भावत्वसामान्याभाव इति यावत् । एवमभावेप्यभावत्वसामान्याभाव इत्यर्थः । चोऽवधारण इत्युपेत्याह ॥ **सत एवेति** ॥ असत एवेति च । दोषोक्तिरस्फुटत्वादाह ॥ **इदमुक्तमिति** ॥ **परेणापीति** ॥ सत्यत्ववादिनाऽपीत्यर्थः ॥ **व्यतिकरमात्रमिति** ॥ विनिमयमात्रं ॥ न तु भावाभाववस्तुनोरभाव इत्यर्थः । तदपि तवानभिमतमेव किलेत्यत आह ॥ **तत्साधनं चेति** ॥ **प्रकृतेति** ॥ अनिर्वाच्यत्वरूपमिथ्यात्वानुपयुक्तमित्यर्थः ।

या०—प्रतिपादयिष्यत चेत्यादीति ॥ 'नरत्वादिकमप्येवं तत्तद्धर्मतयेष्यते ॥ न सर्वधर्म एकोऽस्ती'त्यत्रेत्यर्थः ॥

श्री०—**सर्वथेति** ॥ यदेकं भावत्वं भावेऽस्ति यदेकमभावत्वमभावेऽस्ति तदपि नास्तीत्येवं भावे सर्वथा भावत्वं नास्ति। अभावे च सर्वथाऽभावत्वं नास्तीति साध्यत इत्यर्थः। द्वौ नञाविति न्यायस्यात्रासम्भवादाह ॥ **अभावस्यैवेति** ॥

च०— ननु भावरूपां तादृशीं पक्षीकृत्य भावत्वाभाव एवाभावरूपां च तादृशीमभावत्वाभाव एव साध्यत इति नोक्तदोष इत्याशङ्कायामेवमपि भावत्वाभावत्वादीनामपि प्रातिस्विकतत्तद्व्यक्तित्वकल्पनायाः सिद्धान्ते 'नरत्वादिकमप्येवं तत्तद्धर्मतयेष्यत' इत्यत्र समर्थयिष्यमाणतया सिद्धसाधनतातादवस्थ्यं चालनीयन्यायेन दुर्वारमित्याह ॥ **अथेत्यादिनाऽनिस्तारादित्यन्तेन** ॥ इयं च षष्ठी ॥ अथ भावरूपायां तादृशव्यक्तौ यावन्ति भावत्वानि प्रत्येकं तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटवत्त्वमभावरूपायां तादृश्यां यावन्त्यभावत्वानि प्रत्येकं तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटवत्त्वमेव सिसाधयिषितमिति विशेषान्तरविरहेऽप्येकैकविशेषसमवधानेन न क्षतिरित्याशङ्कायां भावे तादृशभावत्वाभावकूटे सिसाधयिषिते अभावरूपत्वमभावे च तादृशाभावत्वाभावकूटे तस्य भावरूपत्वमेव प्रत्यग्रासीन्नानिर्वचनीयरूपत्वमिति भावस्याभावत्वमभावस्य च भावत्वमेव पर्यवसासीन्नानिर्वचनीयत्वमित्यर्थान्तरता दुर्वारेत्याशयेनाह ॥ **अथेत्यादिनाऽनुपयुक्तमित्यन्तेन** ॥ इयं च सप्तमी ॥

सु०— भावाभावाभिमतयोरभावभावत्वानधिकरणत्वे वादिप्रतिवादिसंमते भावाभावत्वानधिकरणत्वमप्यधिकं साध्यते। अतो नोक्तदोप इति चेन्न। यतः सतो भावस्यैव विश्वस्य वियदादेरसतो वैलक्षण्यमभावत्वानधिकरणत्वं स्वयं सदेव। प्रमितमेव। यतश्चासतोऽभावस्यैव विश्वस्य प्रागभावादेः सतो वैलक्षण्यं भावत्वानधिकरणत्वं स्वयं सदेव। अतो भेदवादिनस्तेन विपरीतेन प्रतिज्ञातेनानिष्टं कथं भवेत्। प्रतिज्ञातार्थसिद्धौ खल्वनिष्टं भवेत्। न हि प्रमाणबाधितोऽसौ सिध्यति। व्यावहारिकभावत्वाभावत्वगोचरं प्रमाणं तत्त्वविषयेणानुमानेनैव बाध्यत इति चेन्न। यतोऽस्माकं तावद्भावाभावत्वविषयं प्रमाणं तत्त्वगोचरमेव। अन्यथा चक्रकादिप्रसङ्गादतिप्रसङ्गाच्चेति ॥ ८ ॥ द्वितीयेऽप्येतदेवोत्तरम्। विश्वस्य सतः सत्याद्वैलक्षण्यमपि मम स्वयं स्वमतमेव। तथाऽसतोऽविद्यमानादपि वैलक्षण्यं स्वयमेव। अतस्तेन

साधितेन ममानिष्टं कथं भवेत्। भवतु विश्वस्यासतः शशविषाणादेर्वैलक्षण्यं स्वमतम्। सतो वैलक्षण्यं तु कथम्। सत्त्वाङ्गीकारादिति चेन्मैवम्। सतो विद्यमानस्याप्यसतो भेदं वदतो मम यथा विश्वस्यासतो वैलक्षण्यं स्वयमेव। तथा सतोऽपि विश्वस्य सतो वैलक्षण्यं सतां भेदवादिनः स्वयमेव। सदन्तरवैलक्षण्यात्॥ ९॥ सत्त्वासत्त्वानधिकरणत्वं सदसद्विलक्षणत्वमिति चेत्। तदाऽपि सतो विश्वस्यासतो वैलक्षण्यं सदसद्भेदवादिनः स्वयं सदेव। अतस्तेन साधितेन ममानिष्टं कथं भवेत्। परस्यैवांशतः सिद्धार्थता भवेत्। तर्हि सत्त्वानाधारत्वमेव साध्यत इति चेन्न। असत एव हि सतो वैलक्षण्यं सत्त्वानधिकरणत्वं भेदवादिनो मम स्वयं सदेव नियमेन भवति। तथा च विश्वस्य तेन सत्त्वानधिकरणत्वेन साधितेनासत्त्वापत्त्या परस्यैवानिष्टं भवेत्। अनिष्टप्रसङ्गेन परं निगृहीतवतो ममानिष्टं कथं भवेत्॥ १०॥

वा० — नन्वभावत्वानधिकरणत्वावच्छिन्नं वियदादिकं भावत्वानधिकरणत्वावच्छिन्नं प्रागभावादिकं पक्षीकृत्य भावत्वानधिकरणत्वमभावत्वानधिकरणत्वं च क्रमेण साध्येते। एवं च वियदादौ भावत्वानधिकरणत्वस्य प्रागभावादावभावत्वानधिकरणस्य चासिद्धया न सिद्धार्थता। भावत्वानधिकरणादावभावत्वानधिकरणत्वादेः साध्यमानत्वे चानिर्वचनीयमनादाय भावत्वाभावत्वविषयकतया प्रतिज्ञाया अपर्यवसानान्नार्थान्तरताऽपि। साध्यकोटौ विशिष्टस्याप्रवेशान्न वैयर्थ्यमपीत्याशयेन तृतीयं शङ्कते॥ भावेति॥ अत्र पूर्ववत्सिद्धार्थताऽर्थान्तरयोरप्राप्त्या तेनेत्यस्य साधितेनेत्यर्थानुपपत्त्या प्रकृतोपयुक्तमर्थमाह॥ **विपरीतेति**॥ अत्र प्रतिज्ञातेनेत्युक्तिसूचितप्रतिज्ञामात्रत्वमुपपादयति॥ **प्रतिज्ञातेति**॥ भावस्यैवाभावत्वानधिकरणत्वेऽभावस्यैव भावत्वानधिकरणत्वे च प्रमाणोक्त्या वन्हिमत एव धूमवत्त्वं प्रमितमित्युक्ते धूमवति वन्हिमत्त्वं प्रमितमिति यथा लभ्यते तथाऽभावत्वानधिकरणे भावत्वं भावत्वानधिकरणे चाभावत्वं प्रमितमित्युक्तं भवति। अभावत्वानधिकरणत्वभावत्वानधिकरणत्वग्राहकप्रमाणयोरेव भावत्वाभावत्वविषयकत्वात्। तथा चाभावत्वानधिकरणे प्रमितं यद्भावत्वं भावत्वानधिकरणत्वे प्रमितं यदभावत्वं तदनधिकरणत्वस्य तत्रैव साधने बाध इत्याशयेनाह॥ **न हीति**॥ भेदवादिन इत्यस्य तेनानिष्टमित्यनेनान्वितस्योपयोगं यतोऽस्माकमित्यादिना वक्तुं तन्निवर्त्यां शङ्कां दर्शयति॥ **व्यावहारिकेति**॥ भावाभावभेदवादिनो मम भावत्वादिविषयकं प्रमाणं तत्त्वगोचरमेव। अन्यथा भावाभावभेदवादित्वमेव न स्यादिति भेदवादिन इत्यनेन सूचितमिति भावः॥ **अन्यथेति**॥ भावत्वादिगोचरप्रमाणस्यातत्त्वविषयत्वसिद्धौ बाधकाभावादनुमानसिद्धिस्तत्सिद्धौ च तेन भावत्वादिगोचरप्रमाणस्य बाधसिद्धिस्तत्सिद्धौ चातत्त्वविषयत्वसिद्धिरिति चक्रकम्। भावत्वादिगोचरप्रमाणस्यातत्त्वविषयकत्वसिद्धौ बाधकाभावादनुमानसिद्धिस्-

सिद्धौ च तद्बाधितत्वादतत्त्वविषयत्वसिद्धिरित्यन्योन्याश्रयो वाऽतत्त्वविषयकवह्निशैत्यानुमानेन तत्त्वविषयकौष्ण्यप्रत्यक्षस्य बाधप्रसङ्गश्चेत्यर्थः ॥ ८ ॥ द्वितीयपक्षसम्भावितकल्पदूषणपरतयापीदमेव भाष्यं योजयितुं प्रतिजानीते ॥ **द्वितीयेऽपीति** ॥ स्वयंशब्दयोः पर्यायत्वं मतमित्यध्याहारं च मनसि निधाय स्वमतमिति व्याख्यानम् । अत्र सत एव पक्षत्वेन पूर्ववत्प्रत्येकसमुदायविकल्पासम्भव इति बोध्यम् । पूर्वत्र भावाभावात्मकविश्वस्य पक्षत्वात्कथं तत्र भावाभाववैलक्षण्यमित्याशङ्कायामुभयोपपादकतया भेदवादिन इत्यस्य सम्बन्धेऽपि प्रकृते सत एव पक्षत्वेन तत्र चासद्वैलक्षण्यस्योभयवादिसम्मत्या तदंशस्योपपादननिरपेक्षत्वात्सद्वैलक्षण्यमात्रस्यैव चोपपादनीयत्वात्सदित्यस्य च भेदवादिन इत्येतत्सम्बन्धे स्पष्टतदुपपादनलाभात्स्वयमित्येव पूर्वेण सम्बद्धय सद्भेदवादिन इत्यस्य सद्वैलक्षण्ये हेतुत्वमसद्वैलक्षण्यदृष्टान्तेन प्रतिपादयितुं तथैव तन्निवर्त्यां शङ्कामुत्थापयति ॥ **भवत्विति** ॥ सतोऽपि वक्ष्यमाणरीत्या सदसत्त्वात्सत्त्वासत्त्वसमुदायानधिकरणत्वमादाय सिद्धसाधनादेः पूर्ववदसम्भवात्तदनभिधाय विशकलितसत्त्वासत्त्वानाधारत्वपक्षमेव शङ्कित्रभिप्रेततया सिद्धवत्कृत्य तद्दूषणपरतया भाष्यं योजयति ॥ **सतोऽपीति** ॥ अत्र सतोऽपि सत्त्वाधिकरणस्यापीत्यनेनांशे सिद्धसाधनतां स्फोरयति ॥ ९ ॥ अत्र सत्त्वान्तरानाधारतयाऽर्थान्तरपरतया योजनायां भाष्येऽसत इत्यस्य वैयर्थ्यापत्त्या तदनुगुणदूषणपरतया योजयति ॥ **असत एव हीति** ॥ १० ॥

स०— प्रत्यक्षस्यातत्वविषयत्वे बाधकमाह ॥ **अन्यथेति** ॥ अनुमानस्य तत्वविषयत्वे सतिप्राबल्यं तेन प्रत्यक्षस्यातत्वविषयत्वम् । ततश्च तस्य दौर्बल्येऽनुमानस्य तत्वविषयत्वमिति चक्रकम् । प्रबलप्रमाणविरोधादेव प्रत्यक्षस्यातत्वावेदकत्वं वक्तव्यम् । तथाच प्रत्यक्षस्यातत्वावेदकत्वेऽनुमानस्य तत्वावेदकत्वं तत्सिद्धौ च तत्सिद्धिरिति अन्योन्याश्रयश्चेत्यर्थः ॥ **अतिप्रसङ्गादिति** ॥ अनुमानस्याप्यतत्वावेदकत्वं सुवचमित्यतिप्रसङ्गादित्यर्थः । वह्निरनुष्णः पदार्थत्वादित्यनुमानेन प्रत्यक्षस्य बाधः स्यादित्यतिप्रसङ्गादित्यप्याहुः ॥

प०— शङ्कते ॥ **भावाभावाभिमतयोरिति** ॥ **नोक्तदोष इति** ॥ व्यतिकरमात्रदोषो नेत्यर्थः ॥ **भावत्वाभावत्वगोचरमिति** ॥ भावाभावयोः क्रमाद्भावत्वाभावत्वगोचरमिति योज्यम् ॥ **तत्वविषयेणानुमानेनैवेति** ॥ विवादपदं सदसद्विलक्षणं बाध्यत्वादितिप्रागुक्तेनेत्यर्थः ॥ **चक्रकादिति** ॥ सिद्धे च भावत्वादिगोचरमानस्यातत्वावेदकत्वे तद्बाधाभावसिद्धिः । सिद्धे च तस्मिन्ननुमानप्रामाण्यसिद्धिः । सिद्धे च तस्मिंस्तद्बाधेन भावत्वादिगोचरप्रमाणस्य व्यावहारिकसत्त्वविषयकत्वसिद्धिरित्यर्थः ।

ादिपदेन सिद्धे चानुमानप्रामाण्ये भावत्वादिप्रत्यक्षाप्रामाण्यं, तत्सिद्धौ चानुमानप्रामाण्यसिद्धिरित्येव- न्योन्याश्रयादिर्गृह्यते । एवं सति बाधमात्रोच्छेदः स्यादित्याह ॥ **अतिप्रसङ्गाच्चेति** ॥ विवृतमेतन्न्या- मृते वह्निशैत्यानुमानसाम्योक्तिवादे । इतिशब्दो भावाभावपक्षदूषणोक्तिसमाप्तौ ॥ **द्वितीयेऽपीति** ॥ दसच्छब्दौ भावाभाववचनौ किं वा विद्यमानाविद्यमानवचनाविति प्रागुक्तद्वितीयपक्षेऽपीत्यर्थः । ङ्कते ॥ **भवत्विति** ॥ **स्वयमेवेति** ॥ स्वमतमेवेत्यर्थः ॥ **सत्त्वासत्त्वानधिकरणत्वमिति** ॥ सत्त्वा- धिकरणत्वमसत्त्वानधिकरणत्वं चेति धर्मद्वयमित्यर्थः ॥ **असतोवैलक्षण्यमिति** ॥ असत्त्वानाधारः सत्त्वा- धारः सदसदिति सदसतोरन्योन्यं भेदवादिन इत्यर्थः ॥ **अनिष्टेति** ॥ असत्त्वापत्तिरूपानिष्टेति वा ाहत्या कस्यापि सिद्धिर्नेति वाऽनिष्टानिस्तारादित्यर्थः ॥

या० — प्रमाणेति ॥ भावत्वाभावत्वगोचरप्रत्यक्षादीत्यर्थः ॥ **अन्यथा चक्रकादिप्रसङ्गा- दिति** ॥ भावत्वाभावत्वगोचरप्रमाणस्य प्रत्यक्षादिरूपस्यातत्त्वगोचरत्वसिद्धौ तस्य दुर्बलत्वेनानुमान- ाधकत्वाभावः । सति च तस्मिन्ननुमानप्रामाण्यसिद्धिस्तत्सिद्धौ च तद्विरोधेनातत्त्वगोचरत्वसिद्धिरिति क्रकप्रसङ्गात् । बाधकाभावेऽप्यतत्त्वगोचरत्वेऽनुमानस्याप्यतत्त्वविषयत्वं सुवचमित्यतिप्रसङ्गाच्चेत्यर्थः । द्राऽतिप्रसङ्गादित्यस्य कालात्ययापदिष्टमात्रोच्छेदप्रसङ्गादित्यर्थः ॥

श्री० — भावाभावव्यतिकरो नास्तीत्याशङ्कते ॥ **भावाभावाभिमतयोरिति** ॥ **अधिकमिति** ॥ ात्रेऽभावत्वानधिकरणत्वं प्रमितम् । तत्र भावत्वानधिकरणत्वमप्यधिकं साध्यते । तथा च भावत्वा- धिकरणत्वे साध्येऽभावत्वं न प्राप्नोति । अभावत्वानधिकरणत्वस्य सम्मतत्वात् । एवमभावेऽपि द्रष्टव्यम् । अतो न व्यतिकर इति भावः ॥ **विपरीतेति** ॥ भावरूपस्य प्रपञ्चस्य प्रमाणविरुद्धभावत्वा- धिकरणत्वप्रतिज्ञानेनेत्यर्थः ॥ **भावत्वाभावत्वगोचरमिति** ॥ भावाभावयोः क्रमात् भावत्वाभावत्व- ोचरमिति योज्यम् ॥ **तत्त्वविपर्येणानुमानेनेति** ॥ विवादपदं सदसद्विलक्षणं बाध्यत्वादिति ागुक्तेनेत्यर्थः ॥ **द्वितीयेऽपीति** ॥ सदसच्छब्दौ भावाभाववाचिनौ वा विद्यमानाविद्यमानवाचिनौ ति प्रागुक्तद्वितीयपक्षेऽपीत्यर्थः । सत्याद्विद्यमानात् ॥ **भेदवादिन इति** ॥ सतां भेदवादिन त्यर्थः ॥

च० — अथ तार्णदहनशून्यत्वविशिष्टं भौमदहनशून्यत्वविशिष्टं वा ह्रदादिकं पक्षीकृत्य तार्ण- दहनशून्यत्वस्य भौमदहनशून्यत्वस्य वा साधने तादृग्दहनद्वयविनिर्मुक्तता यथा सेत्स्यति तद्वत्प्रकृतेऽप्यभाव-

त्वानधिकरणत्वविशिष्टभावरूपां भावत्वानधिकरणत्वविशिष्टाभावरूपां वा तादृशीं पक्षीकृत्य भावत्वानधिकरणत्वस्याभावत्वानधिकरणत्वस्य च साधने तादृग्धर्मद्वयवैधुर्यरूपानिर्वचनीयतैव सेधिष्यतीत्यद्वैतवादिमनोरथद्रुमोऽकालीदेवेत्याशङ्कायां 'मृगतृष्णांऽभसि स्नातः खपुष्पकृतशेखरः । वन्ध्यासुतः समायाति शशशृङ्गधनुर्धरः' इत्यादिवत्प्रमाणबाधिततया न कस्यापि सिद्धिरित्याशयेनाह ॥ भावेत्यादिकप्रसङ्गाच्चेत्यन्तेन ॥ इयं चाष्टमी योजना ॥ इत उत्तरः द्वितीयेऽप्येतदेवेत्यादिः परकीयतर्काणामद्यापि गहननिविष्टत्वादित्यन्तो ग्रन्थ उक्तदिशा दर्शितयोजनाऽवसेयः ॥

सु० — अथासत्त्वानधिकरणत्वे वादिप्रतिवादिसिद्धे सत्त्वानधिकरणत्वमप्यधिकं साध्यत इति चेन्न । अनिष्टानिस्तारात् । किञ्च, न सत्त्वं नामैकमनुगतं किन्तु प्रतिवस्तु सत्त्वानि भिद्यन्ते । तत्र वियदादेरसद्वैलक्षण्ये सति सत्त्वानधिकरणत्वं साध्यमानं किमेकसत्त्वानधिकरणत्वमुतानेकसत्त्वानधिकरणत्वमथ सर्वसत्त्वानधिकरणत्वम् । किंवाऽविशेषितसत्त्वानधिकरणत्वम् । अथवा सर्वथा सत्त्वानधिकरणत्वं विवक्षितम् । नाद्यः । विश्वस्य सतोऽपि वैलक्षण्यं तावन्मम स्वयमेव सतोऽपि वैलक्षण्यं सत्त्वानधिकरणत्वमपि स्वयमेव । कथम् । सत्त्वभेदवादिनो मम सतोऽपि सत्त्वान्तरानधिकरणत्वाङ्गीकारात् । तथा च सिद्धेन तेन साध्यमानेन ममानिष्टं कथं भवेत् । एवमेव चतुर्थनिराकरणमपि व्याख्येयम् । न द्वितीयतृतीयौ । विश्वस्यासतो वैलक्षण्यमसत्त्वानधिकरणत्वं तावन्मम स्वयमेव । सतो वैलक्षण्यमनेकसत्त्वानधिकरणत्वम् । सर्वसत्त्वानधिकरणत्वमपि स्वयं सदेव । कथम् । भेदवादिनैकैकस्यार्थस्यानेकसर्वसत्त्वास्वीकारात् । स्वीकारे च भेदभङ्गः स्यात् । ततश्च तेनानिष्टं कथं भवेत् । न पञ्चमः । यतः सत एवासतो वैलक्षण्यं स्वयं सदेव । नियतमेवास्ति । यतश्चासत एव सतो वैलक्षण्यमपि नियतमेवातस्तेन साध्यमानेन विश्वस्य सदसत्त्वापत्त्या भेदवादिनः कथमनिष्टं भवेत् । मया ह्येकस्यैव सदसत्त्वमङ्गीकृतम् । स्वोपाधौ प्रतिषेधाप्रतियोगित्वात्परोपाधौ च तत्प्रतियोगित्वात् । द्वयोरपि सर्वथा प्रतिषेधात्कथं सदसत्त्वप्रसङ्ग इति चेत्तर्ह्यसत एव सतो वैलक्षण्यं स्वयं सन्नियतमेव । अतः सद्वैलक्षण्यमुक्त्वा पुनरसतोऽपि वैलक्षण्येन व्याहतेन प्रतिज्ञातेन भेदवादिनः कथमनिष्टं भवेत् । एवं सत एवासतोऽपि वैलक्षण्यं नियतमित्यसद्वैलक्षण्यमुक्त्वा पुनर्विश्वस्य सद्वैलक्षण्यप्रतिज्ञा व्याहता द्रष्टव्या । न ह्यनिर्वाच्यसिद्धेः प्रागयं विप्रतिषेधो निवारयितुं शक्यः । अस्मादेव हेतोस्तत्सिद्धिरिति चेत्तर्हि माता वन्ध्येति प्रतिज्ञा कुतो विप्रतिषिद्धा । वक्ष्यमाणहेतुनैव प्रतिज्ञातार्थसिद्धेस्तत्रापि सुवचत्वात् । 'संभावितः प्रतिज्ञाया अर्थः साध्येत हेतुने'ति

ायात्तत्र हेत्वाकाङ्क्षैव नास्तीति चेत्समम् । किञ्च सत एव विश्वस्यासतो वैलक्षण्यं स्वयं
देव । साक्षिप्रमितमस्ति । अतस्तेन बाधितेन सर्वथा सत्त्वानधिकरणत्वेन प्रतिज्ञातेन भेद-
दिनः कथमनिष्टं भवेत् । अमुख्यसत्त्वावेदकं प्रमाणं तदिति चेत् । मम तावन्मुख्यमेव
सत्यमित्युक्तम् । परकीयप्रमाणतर्काणामद्यापि गहने निविष्टत्वादिति । केचित्तु तवानिष्टं
थं न भवेदिति व्याचक्षते । तत्र न पादादाविति प्रतिषेधस्य नञा निर्दिष्टमनित्यमिति
ाधानमवसेयम् ।

वा०— अत्र यथाकथञ्चित्सत्त्वानाधारतामादाय दूषणानुक्त्या सर्वथेत्यादिपक्षानुत्थानादुक्त-
णनिवर्तकतया पराभिमतं पक्षमुत्थापयति ॥ अथेति ॥ अस्त्वसत्त्वानधिकरणत्वस्य पक्षताऽवच्छेद-
ोटिनिवेशस्तावता प्रतिज्ञाया असत्त्वे पर्यवसानासम्भवेऽप्युक्तदूषणस्यापरिहार एव । न हि पूर्वत्र
त्वाभावत्वानधिकरणत्वे साध्ये भावत्वमभावत्वं वा प्रतिज्ञातं स्यादितिवदसत्त्वं स्यादिति दूषण-
ोक्तम् । किन्त्वसत एव सत्त्वानधिकरणत्वनियमात्तदनधिकरणत्वे साध्येऽसत्त्वापत्त्या प्रतितर्कपराहतानु-
मित्यर्थान्तरमिति वा । नैतत्परिहारोऽसत्त्वानधिकरणत्वस्य पक्षतावच्छेदककोटिनिवेशमात्रेण सिध्यति ।
त एव सत्त्वानधिकरणत्वनियमस्य प्रबलत्वेन सत्त्वानधिकरणत्वे साध्येऽसत्त्वप्रसङ्गस्यावर्जनीयत्वादित्या-
नाह ॥ अनिष्टेति ॥ नन्वत्रासद्वैलक्षण्यस्य साध्यकोटिनिवेशो ममाभिमतः । पूर्वत्र तु भावत्वाभावत्वा-
करणत्वयोर्विशिष्टे साध्ये वैयर्थ्यानिस्तारेण पक्षतावच्छेदककोटावेव निवेशः। न चात्रापि वैयर्थ्यं तदवस्थ-
ि वाच्यम् । सत्त्वानाधारत्वस्य तुच्छे सद्भावेऽपि ज्ञानबाध्यत्वादर्शनेन प्राप्ताप्रयोजकत्वस्यासद्वैलक्षण्य-
ेषणेन परिहारसम्भवेन वैयर्थ्याभावेन पूर्ववैलक्षण्यात् । अत एव न्यायामृते व्यर्थविशेष्यत्वं नेत्युक्तम् ।
चासत्त्वस्यापि निषेधेन तदप्राप्त्या नोक्तानिष्टमिति चेन्न । एवमप्यसत एव सत्त्वानधिकरणत्वनियमेना-
प्राप्तेरपरिहारेण तन्निषेधस्य च वक्ष्यमाणरीत्या व्याहत्यादिनाऽत्रानाशङ्कनीयत्वेनानुपपन्नतयोक्तानिष्टस्य
स्थत्वात् । अत एव विशिष्टसाध्यपक्षेऽपि सदसत्त्वापत्तिं प्रसञ्जयिष्यतीत्याशयात् । सर्वथा सत्त्वान-
रणत्वादिपक्षाणामवश्यनिराकरणीयत्वात्पूर्ववत्पूर्वपूर्वकल्पदूषणोपमर्दकतयोत्थापयितुमशक्यत्वात्सत्त्वान-
रणत्वमात्रसाध्यपक्षे च मूलोक्तासत्पदस्यासत्त्वापादनेन सार्थक्येऽपि तस्य वैयर्थ्यापत्त्या वक्ष्यमाण-
ाऽर्थान्तरपरतया योजनायां तदसम्भवेनाव्यवहितनिरस्तपक्षस्य चासत्त्वानधिकरणत्वस्य पक्षविशेषत्वा-
ाये पर्यवसानगत्या साध्यविशेषणत्वाभिप्राये च साक्षादेव विशिष्टविषयकत्वादुक्तदूषणानिस्तारेण तं
य विशिष्टसाध्यपक्ष एव दूषणान्तरपरतां भाष्यस्याभिप्रेत्य सम्भावितकल्पानुत्थापयितुं दूषणान्तरं
जानीते ॥ किञ्चेति ॥ यद्येवं सर्वथा सत्त्वानधिकरणत्वे पराभिमतिं सिद्धवत्कृत्यानिष्टानिस्तारा-
ुक्तम् । अधुना परमुखेनैव तदभिप्रायं निश्चित्य दूषयिष्याम इत्याशयेन विकल्पयति ॥ किञ्चेति ॥

कल्पानामसम्भावनानिरासाय पीठिकामारचयति ॥ **न सत्त्वं नामेति** ॥ सत्त्वविशेषणस्याविशेषितत्वस्य विशेषनिरूप्यत्वात्तत्पक्षानन्तर्यमविशेषितत्वपक्षस्य । सर्वथेत्यस्यानधिकरणत्वविशेषणत्वान्मुख्यतः पराभिप्रेतत्वाच्च तत्पक्षस्यान्यत्वम् ॥ **असतोऽपि वैलक्षण्यमिति** ॥ अत्रोत्तरत्र च यथास्थितमूलानुवादः । असतो वैलक्षण्यमपीत्येवं चार्थः । अत्र पदार्थभेदवादिन इत्येतावतैव सम्भवेन सदित्यस्य हेतुशरीरप्रवेशस्यानवश्यकत्वादाह ॥ **भेदभङ्गादिति** ॥ **भेदवादिन इति** ॥ सत्त्वासत्त्वव्यवस्थाङ्गीकारिण इत्यर्थः । यद्वा त्वया साध्यमानं सदसत्त्वपर्यवसन्नं यत्सदसद्वैलक्षण्यं तदङ्गीकारिण इत्यर्थः । ननु कथं नानिष्टं तस्य सदसत्त्वापादकतयैव सत्त्ववादिनं प्रत्यनिष्टत्वादित्यत आह ॥ **मया हीति** ॥ तर्हि विरोध एवमपि त्वां प्रत्यनिष्टत्वाभावे मां प्रत्यपि नानिष्टत्वमित्यत आह ॥ **स्वोपाधाविति** ॥ त्वया तु स्वोपाधावपि निषेधाङ्गीकारादिति भावः । ननु सत्त्वानधिकरणत्वोक्तावसत्त्वापत्तिस्तदा स्याद्यद्यसद्वैलक्षण्यमिति तन्न निषिध्येत । असत्त्वानधिकरणत्वोक्तौ सत्त्वापत्तिस्तदा स्याद्यदि सद्वैलक्षण्यमिति तन्न निषिध्येत तथा चैकैकनिषेधे सत्त्वादिलाभेऽपि उभयनिषेधस्थले सत्त्वादिपर्यवसानानुपपत्त्या उभयनिषेधमात्रस्य सिद्ध्याऽनिर्वचनीयसिद्धिरित्याशङ्कते ॥ **द्वयोरपीति** ॥ असत एव सद्वैलक्षण्यं सत एवासद्वैलक्षण्यमिति नियमप्राप्तसत्त्वासत्त्वयोर्निवारणस्याशक्यतया पुनस्तन्निषेधे च व्याहतिप्रसङ्गेन निषेधस्यैवानुपपत्तिरित्याह ॥ **तर्हीति** ॥ ननु नियमवशान्निषेधानुपपत्तौ निषेधान्यथाऽनुपपत्त्या नियम एव किं न परित्याज्य इत्यत उभयनिषेधस्य नियमस्येव प्रमाणान्तरेणासिद्ध्या न तद्बलेन नियमभङ्ग इत्याह ॥ **न हीति** ॥ तथा च निषेधद्वयसिद्धौ नियमभङ्गसिद्धिस्तत्सिद्धौ च व्याहत्यभावसिद्धिस्तत्सिद्धौ च निषेधद्वयसिद्धिरिति चक्रकम् । निषेधद्वयसिद्धौ नियमभङ्गेन व्याहत्यभावसिद्धिस्तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयो वेति भावः । ननु निषेधद्वयसाधकज्ञानबाध्यत्वादिहेतोर्व्याप्तिपक्षधर्मतोपेततया निषेधद्वयं विनाऽपर्यवसानात्तत्साधनाय च हेतौ प्रवृत्ते व्याहतिः प्रमाणसिद्धेऽर्थेऽकिञ्चित्करैवेति हेतुबलायत्तसाध्यसिद्धेर्व्याहत्यभावसिद्ध्यनधीनत्वान्न चक्रकादीत्याशयेन शङ्कते ॥ **अस्मादेवेति** ॥ हेतौ प्रवृत्ते साध्यसिद्धिसम्भवेऽपि सति व्याघाते हेतुप्रवृत्तिरेव न सम्भवति । अन्यथा व्याघातवार्तैवोच्छिद्येतेत्याशयेन व्याहतेर्दूषणत्वं परमुखेनैवानेतुं प्रतिबन्दीमुखेनाह ॥ **तर्हीति** ॥ भेदवादिन इत्येतद्बललब्धं समाधानं वक्तुं तन्निवर्त्यां शङ्कां दर्शयति ॥ **अमुख्येति** ॥ सदद्वैतवादिनः सदद्वैतभङ्गेन प्रपञ्चेऽपि मुख्यसत्त्वस्यानङ्गीकार्यत्वेऽपि सद्भेदवादिनो मम प्रपञ्चेऽपि मुख्यसत्त्वाङ्गीकारो नानुपपन्न इत्याशयेन भेदवादिन इत्युक्तिरिति भावः । प्रमाणं श्रुतिस्तर्को ज्ञानबाध्यत्वानुमानं दृश्यत्वादिकं चाभिमतम् । अत एव हेत्वन्तराभिधानेऽपीति वक्ष्यति । यद्वा प्रमाणे, प्रकृते श्रुत्यनुमानरूपे, तर्को, विश्वस्य सत्यत्वे ज्ञानबाध्यत्वं न स्यादित्यादिस्तदनुग्राहकोऽथवोक्तवक्ष्यमाणानां प्रमाणतदनुग्राहकतर्काणामित्यर्थः ।

स० — **अनिष्टानिस्तारादिति** । असत्त्वापत्तिरूपानिष्टानिस्तारादित्यर्थः । असत्वानधिकरणत्वे वादिप्रतिवादिसिद्ध इत्युक्तत्वात्कथमसत्वमादाय पर्यवसानमिति न वाच्यम् । असत्त्वानधिकरणत्वरूप-विशेषणस्योभयसंमतत्वेऽपि तदुपादानस्य प्रतिज्ञार्थे धर्मिणि साध्ये वा अविवक्षितत्वेनासत्त्वमादाय पर्यवसानस्याप्रत्यूहत्वात् न ह्युभयसंमतं सर्वं प्रतिज्ञार्थे प्रविशत्यतिप्रसङ्गादिति भावः । अथ प्रतिज्ञार्थे साध्यविशेषणत्वेन तदुपादीयते अतो नासत्त्वापत्तिरूपमनिष्टमिति, तत्रांशतः सिद्धसाधनताया उक्तत्वात् । अपरं च दोषं तत्र वक्तुमाह ॥ **किञ्चेत्यादिना** ॥ **एवमेवेति** ॥ अविशेषितसत्त्वं नाम सन्मात्रत्वं तदनाधारत्वमेकसत्त्वानाधारत्वेऽपि भवतीत्यर्थः ॥ **भेदभङ्गप्रसङ्गादिति** ॥ अनेकसर्वगतसत्त्वानां सत्त्वाधारद्रव्याभिन्नानामेकत्राङ्गीकारे तेनाप्यभिन्नत्वापत्त्या यद्येनाभिन्नं तत्तदत्यन्ताभिन्नेनाप्यभिन्नमिति व्याप्त्या एकस्य सर्वात्मकत्वापत्त्या भेदभङ्गप्रसङ्गादित्यर्थः ॥ ननु सदसत्त्वाभ्युपगमस्य विरोधेन दूषितत्वात्कथं सिद्धार्थतेत्यत आह ॥ **स्वोपाधाविति** ॥ स्वस्य घटस्योपाधिराश्रयो भूतलादिः तस्मि-न्नास्तीति निषेधप्रतियोगित्वाभावात्सत्वं परस्य पटस्योपाधावाश्रये निषेधप्रतियोगित्वादसत्त्वमित्येकस्य देशभेदात्सदसत्वे न विरुद्ध इत्यर्थः । ननु सर्वथा सत्त्वानधिकरणत्वं नाम तदितरसर्वसत्त्वानधिकरणत्वे सति तदीयसत्त्वस्याप्यनधिकरणत्वम् । घटे घटीयसत्ताया अपि प्रतिषेध इति यावत् । एवं च सत्य-वादिमतेऽपि घटे परोपाध्यवच्छेदेन घटीयसत्ताप्रतिषेधः सिद्ध एव तन्तुषु घटो नास्तीति प्रतीतेरिति न तु तदीयसत्ताप्रतिषेधोऽपि सर्वथेति विशेषणमहिम्नैव सर्वाधिकरणसंबन्धी विवक्षितः । अतः कथं परोपाधिमात्रगतनिषेधमादाय पर्यवसानम् । एवमसत्त्वप्रतिषेधोऽपि सर्वथैव विवक्षितः । तेन सर्वाधि-करणसंबन्ध्यसत्त्वप्रतिषेधलाभे कथं स्वोपाधावेव सत्त्वमादाय पर्यवसानम् । अतो नोक्तसिद्धसाधनते-त्याशङ्कते ॥ **द्वयोरपि सर्वथेति** ॥ तदीयसत्त्वासत्त्वयोरित्यर्थः ॥ **केचिदिति** ॥ ते मयावेकवचन-मित्यत्र अनुदात्तं सर्वमपादादाविति प्रतिषेधस्येत्यर्थः ॥

प० — **चतुर्थेति** ॥ अविशेषितसत्त्वेतिपक्षेत्यर्थः । स्वोपाधौ स्वाश्रये भूतलैकदेशादौ ॥ **अयं विप्रतिषेध इति** ॥ सत्त्वासत्त्वयोस्तदभावयोर्वा एकत्रानवस्थानरूपविरोध इत्यर्थः ॥ **अस्मादेवेति** ॥ बाध्यत्वाच्छुक्तिरूप्यवदिति प्रागुक्तहेतोरित्यर्थः ॥ **वक्ष्यमाणेति** ॥ माता वन्ध्येति प्रतिज्ञात्रा पुरुषेण प्रतिज्ञाऽनन्तरं स्त्रीत्वादित्यादिकं यं हेतुं स्वविवक्षितं वक्ष्यति तेन हेतुनेत्यर्थः । **सममिति** ॥ विवाद-पदं सदसद्विलक्षणमिति प्रतिज्ञायामपि सममित्यर्थः ॥ **असतोऽपि वैलक्षण्यमिति** ॥ न केवलं सद-न्तरादित्यपेरर्थः ॥ **इत्युक्तमिति** ॥ यतोऽस्माकं तावद्भावाभावत्वविषयं प्रमाणं तत्वगोचरमेवेत्यादिग्रन्थे-ऽति भावः ॥ **प्रमाणतर्काणामिति** ॥ नेहनानेत्यादिप्रमाणानां बाध्यत्वादित्यादितर्काणामित्यर्थः ।

'तेमयावेकवचनस्येति' विहितादेशस्य पादादौ निषेधात्त्वानिष्टमिति निर्देशः स्यादित्यत आह ॥ **तत्र न पादादाविति** ॥ अष्टमस्याद्यपादे 'अनुदात्तं सर्वमपादादावि'त्यनुवर्तमाने तेमयावेकवचनस्येति युष्मदस्मदोस्ते मे इत्यादेशविधायके सूत्रे अपादादौ पादादौ न भवत इति निषेधादत्र त इति कथमिति शङ्कायां 'नञा निर्दिष्टमनित्यमि'त्यादेशनिषेधोऽनित्य इत्यदोष इत्युत्तरं ज्ञेयमित्यर्थः । अनित्यत्वं च इदमस्थमुरित्युकारेण ज्ञाप्यते । नविभक्तौ तुस्मा इति नञा निर्दिष्टस्य नित्यत्वे हि निषेधादेव प्राक् दिशो विभक्तिरिति विभक्तिसंज्ञकथमुन्प्रत्ययस्थमकारस्य हलन्त्यमितिलोपाप्रसक्तेर्मकाररक्षणार्थकोकारो नोच्येतेति ज्ञापकत्वमुकारस्य ज्ञेयमित्येके। 'इकोचिविभक्तावि'त्यत्राज्ग्रहणेन ज्ञाप्यत इत्यन्ये । 'नलुमताङ्गस्ये'ति नञानिर्दिष्टस्य नित्यत्वे हि हेवारीत्यत्र विभक्तिनिमित्तनुमोऽप्राप्तेस्तत्र नुमभावार्थमज्ग्रहणमदोनर्थकमिति नलुमतेति नञा निर्दिष्टमनित्यमिति ज्ञायत इति । अपादादावित्यस्याथ किं न पादादाविति ।

या०—**सिद्धे** ॥ सतीति शेषः ॥ **अधिकं साध्यत इति** ॥ तथा चोभयसाधनान्न पूर्वोक्तदोष इति भावः ॥ **अनिष्टानिस्तारादिति** ॥ असिद्धसन्निधानेऽपि सिद्धस्य तत्त्वानपायेन पूर्वोक्तसिद्धसाधनतारूपानिष्टानिस्तारादित्यर्थः ॥ **परोपाधाविति** ॥ नन्वेकस्यैव सदसत्त्वं विरुद्धं कथमङ्गीकृतमित्यत आह ॥ **स्वोपाधाविति** ॥ स्वस्य घटस्योपाधिराश्रयो भूतलादिस्तस्मिन् घटो नास्तीति निषेधाप्रतियोगित्वात्सत्त्वं घटस्याङ्गीकर्तव्यम् । एवं परस्य पटस्योपाधावाश्रये घटो नास्तीति निषेधप्रतियोगित्वादसत्त्वमप्यङ्गीकार्यमिति नैकस्य सदसत्त्वं विरुद्धमित्यर्थः । तथाच घटादेः स्वोपाधौ सर्वथाऽसत्त्वानधिकरणत्वं परोपाधौ सर्वथा सत्त्वानधिकरणत्वं चास्तीति सिद्धसाध्यतेति भावः । न हि, सर्वथेति विशेषणमहिम्ना प्रतिषेधस्य सर्वाधिकरणसम्बन्धिता विवक्षिताऽतो नोक्तसिद्धसाध्यतेत्याशयेन शङ्कते ॥ **द्वयोरपीति** ॥ सत्त्वासत्त्वयोरित्यर्थः ॥ **वक्ष्यमाणहेतुनैवेति** ॥ मे माता वन्ध्येति प्रतिज्ञा येन कृता तेन वक्ष्यमाणो यः स्त्रीत्वादिर्हेतुस्तेनेत्यर्थः ॥ **न पादादाविति** ॥ **प्रतिषेधस्येति** ॥ तेमयावेकवचनस्येत्यत्रानुदात्तं सर्वमपादादावित्यनुवर्तत इत्यर्थः । न पादादावित्यपादादावित्यस्यार्थानुवाद इति ज्ञातव्यम् ॥

श्री०—**भेदभङ्गादिति** ॥ घटस्य पटादिनिष्ठसत्त्वाङ्गीकारे पटाद्यैक्यापत्त्या भेदभङ्गादित्यर्थः ॥ **यतः सत एवेति** ॥ तथा चासत्वानधिकरणत्वस्य सिद्धत्वात्तस्मिन् साध्ये सद्रूपत्वं प्राप्तमित्यर्थः ॥ **यतश्चासत इति** ॥ तथाच सर्वथा सत्वानधिकरणत्वे साध्येऽसद्रूपत्वं प्राप्तमिति सदसत्वं प्राप्तमित्यर्थः ॥ **सर्वथेति** ॥ स्वोपाधौ चेत्यर्थः । तथाऽप्येतद्विशेषणसामर्थ्यात्सदसत्वं न प्राप्नोतीत्याशयः । असाद्धाध्यत्वादिति हेतोः सकाशादेव । शङ्कते ॥ **सम्भावित इति** ॥ **किं च सत एवेति** ॥ सत्वेन

विश्वमिथ्यात्वसिध्या तदन्तर्गतस्य प्रत्यक्षादिप्रमाणस्यामुख्यसत्त्वावेदकत्वसिद्धिस्तत्सिद्धौ च तद्विरोधाभावेन श्रुत्यादिप्रामाण्यसिद्धिरित्यन्योन्याश्रय इति भावः ।

च०— न पादादाविति ॥ 'अनुदात्तं सर्वमपादादावि'ति सूत्रघटकस्यापादादावित्यस्य 'तेमयावेकवचनस्ये'त्यादावनुवर्तनादिति भावः ॥

अनु०— यद्युच्यतेऽपि सर्वस्मादिति सद्भेदसंस्थितिः ॥
सन्मात्रत्वं ब्रह्मणोऽपि तस्मात्तदपि नो भवेत् ॥

सु०— द्वितीये दूषणान्तरमाह ॥ यद्युच्यत इति ॥ अपिशब्दो दूषणसमुच्चये । सर्वस्मादपीत्यभिविधौ वा । यदीति श्रवणात्तर्हीति ग्राह्यम् । सर्वशब्दोऽनेकार्थः । यद्यनेकस्मात्सतो वैलक्षण्यम् । अनेकसत्त्वानधिकरणत्वं विश्वस्य साध्यमित्युच्यते तर्हि सतां भेदसंस्थितिस्ततश्चापसिद्धान्तः । इदमुक्तं भवति । विश्वमनेकसत्ताऽनधिकरणमिति प्रतिजानताऽनेकसत्त्वान्यङ्गीक्रियन्ते न वा । द्वितीयेऽनेकविशेषणं व्यर्थम् । आद्येऽप्येकस्मिन्नेवार्थेऽनेकानि सत्त्वान्युताधारभेदेन । नाद्यः । वैयर्थ्यात् । द्वितीये त्विदमुपतिष्ठते ॥ सद्भेदसंस्थितिरिति ॥ अनेकसत्त्वाधिकरणताप्रतिषेधसामर्थ्यादेवैकसत्त्वस्वीकारापत्तेरिति वा । तृतीयस्य वेदं दूषणान्तरम् । यदि सर्वस्मात्सतो वैलक्षण्यं सर्वसत्त्वानधिकरणत्वं विश्वस्य साध्यतयोच्यते तर्हि सद्भेदसंस्थितिः । न ह्यनेकसदनङ्गीकारे सर्वशब्दस्य प्रयोजनमस्ति । सन्त्येवानेकानि सन्ति पारमार्थिकं त्वेकमेवेति चेन्न । तत्सिद्ध्यर्थमेवाद्यापि भवता प्रयतनात् । तदनधिकरणत्वसाधनेंऽशेऽपसिद्धान्तात् । चतुर्थे दूषणान्तरमाह ॥ सन्मात्रत्वमिति ॥ अविवक्षितविशेषं सत्त्वं यस्माद्ब्रह्मणोऽप्यस्ति । तस्मात्कारणात्तस्मात्सतो ब्रह्मणस्तद्वैलक्षण्यम् । तत्सत्त्वानधिकरणत्वमपि विश्वस्य नोऽस्माकं मतं भवेत् । तथाच सिद्धत्वात्तदपि साध्यं नो भवेत् । अविवक्षितविशेषसत्त्वानधिकरणत्वे साध्ये ब्रह्मगतसत्त्वानधिकरणतयाऽपि प्रतिज्ञातार्थोपपत्तेरर्थान्तरतेति ।

वा०—पक्षान्तरसमुच्चायकापिशब्दबलात्पक्षान्तरदूषणपरमुत्तरवाक्यमित्येव प्रतीयते । तत् न वक्ष्यमाणरीत्या तावदेवापि तु पूर्वत्र दूषणान्तरपरमपीत्याशयेनाह ॥ द्वितीय इति ॥ तर्ह्यपिशब्दानुपपत्तिरित्यतो

भिन्नक्रमतया तद्योजनेत्याशयेन तदर्थं समुच्चयं घटयति ॥ **अपीति** ॥ अस्मिन्पक्षे व्यवहितान्वयप्रसङ्गादनन्तरान्वयेनार्थान्तरमाह ॥ **सर्वस्मादिति** ॥ एवं चानेकत्वावच्छिन्नसर्वसंग्रहेऽपि नैकस्यात्र पक्षे संग्रहः। सर्वसत्त्वानधिकरणत्वपक्षे तु तस्यापि संग्रह इति भेदः। अस्यैव वाक्यस्य पक्षपरिग्रहतत्तद्दूषणपरतया योजनाय तदनुकूलमध्याहरति ॥**यदीतीति**॥ द्वितीयपक्षदूषणत्वं घटयितुमाह ॥**सर्वेति**॥ एवमपि सर्वस्मादित्युक्तिमात्रेण न द्वितीयपक्षपरिग्रहस्य सिद्धिर्नापि तद्दूषणस्येत्यतः पूर्ववाक्यात्सतो वैलक्षण्यमित्यस्यानुवृत्तिमपसिद्धान्त इत्यस्याध्याहारं चाभिप्रेत्योभयं घटयति ॥ **यदीति** ॥ नन्वनेकसत्त्वाधिकरणत्वसाधने सद्भेदप्राप्तावपि न तदनधिकरणत्वसाधने साऽनेकसत्त्वानङ्गीकारेणाङ्गीकारेऽप्येकस्मिन्ननेकसत्त्वाङ्गीकारेण वा तदनधिकरणतासाधनसंभवादित्यतो भाष्यकारस्य विकल्पाभिप्रायं स्फुटत्वादेकपक्षदूषणानभिधानं चाभिप्रेत्य द्वितीयपक्षदूषणपरतया भाष्यं योजयितुमाह ॥ **इदमिति** ॥ भाष्यस्य विकल्पतदाद्यपक्षदूषणानुक्तिप्रयुक्तन्यूनतामसहमानः प्रकारान्तरेण भाष्याशयमाह ॥ **अनेकेति** ॥ एकैकस्मिन्नेकैकसत्त्वस्याप्यभावे सत्त्वमात्रस्य प्रतिषेध्यतयाऽनेकपदवैयर्थ्यापातेनानेकसत्त्वानधिकरणताप्रतिषेधोऽनुपपन्न इत्येकैकसत्त्वप्राप्तिरिति वा उक्तं भवतीत्यन्वयः। सर्वशब्दस्वारस्याय तृतीयपक्षदूषणपरतयाऽपि भाष्यं योजयति ॥ **तृतीयस्य चेति** ॥ पूर्वमनयोरेव पक्षयोर्न द्वितीयतृतीयावित्येकोक्तिवदत्रापि द्वितीयतृतीययोर्दूषणान्तरमाहेति वक्तव्ये योगविभागोऽप्येतत्स्वारस्यज्ञापनायेति। अत्रापि पूर्ववदेव सर्वशब्दवैयर्थ्यानुपपत्त्या सद्भेदप्राप्त्याऽपसिद्धान्त इत्याह ॥**न हीति**॥ अनेकसत्प्राप्तावपि पारमार्थिकानेकाप्राप्त्या नापसिद्धान्त इति कल्पद्वयेऽप्यपसिद्धान्तपरिहारमाशङ्कते ॥ **सन्त्येवेति** ॥ अनिर्वचनीयसिद्धेः पूर्वमनेकसर्वनिषेधान्यथाऽनुपपत्त्या पारमार्थिकानामेव प्राप्तेस्तत्पारमार्थिकत्वाभावस्यानिर्वचनीयसिद्ध्यधीनतयाऽन्योन्याश्रयादिकमित्याशयेनाह ॥ **तदिति** ॥ अस्तु वाऽपारमार्थिकानेकप्राप्तिस्तथाऽपि पारमार्थिकापारमार्थिकसर्वसत्त्वानधिकरणत्वे साध्ये पारमार्थिकसत्त्वानधिकरणत्वस्य स्वसिद्धान्तत्वेऽपि विश्वस्मिन्नपारमार्थिकसत्त्वस्य त्वदभिमततया तदनधिकरणत्वांशेऽपसिद्धान्तः। अपारमार्थिकसर्वसत्त्वानधिकरणत्वसाधने वाऽन्यगतापारमार्थिकसत्त्वानङ्गीकारेऽपि तत्तद्गतापारमार्थिकसत्त्वस्य तस्मिंस्त्वयाऽप्यङ्गीकारात्तदनधिकरणत्वांशेऽपसिद्धान्तः स्यादेवेत्याह ॥ **तदनधिकरणत्वेति** ॥ अस्मिन्वाक्ये सतो वैलक्षण्यमित्यस्य नानुवृत्तिस्तस्मात्तदित्यनेनैव तदर्थलाभो, विश्वस्येत्यनुवृत्तिर्द्वितीयपादस्य चानुवृत्तिरित्याशयेनाह ॥ **तस्मादिति** ॥ एवं सति सिद्धं दूषणमाह ॥ **अविवक्षितेति** ॥

स० — **अपसिद्धान्तादिति** ॥ व्यावहारिकसत्त्वानधिकरणत्वसाधनेऽपसिद्धान्तादित्यर्थः ॥ अंशे अपसिद्धान्तादिति पाठे पारमार्थिकसत्त्वानङ्गीकारेऽपि व्यावहारिकसत्त्वस्य प्रपञ्चेऽङ्गीकृतत्वेन तदुभयाभावे साध्यमानेंऽशेऽपसिद्धान्तादित्यर्थः।

प०---**द्वितीय इति** ॥ अनेकसत्त्वानधिकरणत्वमिति पक्ष इत्यर्थः ॥ **दूषणसमुच्चय इति** ॥ ागुक्तसिद्धसाधनत्वरूपदूषणेन सहेहोच्यमानदूषणसमुच्चय इत्यर्थः । विकल्पपूर्वकं योजनां विनैव कारान्तरेण तद्दुष्टत्वमाह ॥ **अनेकसत्त्वानधिकरणताप्रतिषेधेति** ॥ तृतीयस्य वेति सर्वसत्त्वानधिकरण-वपक्षस्येत्यर्थः ॥ **अनेकानि संतीति** ॥ अनेकसत्यवस्तूनीत्यर्थः ॥ **अंशेऽपसिद्धान्तादिति** ॥ असत्त्वा-धिकरणत्वांशेऽपसिद्धान्ताभावेऽपि व्यावहारिकसत्त्वानधिकरणत्वांशेऽपसिद्धान्तः । तादृशसत्त्वस्य जगति नया स्वीकारादिति भावः ॥ **चतुर्थ इति** ॥ अविशेषितसत्त्वेतिपक्ष इत्यर्थः । तस्मादित्यस्यावृत्ति-पेत्यार्थमाह ॥ **तस्मात्सतो ब्रह्मण इति** ॥ तस्मात्तदपि नो भवेदित्यस्यार्थान्तरमाह ॥ **सिद्धत्वात्तदपीति**॥ अमानोनाः प्रतिषेध' इति निषेधार्थो नोशब्दः ।

या०— **अनेकविशेषणेति** ॥ त्वन्मत इति शेषः । तेन तत्त्ववादिमते सिद्धसाधनतापरि-ारार्थत्वान्न वैयर्थ्यमिति शङ्काऽनवकाशः । न च प्रतिवादिनः सिद्धसाधनतापरिहारस्यापि मत्प्रयोजन-वान्न वैयर्थ्यमिति वाच्यम् । सन्नामभावो निरूप्यत इति भाट्टमतानुसारिणा त्वयाऽसतां प्रतिषेध्या-ामनेकसत्त्वानां परप्रसिद्धिमात्रेण प्रतिषेधस्य साधयितुमशक्यत्वादित्यभिप्रायात् । अत एवास्वरसा-प्रकारान्तरमाह ॥ **अनेकसत्त्वाधिकरणताप्रतिषेधेति** ॥ **पारमार्थिकं त्वेकमेवेति** ॥ तथा च ाद्वैतहानिरिति भावः ।

श्री०— द्वितीयेऽनेकसत्त्वानधिकरणत्वपक्षे ॥ **दूषणसमुच्चये** ॥ प्रागुक्तसिद्धसाधनत्वरूपदूषणेन ाहोच्यमानदूषणसमुच्चय इत्यर्थः ।

सु०— **अथवा किमिदं सत्त्वं नाम । यदनधिकरणत्वं विश्वस्य साध्यते । किं सामा-यसत्त्वमुत स्वरूपसत्त्वम् । आद्यं दूषयति ॥ यद्युच्यत इति ॥ सर्वस्मात्सर्वार्थानुगतात्सामान्या-द्विलक्षण्यं तदनाधारत्वमिति यावत् । साध्यतया यद्युच्यते तदा सङ्ख्येदसंस्थितिः । यदि सत्त्वैव ास्ति तदा तदनधिकरणत्वप्रतिज्ञा व्यर्था स्यात् । नेदं शशविषाणाधिकरणमितिवद्धिप्रतिपत्ते-रवानुदयात् । सत्तासामान्याङ्गीकारे च सङ्ख्येदो दुर्वार एव । न ह्येकाश्रयं सामान्यमस्ति । ानन्ति सत्ताधिकरणानि सन्तीति चेत्तर्हि कानीति वक्तव्यानि । द्रव्यादीनीति चेत्कथं तर्हि ेषामेव तदनधिकरणत्वसाधनम् । व्यवहारतः सर्वमस्ति । परमार्थतस्तु नेति चेन्न । उक्तो-त्तरत्वात् । एतच्च परमनेनोत्तरमुक्तं वेदितव्यम् । स्वननेन तु सिद्धसाधनत्वं द्रष्टव्यम् ।**

द्रव्याद्यतिरिक्तानुगतमत्त्वसामान्यस्यैवानङ्गीकारात् । द्वितीयं दूषयति ॥ सन्मात्रत्वमिति ॥ सत्तानपेक्षं सत्त्वं सन्मात्रत्वं स्वरूपसत्त्वमिति यावत् । तद्ब्रह्मणोऽप्यस्ति यतस्तस्मात्कारणात्तस्माद्ब्रह्मणस्तद्वैलक्षण्यमब्रह्मत्वमपि विश्वस्य नो भवेदिति । अथवा सामान्यसत्तापक्षे दोषान्तरमनेनोच्यते । तथा हि सत्तासामान्यविधुरस्यापि ब्रह्मणः सन्मात्रत्वं स्वरूपसत्त्वं तावदस्ति । न पुनः सत्त्ववैधुर्यादसदनिर्वाच्यं वा ब्रह्म । तस्मात्सत्तावैधुर्यस्यासत्त्वाद्यहेतुत्वात्तत्सत्तानधिकरणत्वमपि विश्वस्य नो भवेदिति । एतेन ब्रह्मस्वरूपं सत्त्वमिति पक्षोऽपि निरस्तः । अर्थक्रियाकारित्वं ज्ञानाबाध्यत्वं वा सत्त्वमिति पक्षद्वयं स्फुटदोषत्वान्न दूषितम् । अर्थक्रियावैधुर्यसाधने हि बाधः स्फुट एव । परमार्थतो नास्तीत्यप्युक्तोत्तरम् । सत्यस्य नार्थक्रियेति वदता मिथ्याभूतस्यैवार्थक्रियाऽङ्गीकृतेति सिद्धान्तविरोधश्च । अर्थक्रियाविधुरस्यापि ब्रह्मणः सत्त्वात्तद्वैधुर्यं नासत्त्वादिहेतुः । अर्थक्रियाऽनधिकरणतामात्रसाधनं प्रकृतानुपयुक्तं तद्विरुद्धं च । ज्ञानाबाध्यत्ववैधुर्यं च तद्बाध्यत्वमेव । नच हेत्वर्थान्न भिद्यत इति स्फुटमेव । हेत्वन्तराभिधानेऽपि वक्ष्यमाणन्यायेन बाधसिद्धार्थताद्यापत्तिः स्फुटैव । यदत्रोक्तम् । त्वयाऽपि द्वे तत्त्वे सदसदिति तत्त्वं व्यवस्थापयता यदेव सत्त्वेन व्यवस्थापितं तस्यैव मयाऽप्यङ्गीकारान्न सच्छब्दार्थानिरुक्तिरिति । तदतीव मन्दम् । मया हि । क्वचित्सदिति भावो व्यवह्रियते । क्वचिच्च प्रतिपन्नोपाधौ निषेधाप्रतियोगि । क्वापि मूर्तमित्यादि तत्सर्वं च निरस्तमिति ।

वा० –अपिशब्दस्वारस्यात्पक्षान्तरनिराकरणपरतया यद्वोच्यत इति श्लोकं योजयति ॥अथवेति॥ न च सत्त्वं भावत्वं विद्यमानत्वं वा सत्तासामान्यं वा स्वरूपसत्त्वं वेति पूर्वमेव विकल्प्याद्यद्वयदूषणपरतया वैलक्षण्यं सतश्चेति वाक्यमवतार्य तृतीयचतुर्थदूषणपरतयैतच्छ्लोकः कुतो नावतारितइति वाच्यम् । सर्वलोकाभिधानादिप्रसिद्ध्याश्रयेण प्रवृत्तयोर्भावत्वविद्यमानत्वकल्पयोर्वादिप्रसिद्धविभागाश्रयेण प्रवृत्तसत्तासामान्यस्वरूपसत्त्वकल्पाभ्यां न समकक्षतेत्याशयात् । सर्वशब्दस्य सर्वार्थानुगतलक्षणामभिप्रेत्यैतत्कल्पं भाष्यारूढं करोति ॥ सर्वस्मादिति ॥ सर्वस्माद्वैलक्षण्यं लक्षणतया यद्वोच्यत इत्यपि योजयति ॥ साध्यतयेति ॥ अत्र सत्ताया अनङ्गीकारेऽपि तदनधिकरणत्वस्य सुसाधत्वान्न सद्भेदसंस्थितिरिति दूषणमुपपन्नमित्यतोऽनङ्गीकारपक्षं बहिरेव प्ररूप्याङ्गीकारपक्षं परिशोष्य भाष्यान्तरपरत्वेन योजयितुमनङ्गीकारपक्षदूषणस्य पूर्वेत्र सर्वशब्दवैयर्थ्यस्यानधिकरणत्वमात्रसाधने बाधेनानुपपन्नत्वात्प्रकारान्तरेण तं दूषयति ॥ यदीति ॥ नेदमिति ॥ 'अलीके सुमनसां मूकतैवे'ति न्यायेनाप्रसिद्धप्रतिषेधायोगादिति भावः । अन्यथा नित्यमेकमनेकसमवेतं सामान्यमिति तल्लक्षणव्याघातः । उपदेशादिनैकस्मिन्नेव सङ्गतिग्रहणाद्युपपत्तय

वैयर्थ्यं चेत्यभिप्रेत्याह ॥ **न हीति** ॥ ततश्चापसिद्धान्त इति भावः । सत्ताऽधिकरणानेकाङ्गीकारेऽपि नापसिद्धान्त इति गूढाभिसन्धिराशङ्कते ॥ **सन्तीति** ॥ अत्र कथं तर्हीत्यादिना व्याहतिं वक्तुमन्यस्य सत्तासामान्याधिकरणत्वे विश्वस्य तदनधिकरणत्वसाधनेऽपि न व्याघात इति स्वयमन्याभावे प्रतिपादनीये किं तेन, परमुखेनैव व्याघातं व्युत्पादयिष्यामीत्याशयेनाशयमजानान इव पृच्छति ॥ **तर्हीति** ॥ शङ्किता स्वाशयमुद्घाटयति ॥ **व्यवहारत इति** ॥ **उक्तेति** ॥ तत्सिद्ध्यर्थमेवाद्यापीत्यादिनेत्यर्थः । स्वमतसिद्धदूषणप्रायेणास्यापि तथात्वभ्रान्तिं निवारयति ॥ **एतच्चेति** ॥ एतेनानङ्गीकारपक्षे स्वोक्तदूषणमपि परमतेनेति सूचयति । अत एव तत्त्वोद्योतेऽत्राप्यर्थान्तरमेवोक्तमिति ध्येयम् । कुतोऽस्य न स्वमतसिद्धत्वमत्राह ॥ **द्रव्यादीति** ॥ अनुगतग्रहणेन न ह्येकाश्रयमित्युपपादनस्य स्वासिद्धत्वं दर्शयति । कुतो नानुगताङ्गीकार इत्यतो द्रव्यातिरिक्तत्वपक्षेऽपि तत्सम्भवेऽप्यनुगतस्य द्रव्याद्यभेदे द्रव्यादेरप्यभेदापत्त्या न मत्पक्षे तत्सम्भव इति सूचयितुं द्रव्यातिरिक्तेत्युक्तम् । यद्वा स्वमतेन तु सिद्धसाधनत्वमित्युक्तमुपपादयति ॥ **द्रव्यादीति** ॥ **नो भवेदिति** ॥ तथा च स्वरूपसत्त्वानधिकरणत्वे साध्ये विश्वस्याब्रह्मत्वसिद्ध्याऽपि प्रतिज्ञार्थोपपत्तेरर्थान्तरमित्युक्तं भवति । अस्मिन्पक्षे स्वमतेन सत्तासामान्यानधिकरणत्वपक्षदूषणं यत्सिद्धसाधनत्वादि तद्व्याख्यानारूढमिति तदारूढतायै सन्मात्रत्वमिति वाक्यं प्रकारान्तरेण योजयति ॥ **अथवेति** ॥ तथात्वे प्रथमपादोऽसङ्गत इत्यतस्तं सङ्गमयितुमाह ॥ **तथा हीति** ॥ **एतेनेति** ॥ स्वरूपसत्त्वानधिकरणत्वपक्षनिराकरणेनेत्यर्थः । ब्रह्मस्वरूपत्वाभावस्येष्टत्वादिति भावः । भाष्ये न्यूनतां परिहरति ॥ **अर्थेति** ॥ **स्फुटत्वादिति** ॥ बाधापसिद्धान्तार्थान्तरादीनां प्रकृतानामुपपादनप्रकारस्यात्र स्फुटत्वादित्यर्थः । एवेत्युपपादनानपेक्षत्वं दर्शयति । अपसिद्धान्तस्योपपादनसापेक्षत्वेऽप्युपपादनप्रकारस्य मिथ्यायाः साधकत्वं चेत्याद्युक्तिबललब्धतामाह ॥ **सत्यस्य नार्थक्रियेति** ॥ सन्मात्रत्वमित्येतद्द्वितीयव्याख्यासमानन्यायेनार्थान्तरमुपपादयति ॥ **अर्थेति** ॥ नन्वर्थक्रियावैधुर्यस्यासत्त्वानिर्वचनीयत्वाहेतुतायामपि नार्थान्तरता । स्वरूपेणैव तस्य त्वां प्रत्यनिष्टत्वेन तत्साधनसम्भवादित्यत आह ॥ **अर्थेति** ॥ तस्य मां प्रत्यनिष्टत्वेऽप्यनिर्वचनीयत्वाहेतुत्वे प्रमाणादीनां साधकत्वमिति प्रकृतप्रमेये तत्साधनस्याननुयोगादर्थान्तरमेव । प्रमाणादीनां साधकत्वमिति प्रकृतविरुद्धता च तद्वैधुर्यसाधनस्येति भावः । दृश्यत्वादिरूपहेत्वन्तराभिधानेऽपि ज्ञाननिवर्त्यत्वतन्त्राश्रयत्वप्रतिपन्नोपाधौ त्रैकालिकसत्त्वानिषेधस्वरूपतदभिमतज्ञानबाध्यत्वस्य ज्ञानबाध्यत्वमिति वाक्यार्थतया वियदादेः सत्त्वेन नित्यत्वेन चाविद्योपादानकत्वाभावादिति लक्षणासम्भवादिप्रतिपादकवक्ष्यमाणन्यायेन सम्पूर्णबाधांशबाधापत्त्याऽसाधनीयत्वान्मदभिमतस्य च विज्ञानस्येत्यादिवक्ष्यमाणसिद्धसाधनार्थान्तरव्यर्थविशेषणत्वादिनाऽसाधनीयत्वान्न काऽप्यनुपपत्तिरित्याशयेनाह ॥ **हेत्वन्तरेति** ॥ **मूर्तमित्यादीति** ॥ अत्रादिपदेन सीदतीति व्युत्पत्त्याऽनित्यं

चेदित्यादेर्ग्रहणम् ॥ **तत्सर्वमिति** ॥ एवं चास्मिन्पक्षे सकलपक्षोक्तदूषणप्रसङ्गः । अन्यपक्षेषु तु तत्पक्षोक्तदूषणमेवेति भावः । अत एव पूर्वमतीव मन्दमित्युक्तमिति ज्ञेयम् ।

स० — अर्थक्रियाकारित्वं चेत्सत्त्वं तर्हि तदनधिकरणत्वं विशिष्टाभावरूपं द्वेधा पर्यवस्यति ॥ अर्थक्रियारूपविशेषणवैधुर्येण वा अर्थक्रियारूपविशेषणस्य विद्यमानत्वेऽपि तदधिकरणत्वरूपविशेष्याभावेन वेति । तत्राद्यं दूषयति ॥ **अर्थक्रियावैधुर्येति** ॥ द्वितीयं दूषयति ॥ **अर्थक्रियानऽधिकरणेति** ॥ अर्थक्रियाऽधिकरणत्वस्यैवाभावसाधनमित्यर्थः ॥ **प्रकृतानुपयुक्तमिति** ॥ प्रकृतं यन्मिथ्यात्वसमर्थनं तदुपयुक्तं न भवतीत्यर्थः । अत्र हि मिथ्यात्वसमर्थनायार्थक्रियाऽनधिकरणत्वरूपसद्विलक्षण्यं साधनीयम् । प्रपञ्चस्य सद्विलक्षणत्वादुपपन्नं श्रुत्यादिना मिथ्यात्वसमर्थनमित्युक्तत्वात् । न चार्थक्रियाया विद्यमानताम् अङ्गीकृत्य प्रपञ्चस्य तदनधिकरणतामात्रसाधनेन मिथ्यात्वमुपपादयितुं हि परस्यायं प्रयत्नः । ततश्च प्रमाणादिप्रपञ्चे साधकत्वमर्थक्रियाऽधिकरणत्वरूपं प्रस्तुतमित्युक्तं स्यात् । तदनधिकरणतासाधने तु प्रकृतविरोध इत्यर्थः । बाधसिद्धार्थताद्यापत्तिः स्फुटैवेति । ज्ञाननिवर्त्यत्वस्य वा प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वस्य वा बाध्यत्वस्य मिथ्याशब्दार्थत्वेन विवक्षितत्वे बाधः । अन्यथाविज्ञातस्य अन्यथाविज्ञानगोचरत्वरूपत्वे सिद्धसाध्यतेत्यर्थः । आदिपदेन दृष्टान्ते साध्यवैकल्यादिकम् ॥ **काऽप्य-मूर्तमिति** ॥ मूले सदिति सम्प्रोक्तमित्युक्तेः । आदिपदात् काप्युत्तमम् । 'सच्छब्द उत्तमं ग्रयादित्यादे'रिति ज्ञातव्यम् ॥ **तत्सर्वं निरस्तमिति** ॥ निरस्तप्रायमित्यर्थः ॥

प० — 'जात्यङ्गीकारे सद्धेतुत्वमित्यादितत्त्वोद्योतरीत्या योजयति ॥ **अथवेति** ॥ सत्ताऽनधिकरणत्वं प्रतिजानता सत्ताऽङ्गीक्रियते न वेति विकल्पौ हृदि कृत्वा द्वितीये दोषोक्तिपूर्वमाद्यकल्पे मूलं योजयति ॥ **यदि सत्त्वेत्यादिना** ॥ शङ्कते ॥ सन्तीति ॥ एकं क्रियापदं । अपरं शतृप्रत्ययान्तं कारकपदं ॥ **उक्तोत्तरत्वादिति** ॥ तत्सिद्ध्यर्थमेव भवता प्रयतनादित्यादिग्रन्थेनेत्यर्थः ॥ **द्वितीयमिति** ॥ स्वरूपसत्त्वपक्षं । तस्मात्तदर्पात्यादेरर्थः । तस्मात्सतो वैधुर्यस्येत्यादि । प्रागुक्तपक्षान्तरं च निराह ॥ **उक्तो-त्तरमेवेति** ॥ तत्सिद्धार्थमेवेत्यादिनेति भावः । नासत्त्वादिहेतुरित्यादिपदेनानिर्वाच्यत्वग्रहः । तथा च तद्वैधुर्यसाधनेऽर्थान्तरतेति भावः । अर्थक्रियाकारित्वरूपसत्त्वानधिकरणत्वपक्षस्य भाष्ये अत्र चानिरासे हेतुद्वयं चाधिकमाह ॥ **अर्थक्रियाऽनधिकरणतामात्रेति** ॥ मिथ्याभूतस्यापि साधकत्वस्य निर्वहणं हि प्रकृतं, तस्यानुपयुक्तं प्रत्युतसाधकत्वविरुद्धं चातोऽत्र भाष्ये तदाशङ्क्य न निरस्तमिति भावः ॥ **हेत्वर्था-दिति** ॥ विवादपदं सदसद्विलक्षणं ज्ञानबाध्यत्वादिति प्रागुक्तहेत्वर्थादित्यर्थः । तथा च साध्या-

... **वक्ष्यमाणेति** ॥ विवादपद असत्त्वानधिकरणं ज्ञानाबाध्यत्वरूपसत्त्वानधिकरणं दृश्यत्वादित्याद्युक्तावपि 'ज्ञानबाध्यत्वमपि त्वि'त्यत्र वक्ष्यमाणव्याघाताद्यनिस्तार इत्यर्थः ॥ **क्वापि मूर्तमिति** '॥ नासदासीन्नोसदासीदि'त्यत्र सत्पदेन पृथिव्यप्तेजोरूपं मूर्तमुच्यत इत्यर्थः । आदिपदेन 'नासतो विद्यते भावो नाभावो विद्यते सत' इत्यादौ कार्याद्युच्यते । सदेव सोम्येत्यादौ स्वातन्त्र्याद्युच्यत इत्यादि ग्राह्यम् ॥ **निरस्तमिति** ॥ भावस्यापि भावान्तरवैलक्षण्यभावत्वानधिकरणत्वादेः सिद्धत्वाद्युक्त्येति भावः ॥

या० --सामान्यानधिकरणत्वमित्यत्र सत्तासामान्याधिकरणताप्रतिषेधः किं सत्तासामान्यनिषेधमादाय पर्यवस्यतीत्यभिप्रेतमुताधिकरणत्वप्रतिषेधमादायेति विकल्पं मनसि निधायाद्यं दूषयति ॥ **यदि सत्तैव नास्तीति** ॥ द्वितीयं दूषयति ॥ **सत्तासामान्याङ्गीकारे चेत्यादिना** ॥ तथा चास्मिन्पक्षे द्वैतापत्तिर्बाधश्चेति दूषणद्वयमुक्तमित्यवधेयम् । अर्थक्रियाकारित्वं चेत्सत्त्वं तर्हि तदनधिकरणत्वं विशिष्टाभावरूपं द्वेधा पर्यवस्यति । अर्थक्रियारूपविशेषणवैधुर्येण वोत तस्य सत्त्वेऽप्यधिकरणत्वरूपविशेष्याभावेन वेति विकल्पं मनसि निधायाद्यं दूषयति ॥ **अर्थक्रियावैधुर्यसाधन इति** ॥ अर्थक्रियारूपपदार्थस्यैवाभावसाधन इत्यर्थः ॥ **अङ्गीकृतेति** ॥ अर्थक्रियारूपं वस्त्वङ्गीकृतमेवेति हेतोरित्यर्थः ॥ **नासत्त्वादिहेतुरिति** ॥ तथा चार्थान्तरतेति भावः । नार्थक्रियारूपवस्त्वभावः साध्यते येनोक्तबाधाद्यवकाशः किं त्वर्थक्रियारूपं वस्तु प्रपञ्चनिरूपितजन्यजनकभावसम्बन्धवत्त्वेनैवाङ्गीकृत्य प्रपञ्चे तदाधारतामात्रं प्रतिषिध्यत इति द्वितीयं पक्षमनूद्य दूषयति ॥ **अर्थक्रियाऽनधिकरणतामात्रसाधनमिति** ॥ मात्रपदेन जगतो जन्यजनकभावसम्बन्धेनार्थक्रियाऽङ्गीकारं सूचयति ॥**प्रकृतेति** ॥ प्रकृते यन्मिथ्यात्वसमर्थनाय सद्वैलक्षण्यं तदुपयुक्तं न भवतीत्यर्थः । अत्र हि मिथ्यात्वसमर्थनायार्थक्रियाऽनधिकरतणत्वरूपसदसद्वैलक्षण्यसाधनं क्रियते । प्रपञ्चस्य सदसद्विलक्षणत्वादुपपन्नं श्रुत्यादिना मिथ्यात्वसमर्थनमित्युक्तत्वात् । न चार्थक्रियायाः प्रपञ्चनिरूपितजन्यजनकभावसम्बन्धवत्त्वेन विद्यमानतामङ्गीकृत्य प्रपञ्चस्य तदनधिकरणतामात्रसाधने मिथ्यात्वमुपपादितं भवति किन्तु ब्रह्मवत्सद्रूपत्वमेवेति भावः ॥ **तद्विरुद्धं चेति** ॥ विद्यमानार्थक्रियाजनकत्वस्य सत्यत्वव्याप्तत्वादिति भावः । हेत्वन्तरं दृश्यत्वादि ॥ **वक्ष्यमाणन्यायेनेति** ॥ 'ज्ञानबाध्यत्वमपि तु न सिद्धं प्रतिवादिन' इत्यनुपदमेव वक्ष्यमाणन्यायेन ज्ञाननिवर्त्यत्वस्य वा प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वस्य वा बाध्यत्वस्य विवक्षितत्वे बाधः । अन्यथाविज्ञातस्य सम्यग्विज्ञानविषयत्वरूपत्वे सिद्धार्थतेत्यर्थः । आदिपदेन दृष्टान्ते साध्यवैकल्यादिकं ग्राह्यम् ॥ **क्वचिद्वात्र इति** ॥ इदं च 'द्वैतत्वे सदसदि'त्यत्रैव द्रष्टव्यम् । एवं चात्रासच्छब्देनाभावरूपतत्त्वस्यैव विवक्षितत्वात् असतो नृशृङ्गादेः कथं तत्त्वाविशेषारूपतेति शङ्काऽनवकाशः ॥ **क्वचित्प्रतिपन्नेति** ॥ 'ब्रह्म सदि'त्यादावित्यर्थः ॥ **क्वापि**

मूर्तमिति ॥ 'नासदासीन्नोसदासीदि'त्यत्रेत्यर्थः । आदिपदेन 'ब्रह्मैव सदि'त्यादावुक्तम् । 'सच्छब्द उत्तमं ब्रूयादित्यादे'रिति द्रष्टव्यम् ॥ **तत्सर्वं निरस्तमिति** ॥ अत्र किञ्चिन्निरस्तं किञ्चिन्निरस्तप्रायमित्यर्थः । मूर्तवैलक्षण्यादेः पूर्वमनिरस्तत्वात् । मूर्तवैलक्षण्यस्य मूर्ते बाधितत्वेनामूर्ते सिद्धार्थत्वेन निरासो ज्ञातव्यः ॥

श्री०— **सन्त्येवानेकानि सन्तीति** ॥ व्यावहारिकाणीत्यर्थः ॥ **तदनधिकरणत्वेति** ॥ व्यावहारिकसत्वानधिकरणत्वेत्यर्थः ॥ **तद्विरुद्धं चेति** ॥ अर्थक्रियानिरूपितजन्यजनकभावसंबन्धं अङ्गीकृत्य तदनधिकरणत्वरूपं सद्विलक्षणत्वम् ।

च०— **सामान्यसत्वमिति** ॥ सामान्यरूपं सत्त्वमित्यर्थः । परमतेन सत्तासामान्याङ्गीकर्तृनैयायिकदिशा ॥

अनु०— ज्ञानबाध्यत्वमपि तु न सिद्धं प्रतिवादिनः ॥
विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतम् ॥

सु०— एवं प्रतिज्ञां निराकृत्य हेतुमप्यपाकरोति ॥ **ज्ञानबाध्यत्वमिति** ॥ न केवलं प्रतिज्ञा दुष्टा । किं नाम हेतुभूतं ज्ञानबाध्यत्वमपीत्यर्थः । तुशब्दः सिद्धान्त्यभिमताज्ज्ञानबाध्यत्वाद्व्यवच्छिनत्ति । ज्ञानबाध्यत्वं हि ज्ञाननिवर्त्यत्वं वा प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा हेतुत्वेन परस्याभिमतम् । न च प्रपञ्चे तत्प्रतिवादिनो मम सिद्धम् । अतोऽन्यतरासिद्धो हेतुरिति । नन्वीश्वरज्ञानेन प्रपञ्चनिवृत्तिस्त्वयाऽपीष्यत एव । अन्यथा तस्य संहारकर्तृत्वानुपपत्तेः । ज्ञानादिमत एव कर्तृत्वात् । सत्यम् । नैवं ज्ञाननिवर्त्यत्वं परस्याभिप्रेतम् । अपि तर्ह्यज्ञानोपादानकस्य समाने विषये विरोधिना ज्ञानेनोपादाने निवृत्ते स्वयमेव विलपनम् । यथाऽऽह । 'अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाध' इति । न चायं प्रपञ्चेऽस्माकं संमतः । किन्तु मुद्गरप्रहारादिना घटस्येवेश्वरस्य ज्ञानेच्छाप्रयत्नव्यापारैर्विनाश एव । स एव हेतुरस्त्विति चेन्न । तथाविधमपि ज्ञानबाध्यत्वं पक्षैकदेशे प्रकृत्यादौ न सिद्धं प्रतिवादिन इति भागासिद्धत्वात् । किञ्च सत्यस्यापि ज्ञानविनाश्यत्वमस्तु । न च विपक्षे किञ्चिद्बाधकमस्तीत्यतोऽप्रयोजकत्वाज्ज्ञानबाध्यत्वं न सिद्धमपि व्याप्यत्वासिद्धमपीति

यावत् । प्रतिवादिनो मतेनेति गुडजिह्विकामात्रम् । बाधकानुपन्यासे वादिनोऽपि व्याप्यत्वासिद्धेरावश्यकत्वात् । सतो विनाशे चैतन्यस्यापि विनाशप्रसङ्ग इति चेत् । तर्हि विनाशमात्रस्य साध्यप्रयोजकत्वेन ज्ञानबाध्यत्वमसिद्धमपि । व्यर्थविशेषणासिद्धमपि स्यात् । नाश्यत्वमात्रं हेतुर्ज्ञानेति स्वरूपकथनमात्रम् । स चोक्तबाधकसानाथ्येन नाप्रयोजक इति चेन्न । सत्त्वसाम्येऽपि विनाशकारणसदसद्भावेन विशेषस्योक्तत्वात् । ननु च नेहनानाऽस्तीतिप्रतिपन्नोपाधौ श्रौतनिषेधात्मा बाधः प्रपञ्चेऽस्तीति चेन्न । श्रुत्यर्थनिर्णयोत्तरकालमेवैतत् । स एव तूपपत्तिविरोधादशक्य इत्युच्यमानत्वात् । अथवा ज्ञानबाध्यत्वमसिद्धं व्याप्तिरहितमपीति योज्यम् । तथा हि । किं त्वदभिमतं ज्ञानबाध्यत्वमत्र हेतूक्रियते किं वाऽस्मदभिमतमिति वाच्यम् । आद्ये चेदुक्तन्यायेन न सिद्धं प्रतिवादिनः । द्वितीये व्याप्तिवैधुर्यमिति । तत्कथमित्यत आह ॥ विज्ञातस्येति ॥ हि यस्मादन्यथाविज्ञातस्य सम्यग्विज्ञानमेव बाधस्तद्विषयत्वमेव तद्बाध्यत्वं मतमस्माकम् । तच्चात्मनि विपक्षे गतमिति व्याप्तिविकलमिति वाक्यशेषः । सत्योऽप्यात्मा देहाद्यात्मना विज्ञातो वेदान्तजनितसम्यग्विज्ञानवृत्तिविषय इति परेणाप्यङ्गीकार्यम् । अन्यथा अविद्यानिवृत्त्यनुपपत्तेरिति ।

वा०---- अपिशब्दस्वारस्यानुरोधाज्ज्ञानबाध्यत्वरूपसाध्यान्तरनिराकरणपरमुत्तरवाक्यमित्याभाति । तथात्वे च साध्ये प्रतिवाद्यसिद्धत्वस्य भूषणत्वेन दूषणासङ्गतिरित्यतस्तत्तात्पर्यमाह ॥ एवमिति ॥ यद्यपि परेण सदसद्विलक्षणत्वस्येव ज्ञानबाध्यत्वस्याप्यनिर्वचनीयतयोक्तत्वात्सदसद्विलक्षणत्वरूपानिर्वचनीयत्वं निरस्य ज्ञानबाध्यत्वरूपं तन्निराकरोतीति साध्यान्तरनिराकरणपरतयाऽपीदं व्याख्यातुं शक्यं तथाऽपि साधकत्व मिथ्यात्वोपपादनोपयोगितया सदसद्वैलक्षण्यस्यैव प्रस्तुततयाऽनिर्वचनीयत्वसामान्यस्याप्रस्तुतत्वेन तस्य साध्यतया निर्देशा'त्वसिद्धं प्रतिवादिन' इत्यस्यास्वारस्याच्च तथा न व्याख्यातमिति ध्येयम् । ननु तर्ह्यपिशब्दानुपपत्तिः । न केवलं प्रतिज्ञाऽसिद्धा किन्तु हेतुरपीति व्याख्यानेऽप्यसिद्धभूषणत्वेन प्रतिज्ञादूषणत्वाभावात्पूर्वं प्रतिज्ञायां तस्य अनुक्तेश्चानुपपत्तिरेवेत्यतो दुष्टत्वरूपसामान्ये समुच्चयमभिप्रेत्य तदर्थमाह ॥ नेति ॥ ननूत्तरवाक्ये ज्ञानबाध्यत्वस्य प्रतिवादिसम्मतत्वोक्त्या तद्विरोधोऽसिद्धत्वोक्तेरित्यत आह ॥ तुशब्द इति ॥ शुक्तिरजतादौ पराभ्युपेतयोर्ज्ञाननिवर्त्यत्वप्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपयोर्बाध्यत्वयोर्यथैकस्य वस्तुतोऽसिद्धावपि नापरस्यासिद्धिर्न तथा प्रकृते किन्तु प्रपञ्चे पराभिमतयोरुभयोरप्यसिद्धिरित्याशयेन तुशब्दलभ्यविशेषस्वरूपं दर्शयन्नेवासिद्धिमुपपादयति ॥ ज्ञानेति ॥ ज्ञानेन प्रपञ्चनिवृत्तिस्त्वयाऽपीष्यतएवेतिवदन्प्रष्टव्यः।हेतुत्वेन मदभिमतस्यैवत्वदभिमतत्वाज्ञान्यतरासिद्धिरित्याशयः

स्वाभिमतज्ञाननिवर्त्यत्वस्य वैलक्षण्येऽपि [illegible]
त्वेनोपन्यासान्न प्रतिवाद्यसिद्धिरिति । नाद्यः । त्वदभिमतस्य हेतुतयोपन्यस्तस्य न मदभिमतत्वमतः
वादिनं मां प्रत्यसिद्धिरेवेत्याह ॥ **नैवमिति** ॥ **स्वयमेवेति** ॥ ज्ञानस्य पृथक् तत्र व्यापाराभाव-
ोपादाननिवृत्तिद्वारा प्रयोजकत्वमस्त्येवेति ज्ञाननिवर्त्यत्वमक्षतमेवेति भावः । अथवेश्वरव्यापारनिवृ-
र्थमेतदिति ज्ञेयम् । विवरणकारेण बाधलक्षणान्तरनिराकरणेनाज्ञानस्य ज्ञानेन निवृत्तिर्बाध इति
क्षणमभिप्रेत्योक्तमज्ञानस्येति । तदत्र सम्मतितयोदाहरति ॥ **यथाऽऽहेति** ॥ घटादिज्ञानेन
प्रमानाया घटाद्यज्ञाननिवृत्तेरपि बाधत्वापत्तेराह ॥ **स्वकार्येणेति** ॥ वार्तमानिककार्यसहिताज्ञान-
वृत्तेर्बाधत्वे विपर्ययोत्पत्त्यनन्तरं मनसो विषयान्तरसञ्चारे समयान्तरे शुक्तिलोचनसंयोगजाधिष्ठानज्ञानेना-
ननिवृत्तौ वार्तमानिककार्यध्वंसाभावेनाव्याप्त्यापत्त्या प्रविलीनकार्यसहिताज्ञाननिवृत्तेर्बाधत्वे च वार्त-
निककार्यसहिताज्ञाननिवृत्तौ तदभावेनाव्याप्त्याऽऽपत्त्यानैतल्लक्षणमित्यतः कार्यान्तराकारेण परिणताज्ञान-
वृत्तिर्बाध इत्यनुगतमुभयत्राप्यस्तीत्याशयेन वर्तमानेन प्रविलीनेन वेत्युक्तम् । अविद्यानिवृत्तिरूपपरा-
मतद्द्वारप्रतियोगितयेच्छाप्रयत्नग्रहणमिति बोध्यम् । द्वितीयं शङ्कते ॥ **स एवेति** ॥ यद्यप्यत्रैता-
स्य तवासिद्धेरन्यतरासिद्धितादवस्थ्यमित्यपि दूषणं वक्तुं युक्तं तथाऽपि प्रतिपन्नोपाधौ त्रैकालिकनिषेध-
तियोगित्वमङ्गीकुर्वताऽपि स्वरूपेण ध्वंसस्येवाज्ञाननिवृत्तिप्रयुक्तविलयनं वदताऽपि मया स्वरूपेण
सोऽभ्युपगम्यत इत्यपि परेण वक्तुं शक्यत्वात्प्रतिवादिशब्दोपेतभाष्यवाक्यारूढतयाऽस्य वक्तुमशक्य-
च्च तदारूढं दूषणमाह ॥ **तथेति** ॥ अनेनात्र तुशब्दो वाद्यभिमतज्ञानबाध्यत्वव्यवच्छेदार्थः ।
थवा प्रतिवादिन इत्यस्य ज्ञानबाध्यत्वमित्यनेनापि सम्बन्धः । पक्ष इति योग्यतया सम्बद्धेन
ब्दसम्बन्धः । एवं च पक्षविशेष इति सिध्यति । अपिशब्दस्य ज्ञानबाध्यत्वमित्यनेन सम्बन्ध
अभिप्रेत्य भाष्यं योजितं भवति । ननु चतुर्विधनाशेषु यस्य कस्यचिदपीश्वरातिरिक्ते त्वयाऽङ्गीकारान्न
गासिद्धिरित्यतस्तथात्वेऽप्यप्रयोजकत्वं स्यादेवेत्याशयेनाह ॥ **किञ्चेति** ॥ तन्निष्ठासिद्ध्युक्तेस्तद्धर्म-
तव्याप्त्यसिद्धिविषयकत्वविवक्षामभिप्रेत्य तात्पर्यमाह ॥ **व्याप्यत्वासिद्धमिति** ॥ अन्यतरासिद्ध्यादि-
दन्यतराप्रयोजकत्वमपि दूषणमिति भ्रान्तिं निवारयति ॥ **प्रतिवादिन इति** ॥ **तर्हीति** ॥ यद्यपि
त्वसाम्येऽपीत्यादिना वक्ष्यमाणदूषणमादावेव वक्तुं युक्तं तथाऽपि परोक्तहेतोर्व्यर्थविशेषणासिद्धिमपि
र्शयितुं प्रकारान्तरेण भाष्यं योजितमिति ध्येयम् । तर्के विशेषव्याप्तेरभावादविशेषप्रयुक्तसामान्यव्या-
श्चोक्तरीत्याऽविशेषासिद्धेरनुपपत्त्या व्याप्तिशून्योऽयं तर्काभास इत्याह ॥ **सत्त्वेति** ॥ असिद्धत्वेन
तिज्ञातबाध्यत्वयोर्मध्ये ज्ञाननिवर्त्यत्वरूपस्य तस्यासिद्धिमुपपाद्य प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपस्य
ाध्यत्वस्यापि तामुपपादयितुं, नन्वस्तु ज्ञाननिवर्त्यत्वरूपस्य तस्यासिद्धिर्न तु प्रतिपन्नोपाधौ निषेधरूपस्य

तस्य नेह नानेति निषेधस्य जागरूकत्वात्तस्यैव च हेतुतयोपन्यास इत्याशङ्कते ॥ **नान्वति** ॥ तस्याप्यसिद्धिरेव । श्रुतेरर्थान्तरपरत्वेन तत्परत्वाभावात् । अन्यथाऽन्योन्याश्रयाद्यापत्तेरित्याशयेनाह ॥ **श्रुत्यर्थेति** ॥ ननूत्तरवाक्यमसङ्गतम् । प्रपञ्चबाध्यत्वस्य शुक्तिरजतादिवल्लोकव्यवहारासिद्धतया तदुपपादकतयोत्तरत्रैवात्र योजयितुमशक्यत्वादिति चेन्न । तस्यास्मदभिमतज्ञानबाध्यत्वहेतुविवक्षायां व्यभिचारप्रदर्शकत्वेन सङ्गतत्वात् । न च पूर्ववाक्यमेव पराभिमतज्ञानबाध्यत्वव्यभिचारप्रदर्शकतया किं न व्याख्यायत इति वाच्यम् । शुक्तिरजतादेर्दृष्टान्ततयाऽसतश्च ज्ञाननिवर्त्यताया उभयासम्मतत्वेन प्रतिपन्नोपाधौ निषेधप्रतियोगित्वस्य च परं प्रत्युपपादनीयत्वेन ब्रह्मणश्चोभयविधज्ञानबाध्यत्वस्योभयासम्मत्या परोक्तज्ञानबाध्यत्वस्य व्यभिचारस्थलाभावेन स्वाभिमतज्ञानबाध्यत्वस्य हेतुत्वविवक्षायामेव व्यभिचारस्य वक्तव्यतयोत्तरवाक्येन तदुपपादनाय पूर्ववाक्ये ज्ञानबाध्यत्वं न सिद्धमपीत्यंशमसिद्धयव्याप्तिरूपदूषणद्वयप्रतिज्ञापरत्वेन योजयित्वा ततो विकल्पान्विधाय विशेषार्थकतुशब्दं ज्ञानबाध्यत्वमित्यनेन योजयित्वा ज्ञानबाध्यत्वम सिद्धमित्यंशमावर्त्य पराभिमतो ज्ञानबाध्यत्वविशेषो हेतुश्चेदसिद्धः प्रतिवादिनः, स्वाभिमतस्तद्विशेषश्चेद्व्याप्तिविकल्पमिति योजयित्वा तदुपपादकतयोत्तरवाक्यं योजनीयमित्याशयेनाह ॥ **अथवेति** ॥ अथवा प्रतिज्ञां विकल्पांश्च मनसि निधाय दूषणोक्तिमात्रपरं भाष्यमित्याशयेनाह ॥ **अथवेति** ॥ अस्मिन्पक्षेऽपिशब्दोऽनुक्तव्याप्तिवैधुर्यसमुच्चयार्थः ॥ **अन्यथेति** ॥ वेदान्तजन्यसम्यग्ज्ञानरूपवृत्तेरात्मविषयकत्वाभावे तस्याः आत्मविषयकाविद्यानिवर्तकत्वानुपपत्त्या चैतन्यमात्रस्य चाविद्याविरोधित्वाभावेनाविद्यानिवृत्त्यनुपपत्तेरित्यर्थः ।

स० – **प्रविलीनेन वेति** ॥ मुद्गरपातानन्तरं घटस्य नात्यन्तिकनिवृत्तिः, किन्तु प्रविलयमात्रमित्यभ्युपगमादतीतघटादेरपि ज्ञानादेव निवृत्तिरित्यर्थः ॥

प० **प्रतिज्ञामिति** ॥ विवादपदं सदसद्विलक्षणमितिप्रतिज्ञां वैलक्षण्यं सतश्चेत्यादिना निराकृत्येत्यर्थः ॥ **सिद्धान्त्यभिमतादिति** ॥ अन्यथाविज्ञातस्य सम्यग्विज्ञातत्वरूपस्य वा वक्ष्यमाणदिशेश्वरज्ञाननाश्यत्वरूपस्य वा सिद्धान्त्यभिमतबाध्यत्वस्य पक्षे सत्त्वान्न सिद्धमित्ययुक्तं स्यादतः पराङ्गीकृतम् ज्ञानबाध्यत्वं नेत्युक्तमिति भावः । 'अज्ञानस्य स्वकार्येण, वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाध' इति विवरणोक्तेराह ॥ **ज्ञाननिवर्त्यत्वं वेति** ॥ 'प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वम्ये'ति विवरणोक्तेः । 'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यती'ति सुरेश्वरोक्तेश्चाह ॥ **प्रतिपन्नेति** ॥ **यथाऽऽहेति** ॥ विवरणकार इत्यर्थः । भागासिद्धिपरत्वेनापि-

योजयितुमाह ॥ **स एवेति** ॥ अपिपदं भिन्नक्रममुपेत्य व्याप्यत्वासिद्धिपरत्वेनापि योजयति ॥ **किञ्चे-त्यादिना** ॥ **गुडजिह्विकेति** ॥ गुडयुक्तजिह्वा सैव गुडजिह्विका । बालानां कट्वादि ग्रासयितुमास्यव्या-

 दन्त्य जिह्वायां गुडं यथा स्थापयन्ति तद्वदिदमित्यर्थः । विपक्षे बाधकमाशङ्कते ॥ **सतो विनाश इति** ॥ **तर्हीति** ॥ आत्मनो विनाशित्व इत्यर्थः । प्रकारान्तरेण मूलार्थमाह ॥ **असिद्धमपीत्यादिना** ॥ **स एवेति** ॥ श्रुत्यर्थ एव । 'मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेदि'त्यादिनोपपत्तिविरोधादशक्य इत्युच्यमानत्वादित्यर्थः ॥ **परेणाप्यङ्गीकार्यमिति** ॥ अन्यथा विज्ञातत्वमात्राङ्गीकारांशसमुच्चय एवापि-पदं ज्ञेयम् । सिद्धान्तिना देहात्मैक्यारोपानङ्गीकारात् ॥ **अन्यथेति** ॥ सम्यग्ज्ञानरूपवृत्त्यविषयत्वे तद्विषयाविद्यानिवृत्तिर्न स्यात् । समानविषयकत्वेनैव ज्ञानाज्ञानयोरालोकांधकारयोरिव विरोधादिति भावः ।

या० —— **सिद्धान्त्यभिमतादिति** ॥ विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतमिति वक्ष्यमाण-त्वादित्यर्थः ॥ **स्वकार्येण वर्तमानेनेत्यादि** ॥ घटाज्ञानस्य घटज्ञानेन निवृत्तिदर्शनाद्घटज्ञानमपि बाधः स्यादित्यत उक्तम् ॥ **स्वकार्येणेति** ॥ किं वार्तमानिककार्यसहिताज्ञानस्य निवृत्तिर्बाध उत प्रविलीनकार्य-सहिताज्ञानस्य । नाद्यः । विपर्ययोत्पत्त्यनन्तरकाले मनसो विषयान्तरसञ्चारः । समयान्तरे च शुक्ति-लोचनसंयोगजाधिष्ठानज्ञानेनाज्ञाननिवृत्तौ तदभावेनाव्याप्तिः । न द्वितीयः । वर्तमानकार्यसहिता ज्ञाननिवृत्तौ तदभावादित्याशङ्क्य कार्याकारेणपरिणताज्ञाननिवृत्तिर्बाध इत्यनुगतलक्षणमुभयत्राप्यस्तीत्याह॥ **वर्तमानेनेत्यादि** ॥ न च प्रविलीनस्य कथं पुनर्ज्ञानेन निवृत्तिरिति वाच्यम् । अधिष्ठानज्ञानात्प्राक् कार्यस्य कारणाकारेण नात्यन्तिकनिवृत्तिः किन्तु कारणे प्रविलयमात्रं क्रियते । तथा च प्रविलीनस्यापि कार्यस्य कारणात्मना सत्त्वादधिष्ठानयाथात्म्यज्ञानेनात्यन्तिकी निवृत्तिरुपपन्ना । अत एव मुद्गरप्रहरणादिना निवृत्ते घटादौ ब्रह्मज्ञानेन निवृत्तिर्न सम्भवतीति कथं तस्य बाध्यत्वमिति शङ्काऽनवकाश इत्यभिप्रायात् ॥ **अन्यथेति** ॥ वेदान्तजनितवृत्तिविषयत्वाभाव इत्यर्थः ॥

श्री० —— **व्यर्थविशेषणासिद्धम्** ॥ ज्ञानबाध्यत्वमस्तु मिथ्यात्वं मास्तु सत्वमेवास्त्वित्यप्रयोजकत्वे शङ्किते नाशमात्रस्यैव मिथ्यात्वप्रयोजकत्वप्राप्त्या ज्ञानविशेषणं व्यर्थमित्यर्थः ॥ **उक्तबाधकेति** ॥ सतो विनाश इत्युक्तबाधकेत्यर्थः ॥ **उक्तत्वादिति** ॥ तथा चोक्तबाधकतर्कोऽयुक्त इत्याशयः ॥

न्तं प्रत्याचष्टे ॥ **ज्ञानबाध्यत्वमिति** ॥ अपिपदेन सदसद्विलक्षणत्व समुच्चिनोति । तुशब्दो ज्ञानबाध्यत्वमभिमताव्यवच्छिनत्ति ॥